
Licence No. 644 dated 9-3-1949.
VOL. V, No. 1 JANUARY 1949

JOURNAL

OF THE

TRAVANCORE UNIVERSITY ORIENTAL MANUSCRIPTS LIBRARY

TRIVANDRUM



[Annual Subscription Rs. 4]

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1949

CONTENTS

मात्रे सति कल्पापायं यावत् प्रलयपर्यन्तं विश्वेषां भ्रमाणां भ्रान्तीनामुत्पादयित्री जनयित्री । अथवा विश्वानि भुवनानि सन्तीति मिथ्यारूपां भ्रान्तिं द्वैतभ्रममुपजनयन्ती माया प्रकृतिः भूरि प्रभूतं नानाप्रकारमिन्द्रजालं व्यातनोति विस्तारयति । यथेन्द्रजालिकः पिञ्छिकाभ्रमणमात्रेणासद्वस्तु बहुविधं दर्शयति तथेत्यर्थः । तदुक्तम् —

"क्षेत्रज्ञस्य हि मायायामौदासीन्येन वीक्षणात् ।
मन उत्पद्यते तस्माज्जायते निखिलं जगत् ॥" इति ।

तस्मै तथाभूतमहिम्ने ते नम इति सम्बन्धः ॥ १३ ॥

एवं निष्कलत्वमुक्त्वा सकलत्वेन कुलकवृत्त्या पञ्चभिः श्लोकैः स्तौति—

नानारत्नश्रेणिराजत्किरीट-
ज्योतिर्मालाबर्हिबर्हावतंसम् ।
कारुण्यार्द्रस्निग्धमुग्धाक्षिपात-
व्याधूतात्मासक्तभक्ताधिजातम् ॥ १४ ॥

गण्डालोलत्कुण्डलं चारुशारी-
तुण्डाभोगश्रीमदुत्तुङ्गघोणम् ।
दन्तश्रेणीशुभ्रकान्तिप्रवाह-
ज्योत्स्नोल्लासभ्राजदास्येन्दुबिम्बम् ॥ १५ ॥

कण्ठे राजत्कौस्तुभं वन्यमाला-
हारस्फारश्रीकदोरन्तरालम् ।
केयूराढ्यैः शङ्खचक्रादिचिह्नै-
र्बाहानालैः शोभमानं चतुर्भिः ॥ १६ ॥

चञ्चत्काञ्चीसञ्चयोदञ्च्यमान-
श्रोणीचक्रप्रस्फुरत्पीतचेलम् ।
मन्दक्रन्दन्मञ्जुमञ्जीरहंस-
द्वन्द्वासक्तव्यक्तपादारविन्दम् ॥ १७ ॥

संसेवाभिव्यग्रयोगीन्द्रसंसत्-
संसारार्तिध्वंसिपांसूज्ज्वलाङ्घ्रि ।
मेघश्यामं त्वद्वपुर्नः पुरस्ता-
दानन्दैकस्वादु तत् प्रादुरस्तु ॥ १८ ॥

नानेति । त्वद्वपुः नः पुरस्तात् प्रादुरस्त्विति पञ्चमश्लोकान्तेनान्वयः । कीदृशं त्वद्वपुरित्याकाङ्क्षायां विशेषणैर्विशिनष्टि । नानाभूताभिरनेकवर्णाभी रत्नानां श्रेणिभिः पङ्क्तिभिः राजतः शोभमानस्य किरीटस्य ज्योतिर्माला प्रभासमूहः स एव बर्हिबर्हः मयूरशिखण्डः स एवावतंसः शिरोलङ्कारो यस्य । ज्योतिषां नानावर्णत्वान्मयूरशिखण्डतयारोपणम् । कारुण्यार्द्रेण कृपापयःसिक्तेन स्निग्धेन स्नेहयुक्तेन अत एव मुग्धेन मोहकरेणाक्षिपातेन कटाक्षेण व्याधूतं निराकृत-मात्मन्यासक्तानामनुरक्तानां भक्तानामाधिजातं पीडासञ्चयो येन । गण्डयोः कपोलयोः आलोलन्ती कुण्डले यस्य । चारुः शोभमानः शारीतुण्डस्य शुकी-चञ्चोराभोगः संस्थानं तादृशश्रीमान् कान्तिमानुत्तुङ्गा उन्नता घोणा नासिका यस्य । दन्तश्रेणीनां दन्तपङ्क्तीनां शुभ्रो धवलः कान्तिप्रवाहः प्रभा-निष्यन्दः स एव ज्योत्स्नोल्लासश्चन्द्रिकाविभावः तेन भ्राजच्छोभमानमास्येन्दु-बिम्बम् इन्दुबिम्बसदृशमास्यं यस्य। आस्येन्दुबिम्बत्वारोपणमत्र दन्तप्रभाया ज्योत्स्नोल्लासत्वेनारोपणस्य कारणमिति परम्परितरूपकम् । कण्ठे राजच्छोभ-मानं कौस्तुभरत्नं यस्य । वन्यमालाहाराभ्यां वनमालामुक्तागुणाभ्यां स्फारश्रीकं प्रवृद्धप्रभं दोरन्तरालं वक्षःस्थलं यस्य । केयूरैरङ्गदैराढ्यैर्धनिकैः महाधनयुक्तै-रित्यर्थः । शङ्खचक्रादिः; आदिशब्देन गदापद्मे अपि गृह्येते । स एव चिह्नं लाञ्छनं येषां तैश्चतुर्भिर्बाहानालैः प्रशस्तबाहुभिः शोभमानम् । चञ्चता चञ्च-लेन काञ्चीसञ्चयेन मेखलाजालेन उदञ्च्यमाने पूज्यमाने शोभमाने इति यावत् । श्रोणिचक्रे कटीतटे प्रस्फुरत् प्रकाशमानं पीतचेलं पीताम्बरं यस्य । मन्दं यथा तथा क्रन्दच्छब्दायमानं मञ्जुमनोहरं मञ्जीरे पादकटके एव हंसद्वन्द्वं मराल-मिथुनं तेनासक्ते बद्धे पादारविन्दे अरविन्दसदृशौ पादौ यस्य । पादयोरर-विन्दत्वेनारोपणाद्धि मञ्जीरयोर्हंसद्वन्द्वरूपणम् । संसेवायां सम्यग्भजनेऽभि-व्यग्रायास्तत्पराया योगीन्द्रसंसदः अष्टाङ्गयोगाभ्यसनपूर्वकतपश्चर्यानिरतानां सभायाः, समूहस्येति यावत्, या संसारार्तिर्जननमरणदुःखं तां ध्वंसितुं निराकर्तुं शीलमेषामिति संसारार्तिध्वंसिभिः पांसुभिः परागैरुज्ज्वलौ शोभमाना-

१. 'तद्वपुः' इति पाठान्तरम्.

वङ्घ्री चरणौ यस्य । मेघवच्छ्यामं मेघवर्णम् । आनन्द एक एव स्वादुरास्वाद्यो रसो यस्य । तत्तादृशं त्वद्वपुस्तव शरीरं नोऽस्माकं पुरस्तादग्रभागे प्रादुरस्तु प्रकाशताम् । साक्षाद्भवत्विति प्रार्थनायां लोट् ॥ १८ ॥

एवंप्रायस्तोत्रवाचां सुराणा-
मग्रे साक्षाद्भूतवान् पीतवासाः ।
सान्द्रोल्लासं कूजतां सारसाना-
मारम्भेऽह्नस्तेजसामीशितेव ॥ १९ ॥

एवमिति । पीतवासाः पीताम्बरो महाविष्णुरेवंप्राया एवंप्रकाराः स्तोत्रवाचः स्तुतिवाक्यानि येषां तेषां सुराणामग्रे पुरोभागे साक्षाद्भूतवान् प्रत्यक्षीभूतः । अत्रोपमामाह—अह्नो दिवसस्यारम्भे उषसि तेजसामीशिता सूर्यः । सान्द्रोल्लासं सम्पूर्णोन्मेषं यथा भवति प्रभातागमजनितः प्रहर्ष उल्लासस्तथा कूजताम् अव्यक्तान् शब्दानुद्घोषयताम् । 'कूज अव्यक्तशब्दे' इति धातुः । सारसानां सरःसम्बन्धिनां पक्षिणामग्रे इव । प्रभातागमप्रहर्षजनिताव्यक्तशब्द-घोषस्तेषां स्तुतिरूपेणारोप्यत इति साधर्म्यम् ॥ १९ ॥

यत्पानादेवोद्भविन्त्याः सुधायाः
स्वादाभिज्ञाः सम्भवेयुर्निलिम्पाः ।
तादृङ्माधुर्याक्षरस्रङ्मनोज्ञा-
मूचे वाचं मन्दहासी मुकुन्दः ॥ २० ॥

यदिति । मुकुन्दो महाविष्णुर्मन्दहासी सन्, सुराणामभिप्रायज्ञानं मन्दहासहेतुः । वाचमूचे उक्तवान् । कीदृशीम् । तादृङ्माधुर्यधुराभिः तथाभूतमाधुर्यगुणाभिरक्षरस्रग्भिरक्षरपङ्क्तिभिर्मनोज्ञां मनोहराम् । तादृङ्माधुर्य-मित्येतद्यच्छब्देन समर्थयति—यत्पानादेव यस्याः वाचः पानादास्वादनाच्छ्रोत्रेन्द्रियेणानुभवादेव हेतोर्निलिम्पा देवा उद्भविन्त्याः क्षीराब्धिमथने समुद्भवन्त्याः सुधायाः पीयूषस्य स्वादाभिज्ञा रसवेदिनः सम्भवेयुः । भगवद्वाचो माधुर्यस्यानुभवेन क्षीराब्धावुत्पत्स्यमानायाः सुधाया माधुर्यमीदृशमिति ज्ञातवन्त इत्यर्थः । तादृशज्ञानमेषां यथा भवति तथा मधुरां वाचमूचे ॥ २० ॥

भगवद्वचनप्रकारमाह —

निर्विण्णत्वं निर्जरा उज्जहीत
ज्ञातोऽस्माभिर्युष्मदाशंसितोऽर्थः ।
विज्ञातार्था अर्थियाच्ञाक्षराणि
प्रायो नैव स्थूललक्षाः सहन्ते ॥ २१ ॥

निर्विण्णेति । हे निर्जरा देवाः, यूयं निर्विण्णत्वं निर्वेदशालित्वम् । गत्यन्तराभावात् सुखानुभवे विरागोऽत्र निर्वेदः । शोकशालित्वमिति यावत् । उज्जहीत त्यजत । 'ओहाक् त्यागे' इत्यस्माल्लोटि मध्यमपुरुषबहुवचने रूपम् । युष्माभिराशंसितः प्रार्थितोऽर्थः । अमृतमथनरूपोऽभिप्राय इत्यर्थः । सोऽस्माभिर्ज्ञातो विदितः । अकथनेनैवावगतम् ज्ञानसमयानन्तरमेवाभिप्रायपूरणमपि भविष्यतीत्याशयेनाह—स्थूललक्षा दानशीलाः 'स्युर्वदान्यस्थूललक्षदानशौण्डा बहुप्रदे' इत्यमरः । विज्ञातार्था अभिप्रायवेदिनः सन्तः प्रायो बाहुल्येनार्थिनां याचकानां याच्ञाक्षराणि याचनरूपाणि देहीत्यक्षराणि नैव सहन्ते न क्षमन्ते । यदाहुः—

"प्रापितेन चटुकाकुविडम्बं
लम्भितेन बहुयाचनलज्जाम् ।
अर्थिना यदधमर्जति दाता
तन्न लुम्पति विलम्ब्य ददानः ॥"

इति । हि यस्मात्तस्मादयाचतामेव भवतामभिप्रायः पूरयिष्यत इति भावः ॥ २१ ॥

दृष्टश्चासाविष्टसिद्धेरुपायः
स्पष्टं ब्रूमः क्लिष्टसाध्योऽयमर्थः ।
यद्वा यत्तु क्लेशलब्धं तदेव
स्थेम्नो भूम्ने यद्वदाम्नायलाभः ॥ २२ ॥

दृष्ट इति । इष्टस्यामृतपानस्य सिद्धेरुपायो दृष्टश्चासौ अस्माभिरेवामिति पर्यालोचित एव । स्पष्टं ब्रूमः प्रकाशमेव वदामः । किं निगूहनेनेत्यर्थः । अयमर्थः— समुद्रमथनरूपं प्रयोजनं क्लिष्टं क्लेशयुक्तं यथा भवति तथा साध्यः

साधयितुं शक्यः । महता क्लेशेन प्रयत्नेन विना न सिद्ध्यतीत्यर्थः । यद्वा अथवा यद्वस्तु क्लेशेन प्रयत्नेन लब्धं भवति तदेव वस्तु स्थेम्नः स्थिरत्वस्य भूम्ने समृद्ध्यै भवति । अत्र दृष्टान्तमाह—आम्नायलाभो वेदशास्त्राद्यधिगमो यद्वत् । यथा यावद्यावत् प्रयत्नेनाभ्यस्यते वेदशास्त्रादि तावत्तावद् दृढतरं भवति इति प्रसिद्धम् । अथवा 'क्लेशलब्धमधिकादरदं तु' इतिवत् क्लेशलब्धमेव दार्ढ्योपपत्तये भवतीत्यभिप्रायः ॥ २२ ॥

आदौ तावद्दानवैरप्यमित्रै-
स्सन्धातव्यं स्वार्थसिद्ध्यै भवद्भिः ।
द्वेष्टारोऽपि ह्यात्मपोषस्य हेतो-
राश्रीयन्ते कोकिलैः काकलोकाः ॥ २३ ॥

आदाविति । हे देवाः भवद्भिः आदौ तावत् प्रथममेव; तावच्छोत्रावधारणार्थः । अमित्रैर्जात्यैव शत्रुभिरपि दानवैरसुरैः सह स्वार्थस्यामृतसंभवरूपकस्य सिद्ध्यै प्राप्त्यर्थं सन्धातव्यं सन्धिः कर्तव्यः । सान्धिर्नामान्योन्यमेलनरूपः प्रथमनयः । कथं शत्रुभिः सन्धीयत इति न विरन्तव्यमिति सनिदर्शनमाह—कोकिलैः परभृतैः कर्तृभिः काकलोकाः काकसमूहा द्वेष्टारोऽप्यात्मद्रोहिणोऽपि आत्मनः शरीरस्य पोषस्य वृद्धेर्हेतोः शरीरपोषणनिमित्तमाश्रीयन्ते सेव्यन्ते । हि यस्मादर्थे ।

'प्रागन्तरिक्षगमनात् स्वमपत्यजात-
मन्यैर्द्विजैः परभृताः खलु पोषयन्ति ।'

इति प्रसिद्ध्यनुसारेयमुक्तिः ॥ २३ ॥

शक्रप्रष्ठाः शुक्रशिष्यैः समेता
मन्थानार्थं म(न्थ?न्द)रं कल्पयन्तः ।
सर्पाधीशं वासुकिं पाशयन्तो
मथ्नीतेष्टप्राप्तये दुग्धसिन्धुम् ॥ २४ ॥

शक्र इति । हे देवाः शक्र इन्द्रः प्रष्ठोऽग्रगामी येषाम् । 'प्रष्ठोऽग्रगामिनि' इति निपातितोऽयं प्रष्ठशब्दः । तादृशा यूयं शुक्रशिष्यैरसुरैः समेताः सहिताः;

मन्थानो मथनदण्डस्तदर्थं मन्दरपर्वतं कल्पयन्तः संपादयन्तः सन्तः । किञ्च सर्पाणामधीशं वासुकिं पाशयन्तः पाशं कुर्वन्तः । 'तत् करोति' इति णिच् । इष्टस्यामृतस्य प्राप्तये लाभार्थं दुग्धसिन्धुं क्षीराब्धिं मथ्नीत विलोलयत । 'मथ विलोलने' इति क्र्यादि ॥ २४ ॥

एवं कृते स्वार्थसिद्धिः स्यान्न वेति न सन्देहः कार्य इत्याह—

निष्कृष्टोऽसावप्रमत्तैर्भवद्भिः
प्रज्ञोन्मेषेणेव मन्थाचलेन ।
द्राक् पीयूषं दर्शयिष्यत्यवश्यं
प्रत्यक्तत्त्वं वेदतन्त्रो यथा वा ॥ २५ ॥

निष्कृष्ट इति । असावब्धिः क्षीराब्धिः अप्रमत्तैः प्रमादरहितैर्भवद्भिर्मन्थाचलेन मन्दरेण करणभूतेन निष्कृष्टो नितरां कृष्टः प्रमथितः सन् द्राग् झटिति पीयूषं दर्शयिष्यति । अवश्यं निश्चितोऽयमर्थ इत्यर्थः । वेदानां तन्त्रः समूहः ऋग्यजुस्सामानि यथा प्रत्यक्तत्त्वं प्रतीचः परमात्मनस्तत्त्वं स्वरूपं दर्शयिष्यति प्रकाशयिष्यति तथेत्यर्थः । केन निष्कृष्ट इत्यत्राप्रज्ञोन्मेषेणेति । प्रज्ञोन्मेषो बुद्धिविकाशस्तेन नितरां पर्यालोचितो वेदसमूहस्तावद्यथोपनिषत्तत्त्वं प्रकाशयति तद्वदिति संबन्धः ॥ २५ ॥

इत्थंवाचां दीधितीनामिवौघै-
र्देवश्रेणीमब्जवाटीमिवासौ ।
कृत्वा सद्यः प्रीतिफुल्लाननाब्जा-
मह्नां भर्तेवाब्जनाभस्तिरोभूत् ॥ २६ ॥

इत्थमिति । अह्नां भर्तेव सूर्य इवाब्जनाभः पद्मनाभो दीधितीनां रश्मीनामिव इत्थंवाचामेवंप्रकारवचसामोघैः सन्ततिभिरब्जवाटीं पद्मिनीमिव देवश्रेणीं देवसमूहं प्रीत्या प्रहर्षेण फुल्लानि विकसितानि आननाब्जानि अब्जसदृशान्याननानि यस्यास्तादृशीं कृत्वा तिरोभूदन्तर्हितवान् । अत्र 'शरैरुस्रैरिवोदीच्यान्' इतिवत् सावयवोपमालङ्कारः । सूर्यसदृशो विष्णुः (रश्मि)सन्ततिसदृशैर्वचोभिः पद्मिनीसदृशीं देवसंहतिं प्रमोदोल्लासिताब्जसदृशवदनां कृत्वा तिरोहितवानित्यर्थः ॥ २६ ॥

इन्द्रोऽपि द्रागिन्द्रसेनाभिधानं
दैत्यश्रेष्ठं सान्त्वयामास साम्ना ।
कार्यायत्ता नीतयो हि प्रकृत्या
रागद्वेषावाशु विस्मारयन्ति ॥ २७ ॥

इन्द्र इति । इन्द्रोऽपि द्राग् झटिति इन्द्रसेन इति नामान्तरं दैत्यश्रेष्ठं महाबलिम् । साम्ना सामोपायेन इष्टानुसरणव्यापारेण सान्त्वयामास वशीकृतवान् । ननु प्रकृत्या वैरिणि तस्मिन् कथं सामप्रयोगलाघवं कृतवानिति चेत्तत्राह कार्येत्यादिना । कार्यायत्ताः प्रयोजनाधीना नीतयो नयप्रयोगाः प्रकृत्या स्वभावेन रागद्वेषौ स्नेहवैरे आशु क्षिप्रं विस्मारयन्ति प्रमर्षयन्ति । रागिणो द्वेषिणोऽ(पि) प्रयोजनापेक्षायां सत्यां रागं द्वेषं च विस्मरन्त्येवेत्यर्थः । तदुक्तम् —

"मित्राणि शत्रुत्वमुपानयन्ती
मित्रत्वमप्यर्थवशाच्च शत्रून् ।
नीतिर्नयत्यस्मृतपूर्ववृत्तं
जन्मान्तरं जीवित एव पुंसः ॥ इति ॥ २७ ॥

देवासुराणां सन्धानपूर्विकां प्रवृत्तिमुपन्यस्यति —

संभूयस्यद्देवदेवारिवृन्दं
बाहुस्थेम्ना दृप्तमप्यत्र जातम् ।
व्योमोल्लङ्घिव्यायतोत्तुङ्गशृङ्गं
प्रत्युद्धर्तुं मन्दरं मन्दरंहः ॥ २८ ॥

सम्भूयस्यदिति । सम्भूयस्यत् सम्मिलितम् । सम्भूय(न् ? स्)शब्दस्य कण्ड्वादित्वाद्यक् । देवानां देवारीणां च वृन्दं समूहः कर्तृ बाहुस्थेम्ना बाहुबलेन दृप्तमहङ्कृतं सदपि अत्रास्मिन् समये मन्दरं प्रत्युद्धर्तुमुद्धोढुं मन्दरंहः प्रतिहतवेगं जातम् । अत्र हेतुगर्भं विशेषणमाह — व्योमोल्लङ्घीनि अतिक्रान्तवियत्पथानि व्यायतानि विस्तीर्णान्युत्तुङ्गान्युन्नतानि शृङ्गाणि यस्य तादृशम् । पृथुतमत्वाद्देवदैत्यानां मिलितानामप्यशक्योद्धरणत्वमस्य संवृत्तमित्यर्थः ॥ २८ ॥

विष्वद्ध्यग्भिस्तप्तहेमप्रकाशै-
रङ्गच्छायैर्दीपिताशावकाशः ।
विष्वक्सेनस्याज्ञया हर्तुमद्रिं
तत्रायातस्तत्क्षणं पक्षिराजः ॥ २९ ॥

विष्वद्ध्यग् इति । तस्मिन्नेव क्षणे पक्षिराजो गरुडो विष्वक्सेनस्य विष्णोराज्ञयाद्रिं मन्दरं हर्तुमानेतुं तत्र देवदानवसमाजे विष्वद्ध्यग्भिः परितो व्याप्तैः (अङ्गच्छायैः) 'छाया बाहुल्ये' इति क्लीबत्वम् । दीपित आशावकाशो दिग्भागो येन तथा सन्नायात आगतवान् ॥ २९ ॥

उत्क्षिप्योच्चैः पक्षविक्षेपवात-
प्रक्षुण्णाधःस्थूलमूलानुषङ्गम् ।
क्षीराम्भोधावक्षिपद्वीचिमाला-
स्फालक्रन्दत्कन्दरं मन्दरं सः ॥ ३० ॥

उत्क्षिप्येति । स च पक्षिराजो मन्दरं पक्षयोर्निजगरुतोर्विक्षेपवातैर्विविधसमास्फालनजनितैरनिलैः प्रक्षुण्णः खण्डितोऽधोभागे स्थूलानां पृथूनां मूलानामनुषङ्गः संम्बन्धो यस्य तथा कुर्वन् । उच्चैरुत्क्षिप्योद्धृत्य क्षीराम्भोधावक्षिपत् क्षिप्तवान् । तत्कालविशेषमाह — वीचिमालानां तरङ्गावलीनामास्फालेन प्रहारेण क्रन्दन्त्यः शब्दायमानाः कन्दरा गुहा यस्य । तथा सन्तमक्षिपदिति सम्बन्धः ॥ ३० ॥

वासुकिसमानयनमपि संक्षेपेणाह —

शम्भोः पाणावर्धभूषायमाणः
शेते योऽसौ वासुकिः सोऽपि तावत् ।
तादृक्स्थूले वेष्टमानस्त्रिरद्रौ
दृष्टः स्पष्टं शिष्टगात्रत्रिभागः ॥ ३१ ॥

शम्भोरिति । यो वासुकिः पूर्वं शम्भोः पाणौ परमेश्वरस्य प्रकोष्ठे अर्धभूषायमाणोऽर्धकटकमिवाचरन् शेते । सोऽपि तावत्तस्मिन् समये तादृक्स्थूले तथाविधप्रथिम्नि अपरिच्छेद्यविस्तार इत्यर्थः । अद्रौ मन्दरे त्रिरभ्यावृत्तित्रयेण त्रिगुणं वेष्टमानो वलयितशरीरः सन् स्पष्टं सर्वसमक्षं दृष्टः सर्व-

तदानीं खलु स्वपादसारसयुगलसेवननिरतं भरतमर्थिसार्थप्रार्थितार्थसमर्थनसमर्थनसपाणिदाक्षिणेयदसहस्रकरितं समालिङ्ग्य सुचिरमवाप्तसर्वार्थः मराळविरळेतरपार्श्वयुगलमनन्य इव वालव्यजनसंवीज्यमानः चिरतरपरिचयतः समनुभवेयं समालनोपमानमादृमिति सततसेवमानेनेव वनितायुतेन तारकापतिना तारराजिविलसितातपत्रेण संशोभमानः सानुग्रहमवलोकयन् रक्षःप्लवगक्षत्रियवीराँ अरुणतानुबन्धतो विनतात्मजाय तरणिरथसारथ्यपदं मिलनविलम्बजनायेव तदीयतुङ्गतरतुरङ्गमान् सञ्चोदयन्तीभिः निजाञ्चलैर्विचित्राभिरपि सचित्राभिः पताकिकाभिः प्रतिभवनमुल्लासमानां, सारङ्गणैरिव लसमानहस्तश्रवणैरिन्दिराव्यापारैरिव दाननारिमनोहरैर्मातङ्गैरुल्लसन्तीं सागरैरिव सावर्तैः शुक्तियुक्तैश्च कुम्भकारभवनैरिव भासमानभाण्डैः सन्तानादिभिरिव सिन्धुसम्भवैस्तुरङ्गैः समुल्लासमानां, महाह्रदैरिवावदाततरवारिभिः सत्कविकाव्यप्रबन्धैरिव बाणभरणिनाश्रितैः धानुष्कधुर्यवत् घणघणायमानकोदण्डैः सार्वभौमभवनैरिव सदारामाश्रयैः, बलिभ्वरणैरिव विलसद्वारवाणैः पादातवरीभिरतिरमणीयां प्रविश्य पुरीमयोध्यां तत्र तत्र परिपूजितः सज्जनैः निर्जरैरिव निजनगरीं सदनं निजमाससाद मेदिनीतनयासहितः स हि दाशरथिः ॥

स दारपरिमोदाय निजागमनमङ्गलम् ।
श्वश्रूनिवेदनायेव ववन्दे प्रसुवं तदा ॥ ७० ॥

तदनन्तरं वसिष्ठप्रमुखाः परमर्षयः भगवतः सीतापतेर्भविष्यत्यद्य सार्वभौममहाभिषेक इति सहर्षेषु सर्ववर्षपुरुषेषु, वर्षत्सु पुष्पवर्षममरवर्येषु, गायत्सु सुतरां सुरगायकेषु, नृत्यन्तीषु च सुरवरपुरपुरन्ध्रीषु, सुरनरवरताड्यमानभेरीतूर्यानकदुन्दुभिवीणावेणुपणवपटहमृदङ्गशङ्खगोमुखप्रमुखवाद्यध्वनिप्रध्वानितेषु दशदिशान्तेषु बहुतररत्नपरिचित्रितपञ्चाननासनसमारूढं समभ्यषिञ्चन् प्लवगपरिवृढसमानीतसरितांपतिसलिलैः सीतासमेतं रामचन्द्रं त्रिजगत्यधिपं वसुमत्याधिपत्ये ॥

तदा खलु शतमखमुखा लेखेश्वराः पद्मरागगारुत्मतमारकतेन्द्रनीलमहानीलवैडूर्यविद्रुममौक्तिकप्रमुखरत्नावळिचकासत्काञ्चनकाञ्चिमकुट

अथ तृतीयोल्लासः ।

स्तुत्वा ततो रघुपतिं निजवाग्विलासै-
रुल्लासमानमहिळं बहुळप्रमोदः ।
वैकर्तनान्वयपयोनिधिपूर्णचन्द्रं
प्रायादजामिलजनिक्षितिमार्य एषः ॥ १ ॥

अजामिलमुनेर्गाथामगायत शुकेरिताम् ।
कमलाकमितुर्नाम्नां सोऽयं माहात्म्यसूचिकाम् ॥ २ ॥

इत्थमत्यर्थं सम्भावयमानो रामभद्रनामवैभवं समभियसौ ब्रह्मावर्ताभिधानं क्षेत्रं यत्र च ऋषभः सत्रमचीकरत् ॥

शृङ्गिबेरपुरं तस्मात्सोऽयमस्मद्गुरुर्महान् ।
गाम्भीर्येऽम्भोनिधिसमः समगात्सज्जनाग्रणीः ॥ ३ ॥

ततः खलु कृष्णमिव काळिन्दीसहितं, धातारमिव सरस्वती-समुल्लासितं, गुहमिव बर्हिर्मुखवाहिनीसङ्गतं, अश्वमेधमिव प्रयागं समधिगत्य तं क्षेत्रवरं त्रिवेणीसङ्गमसवनत्रयावगाहनकपिशीकृतवेणी-कलापः सोऽयमनवीनकलाकलापो मासमुवास सहस्रयम् । तदनु समगाद्विचित्रकटकं चित्रकूटम् ॥

देशिकस्तत्र संसेव्य समीरणसुतं मुदा ।
यादसांपतिदायादमद्राक्षीत्तापसेश्वरम् ॥ ४ ॥

काशीमवाप गुरुरेष गुणैकराशि-
स्तस्माद्विचित्रकटकादथ चित्रकूटात् ।
भागीरथी हरिपदाम्बुजसङ्गपूता
पूतीकृतत्रिभुवना प्रचकास्ति यस्याम् ॥ ५ ॥

पावमानिपुरोभागे भासमानां शुभावहाम् ।
भागीरथीमभिगम्यावथायमवगाहितुम् ॥ ६ ॥

तदा खलु देशिकोऽयं समवगाह्य मुहुर्मुहुर्वाहिनीं बहिर्मुखाणां समाराध्य तं भगवन्तं धरणीतनयारमणं, चन्द्रमसमिव सोमं मण्डलेशमिव महासेनालङ्कृतपार्श्वभागं भोगाङ्कितं च, उग्रमप्यनुग्रं प्रागुत्तरदिङ्मात्रनाथमपि विश्वनाथं स्वयमुपनताणिमादिमानिखिलैश्वर्यसनाथं नाथमानजनमनोरथपरिपालनदक्षं दक्षाध्वरविध्वंसिनं सह निजपरिषदैः समीरयन्तं राम रामेति निरन्तरं तं भगवन्तं सदाशिवं शिवं प्रदक्षिणीकृत्य नमस्कृत्य समस्तावीत् ॥

तदनन्तरम् —

यद्गोपुराग्रानिभा लसन्त्यो
वराणसीशस्य विलोकनाय ।
समागता विश्रमितुं निषण्णा
मध्येपथं स्वर्गिवरा इवासन् ॥ ७ ॥

यत्सौधकूटालयसालभञ्जिका
गीर्वाणराड्लोकजिगीषयानया ।
सञ्चोदिता यान्त्य उपर्युपर्यलं
राजन्ति सेना इव शस्त्रपाणयः ॥ ८ ॥

यच्चन्द्रशालालयसालभञ्जिका-
श्चन्द्राश्मभृङ्गारकरा विरेजिरे ।
सम्पाद्य चन्द्रादमृतं प्रदित्सवो
वाराणसीवासिजनेभ्य आदरात् ॥ ९ ॥

वज्रिनीलमणिसौधसङ्कुलं
व्योम वीक्ष्य नवनीरदावृतम् ।
भानुतापपरितप्तचातका
भेजिरे मुदमतीव यत्पुरि ॥ १० ॥

पण्यवीथिषु घरट्टजं रवं
सर्वतः प्रसृमरं मनोहरम् ।
नीलकण्ठनिवहा निशम्य ते
लेभिरेऽभ्ररवशङ्कया मुदम् ॥ ११ ॥

घटीवधूट्यः खलु यत्र पुर्यां
भुजावबन्धेन निपीडयन्ति ।
मतङ्गजाङ्गेयघटं कुचानां
विजेतुकामा रिपुशङ्कयेव ॥ १२ ॥

विश्वेशसेवासमये परस्परं
सङ्घर्षजस्वेदपयःपरम्पराम् ।
प्रापुस्तरां सावनतां व्यपोहितुं
यस्यां पताकास्त्रिदिवौकसामपि ॥ १३ ॥

वरणतरणिराजत्पुत्रिका नाविकेन्द्रा
गृहगणसरिदीशे सन्तरन्तीव यस्याम् ।
विमलकनककेतुक्षेपणीभिर्धृताभिः
सुकृतशुभसमीरे सौधकल्लोलजाले ॥ १४ ॥

वाराणसीं तां नगरीं समन्तात्
समीक्ष्य तस्यां गुरुसार्वभौमः ।
मासानवात्सीन्नवकं समोदं
समीरसूनोः सविधे महात्मा ॥ १५ ॥

ततः परं पङ्कजाक्षपदपङ्कजपरिपूजनजातामोदो देशिकोऽयमसंस्पृश्य सिन्धुं सुकृतक्षपणमवगाह्य शोणभद्राभिधानां धुनीमभिययौ गयाभिधानं क्षेत्रम् ॥

अथ खल्वभिषिच्य पदं विष्णोः आभिषेचनिकैः कलशैरभ्यर्च्य तुलसीकुसुमादिभिः कुम्भसम्भवभापितसंहृतब्रह्माण्डभेदनसम्भृतसम्भ्रमकूटसहस्रं शृङ्गिबेरपुरमिव गुहाभिरामं, कैलासमिव शिवायतनं, बर्हिर्मुखलोकमिव हरिहयकान्तं, (पु ? पौ)लस्त्यमिव रञ्जितार्जुनं, मनुवंशमिवेक्ष्वाकुकमनीयं, समाश्रितपिशिताशपुरकान्ताररामभद्रदारैरिव कुवेणीरमणीयैर्जलाशयैः समुद्भासितं, अकुलीनमपि सद्वंशसम्भूतिं,

भीममपि कीचकोल्लासकं, सरोवरमिव राजत्पुण्डरीकं समतीत्य विन्ध्यं धरमवलोकितवङ्गदेशो देशिकः पुरुषोत्तमसिसोविषुराजगाम जगन्नाथम् ॥

इह मनन्तीति गतस्य देहिनः
करस्थिता मुक्तिरनन्तशायिने ।
निवेदितान्नादिलवाशनं बुधा
जनार्जितैनःकुलतूलपावकम् ॥ १६ ॥

तं मुदा देशिकोऽस्माकं ववन्दे पुरुषोत्तमम् ।
दारुसन्निहितं देवं सुभद्रासीरिसंयुतम् ॥ १७ ॥

तुष्टाव सन्तुष्टमनस्क एष
इष्टार्थसिद्ध्यै मुनिभिः समिष्टम् ।
क्लिष्टं पिनष्टि स्थिरमाश्रितानां
यस्तं निजेष्टं ददतं सुहृष्टम् ॥ १८ ॥

योऽन्तः प्रविष्टो जगदिन्द्रियाणि
वागादिकान्येष दयार्द्रदृष्ट्या ।
सञ्जीवयत्यद्भुतविक्रमस्य
गातुं क ईष्टेऽस्य गुणाननन्तान् ॥ १९ ॥

तदेतन्महसां बृन्दं प्रमोदं प्रददातु मे ।
उदारचरितस्यास्य सेवालालसचेतसे ॥ २० ॥

तदनन्तरं पतितपावनो गुरुः
स रथाङ्गमद्भुततमं तथाभिधम् ।
अभिवन्द्य तां विपणिवर्यशोभितां
नगरीं समीक्ष्य परितस्ततो ययौ ॥ २१ ॥

तदानीं खलु मेदिनीत्रिदशवन्दितपादारविन्दो देशिकोऽस्माकं मुकुलीभवदम्भोभवमध्यबद्धचरणेषु षट्चरणेषु, सदनसमुत्कण्ठेषु कल-

कण्ठेषु, कुमुदामोदनकिरणास्वादनाय सानन्देषु चातकवृन्देषु, अन्धकारबन्धनसमुत्सुककृष्णवर्त्मप्रविष्टपुष्करेष्टभानुष्विव विष्फुरत्सु दीपाङ्कुरेषु, महानन्देषु च कुमुदसन्दोहेषु, नन्दनवनेष्विव सञ्चरत्कौशिकेषु, दिक्चक्रेषु बर्हिर्मुखबल इव विहिततारकाप्रकाशे सन्ध्यासमये सप्ताविव सोच्चश्रवणे गगने सायन्तनसमयसमुदयसञ्जनितपात्रिदोषपरिहाराय सिन्धुनेव समाबद्धेन मणिना कुक्षिलक्ष्यमाणजाक्षितक्षणदान्धकारेण प्रोद्भासमाने, विकसत्पङ्केरुह इव सुरवर्त्मपद्माकरस्य, स्फाटिकदर्पण इव दम्पतीजनलावण्यदर्शनस्य, फेनसन्दोह इव क्षणदाकलिन्दनन्दिन्याः, नन्दनीयतिलक इव पुरन्दरदिशासुन्दरवदनारविन्दस्य, भारद्वाज इव कलशोद्भवे सार्वभौम इव भासमानकरप्रकरे मनोभूसार्वभौमप्रमदाभिषेकमणिपीठाकृतौ मन्दमन्दमनुविन्दति कुमुदबन्धावुदयमविन्दतायमान्ध्रदेशम् ॥

सुधादीधितिपादानां तदा सङ्गेन पुष्करम् ।
चकासितमभूदेतच्चित्रं धात्र्यां विजृम्भते ॥ २२ ॥

करैः समालिङ्गय सरोजिनी मां
भजेति राज्ञा परिसान्त्वितापि ।
सतीमणीनां चरितं जनानां
प्रदर्शयन्ती मुकुळा बभूव ॥ २३ ॥

कुमुदं मुमुदे तदा विधोः
करसङ्गकुतूहलाद्यथा ।
प्रमदा पतिदेवता भृशं
चिरसङ्गतकान्तसङ्गमे ॥ २४ ॥

अहो खल्वेतद्देशीयजनस्य भाग्यवत्ता ।

यासां चाधरबिम्ब एव मधुरं पीयूषमास्ते मृषा
दुग्धाब्धाविति विश्ववाक्यममृतांशुश्चापि वक्त्रैर्जितः ।
जाताजातसुरोमराजिसहिताः कुम्भीन्द्रकुम्भस्तनी
रामा नायकसेवनैकनिरताः सम्प्राप्य राजन्त्यमी ॥ २५ ॥

तदनन्तरं कमलापतिकथया संसारकाननवदनायासादगणित-मृगखगगणाकीर्णानि धरणीधरकटककाननानि केलीलालससारसकुल-धवलच्छदनिलयायितकमलानि विमलानि अनिलचालितनीलोत्पल-कुलानि कूलविलसितघनफलितवञ्जुलमधुलुब्धलालसमालतीमुखल-तासंवेष्टितनगमालोल्लसितान्यतिक्रम्य च तटिनीतटाकादीनि सानुगः समवलोकितमृगराजगिरिः समाजगाम सप्तगोदावरं स हि महा-नुभावः ॥

ततः स्थित्वा दिनानि सप्त स्नात्वा त्रिषवणं तत्र कृताह्निकः समधिगत्य रामभद्रालयं भद्राचलं भक्तवत्सलं सानुजं जानकीजानिं सम्प्रणम्य पुनः पुनः सप्रदक्षिणं वस्त्वा स तत्र कतिचिद्दिनानि बल-मिव सकृष्णं युधिष्ठिरमिव भीमाभिभासितं कैलासमिव सत्र्यम्बक-मान्ध्रदेशमतिक्रम्य मनुसन्तानमिव सनरसिंहं काश्यपसूनुमिव महा-दोत्पादकं गन्धर्वकुलमिव कलकण्ठोल्लसितं, मानससर इव सराज-हंसं द्रामिडाचार्यमिव वकुळभूषणं गोपालसङ्घमिव वृषभावभासितं आश्रितजनमङ्गलदं मङ्गलगिरिमासाद्य समभ्यर्ययेव कृपया भक्ताय सामिविभक्तपानकधनं हिरण्यहारिणमपि महानुभावं संसेव्य नर-सिंहं संस्तूय विविधैः स्तवैः सप्रदक्षिणं सम्प्रणम्य पानकतुळसीकुसु-मादिभिः समादाय शिरसा सादरं तत्प्रसादमवगाह्य जाम्बूनदवदनां नदीं तदनु समगात् श्यामवारणधरणीधरं धरकन्यारमणसिसेविषया ॥

तदनु देशिकोऽयमुदारचरितो मुदा परमया वन्दारुवृन्दमन्दा-रमिन्दिरारमणपादारविन्दगाथामरन्दसमास्वादनसन्धृतपरमानन्दमभि-वन्द्य देवदेवं महादेवं दर्भशयनप्रदेशमिव चिरन्तनकुञ्जराशनसम-लङ्कृतं, द्वारकापुरमिव, मन्मथोल्लासितमरविन्दबन्धुमिव सप्तपत्र-स्यन्दनोपेतं, दक्षिणपारावारमिव सेतुविराजितं, सुधर्मसभान्तरमिव सदेववल्लभं, नन्दनवनमिव कुसुमितपारिजातकं, हिमानीमहीधरकटक-मिव भासमानवानप्रस्थं, अनन्तेशनिशान्तमिव तुङ्गतरमातङ्गं, त्रिदिवमिव दिवौकस्समुदायसमेतं, शनैश्चरमिव छायानन्दनं, क्रतुसङ्घातमिव सर्वतो-मुखसमुल्लासितं, कैलासमिव शङ्करप्रियभासमानं, प्रावृट्समयमिव साभ्र-

अथ आर्याप्रकरणम् ।

मात्रासमकजातिः सोपजातिरुक्ता । इदानीमार्याजातिः सोपजातिर्वक्ष्यते ।

सप्तार्धं चार्यायाः ॥ २७ ॥

गणा इति च अर्ध इति चानुवर्त्तते । अतोऽर्धे सप्त गणाः गणस्यार्धं चार्यया भवति ॥

अत्रायुक्क् न ॥ २८ ॥

अत्र पुनरार्याया अर्धे अयुग्गणः ककारो न भवति युग्गणो भवतीत्यर्थः । अत्रग्रहणमस्मिन्नार्याधिकारे विहितानां वामनिका-गीतिका-र्योगीतिकानामार्यालक्षणप्राप्त्यर्थम्[1] । तस्मात् सर्वत्रायुग्गणः ककारो न[2] भवतीत्युक्तं भवति ।

दि वा षष्ठः ॥ ९ ॥

नियमार्थं वचनम् । आर्यायाः पूर्वार्धे दकारः (नच्चरतिद्) इकारो (विभातिक्) वा भवति ।

१. 'प्रापणार्थम्' ख. ग.
२. MSS. omit this word

षष्ठादौ[1] यतिः ॥ ३० ॥

षष्ठो[2] गणो यदि दकारो भवति तदा तस्य गणस्य प्रथमाक्षरे यतिर्भवति । यथा—

आर्या प्रसन्नरूपा गृहीतशुभवेषविनयचारित्रा ।
यस्य कुलीना नारी प्रियमनुकूलमनसः श्रीमान् ॥

सप्तमपूर्वान्त्ये ॥ ३१ ॥

यदियतिरित्यनुवर्तते । यदि सप्तमो गणो दकारो भवति तस्य गणस्य यः पूर्वो गणः षष्ठः तस्यान्त्येऽक्षरे यतिर्भवति । यथा—

व्याकोशकुमुदतारकविलीनविमलेन्द्रनीलसम-
[सलिलाः ।
हंसकदम्बकचन्द्राः शरन्नलिन्यो द्युवद्भान्ति ॥

परार्धे पञ्चमश्च ॥ ३२ ॥

परार्धे पञ्चमश्च गणो यदि दकारो भवति तस्य गणस्य यः पूर्वो गणश्चतुर्थः तस्यान्त्येऽक्षरे यतिर्भवति । यथा—

दिनकरदीधितिबोधितसरसिजमकरन्दसदशनः
[शरदि ।

१. MSS. read दद्यादौ.
२. MSS. add तत्प्रथमाक्षरे before this word.

नूपुररवमनुकुर्वन् कूजति मदमुदितकलहंसः ॥

षष्ठो ह्ः ॥ ३३ ॥

आर्यायाः परार्धे षष्ठो गणो ह्कार एव केवलो भवति ।

पथ्योभयोर्निः ॥ ३४ ॥

यतिरनुवर्तते मण्डूकप्लुत्या । आर्याया उभयोरप्यर्धयोस्तृतीये गणे यतिर्भवति चेत् पथ्या नाम भवति । यथा—

चारित्रनिर्मलजलः सत्पुरुषनदोऽक्षयो भवतु नित्यम् ।
यस्य विभवारविन्दे मित्रभ्रमराः कृतविहाराः[1] ॥

विपुलान्या ॥ ३५ ॥

या पथ्यालक्षणाया आर्याया अन्या आर्या सा विपुला नाम भवति । एतदुक्तं भवति—तृतीये गणे उभयोरप्यर्धयोर्यस्या न यतिर्जाता सा विपुला नाम भवति । यथा—

मां कथय चन्द्र याचे परविषयगतस्य कान्तस्य ।
आपाण्डुरेति शिथिलेति लम्बालकेति मलिनेति ॥

द्वितीयचतुर्थौ भामध्ये चपला कः ॥ ३६ ॥

आर्याया उभयोरर्धयोर्द्वितीयश्चतुर्थश्च गणो गुरुमध्ये ककारो (विभातिक्) भवति चेत् चपला नाम भवति । यथा—

१. सुन्दरपाण्ड्यशतकम् (नीतिद्विषष्टिका)
२. MSS. interchange the two halves of the verse.

साधारणोष्णशीतः प्रचण्डवातावधूतवनविवरः ।
अवगाहते वसन्तः सकिंशुकाशोकशतपत्रः ॥

मुखचपलाद्ये ॥ ३७ ॥

आर्याया आद्येऽर्धे भामध्ये द्वितीयश्चतुर्थश्च गणः क्कारो भवति चेन्मुखचपला नाम भवति । यथा—

चित्रोतशक्रचापोच्छ्रितध्वजं जलधिनिनदपटुनिनदम् ।
दिनकरनृपतिभयंकरजलधरसैन्यं समुपयाति ॥

जघनचपलान्त्ये ॥ ३८ ॥

आर्यया अन्त्येऽर्धे द्वितीयश्चतुर्थश्च गणो भामध्ये क्कारो भवति चेत् जघनचपला नाम भवति । यथा—

धारापातैर्वाताकृष्टैर्विप्रोषितेन्दुनक्षत्रम् ।
आस्रावतीव दुःखेन तीव्रमुत्कण्ठितं व्योम ॥

वामनिकाद्ये षष्ठो ह्रः ॥ ३९ ॥

आर्याया आद्येऽप्यर्थे षष्ठो गणो लघुरेव केवलो भवति चेद् वामनिका नाम भवति । यथा —

प्रविततताराककुमुदे
गतमेघे शरदि सौम्ये च ।
चन्द्रो विभाति सम्प्रति
हंस इव नभःसरस्येषः ॥

गीतिरन्त्ये दि वा ॥ ४० ॥

आर्याया अन्त्येऽप्यर्धे षष्ठो गणो दकार इकारो वा भवति चेद् गीतिर्नाम भवति । यथा —

भ्रमदलिकुलविरुतप्रविततकमला विभान्ति कमलिन्यः ।
भासुरमरतकमणिनिभकोमलमृदुचारुवर्णसञ्छन्नाः ॥

ध्रुवोभयोर्नौ ॥ ४१ ॥

सैव गीतिश्चतुर्थे गणे यतिरुभयोरर्धयोर्भवति चेद् ध्रुवा नाम भवति । यथा —

ललनावनानि नीलालकानि ललितानि राजन्ति ।
बन्धुजीवाधराणि रतिभोगसारसहितानि[2] ॥

गीतिका सप्तमो यी वा ॥ ४२ ॥

सैव गीतिर्गीतिका नाम भवति, सप्तमो गणो यकार ईकारो वा भवति चेद् । यथा —

त्वामिह धन्यां मन्ये
विचित्रधर्मार्थकामसंश्रयासु ।
यस्य चरितं तव मनो
विद्वज्जनवल्लभासु गीतिकासु ॥

१. The first half of the verse is deficient in two matras.

२. The verse is deficient in ten matras.

क्वचित् तृतीयश्च पञ्चमोऽपि ॥ ४३ ॥

क्वचित्प्रयोगान्तरे उभयोरप्यर्धयोस्तृतीयश्च पञ्चमश्च गणो यकार ईकारो वा भवति। अपिशब्दादेकस्मिन्नप्यर्धे भवति। प्रयोगे यत्नः कार्यः।

पूर्णार्धार्यागीतिः ॥ ४४ ॥

सैव गीतिः पूर्णार्धा आर्यागीतिर्नाम भवति। यथा —

एतत्तद्भुजयुगलं मन्दर-
गिरिभित्तिघट्टिताङ्गदवलयम्।
आत्ति तुमुलसरपातितकर्म[1]
रुधिररागसम्भृतचर्म ॥

इत्यार्याप्रकरणम्।

आर्याजातिः सोपजातिरुक्ता। इदानीमन्याश्च काश्चिज्जातयो लोके प्रचरन्त्यो वक्ष्यन्ते।

प्रतिपादं पञ्चार्धं च गलितम् ॥ ४५ ॥

पञ्च गणा गणस्यार्धं च पादे पादे भवन्ति चेद् गलितं नाम भवति। यथा —

न स्मरसि किं त्वदीरितशरभासुरताना-
मटवीषु चोग्रकेसरिशिरभासुरतानाम्।

1. 'तर्म्म' for 'कर्म' क. ग.

अथवा वसन्तदृष्ट्या[1] निशातदन्तस्य
प्रातर्बाधाय शरन्निशातदन्तस्य ॥

चत्वारो निर्धायिका ॥ ४६ ॥

चत्वारो गणाः प्रतिपादं भवन्ति चेत् निर्धायिका नाम भवति ।

यी वान्त्यः ॥ ४७ ॥

अन्त्यो गणश्चतुर्णां पादानां निर्धायिकाया यकारो (कमलिनीय्) वा ईकारो (धीवराश्) वा भवति ।

क्तृतीयः ॥ ४८ ॥

तस्या निर्धायिकायाः प्रतिपादं तृतीयो गणः प्रायेण ककारो (विभातिक्) भवति । यथा—

बाले! बालेन्दुखण्डधारिणा
क्रोधाद्दग्धोऽपि मन्मथाधमः ।
सकलं लोकं हि चण्डमानसो
निशितैर्बाणैर्भिनत्ति मर्मसु ॥

पञ्च नैक्कुटकम्[2] ॥ ४९ ॥

प्रतिपादं पञ्चगणा भवन्ति चेन्नैक्कुटकं नाम भवति ।

१. 'वसन्तकस्य दृष्ट्या' क. ग.
२, ३. 'नक्कक्कुटकम्' ख., 'नकुर्कुटकम्' क.

यी वा द्वितीयतृतीयौ ॥ ५० ॥

त[2]स्यैव नक्कुटकस्य द्वितीयतृतीयगणौ यकार ईकारो वा भवति ।

तृतीयो [1]ब्वा ॥ ५१ ॥

तस्यैव न[3]क्कुटकस्य तृतीयो गणो बकारो (ते श्रीः क्वब्) वा भवति । यथा —

उपरि विधूतभस्मनिकरप्रवरसुरभित-
श्रवणभुजङ्गवक्त्रमरुता दहनकणमुचा ।
धवलितमिन्दुखण्डाकिरणैः क्षरदमृतलवैः
कपिशमयूखभिन्नतिमिरं नयनमवतु वः ॥

ई[4]दं वरं एष विजृम्भमाणः कुमुदानन्दः
स तु नवनीतपिण्डसदृशस्तिमिरविमथनः ।
रजनीकरोऽप्युपैति शनकैर्गगनं
नीलसरस इव नीलं विपुलं हंसः ॥

षडधिकाक्षरा ॥ ५२ ॥

प्रतिपादं षट् गणा भवन्ति चेदधिकाक्षरा नाम भवति ।

१. MSS. omits this sūtra.

२. ख. omits this sentence and the next sūtra.

३. 'नकुर्कुटकस्य' क.

४ This verse is defective in the number of matras.

मनोरथमिति । **अथ** अनन्तरं मलिनं मलीमसं निःश्रीकमित्यर्थः । मलिनं कृतं मलिनितं **आननं** मुखं येन तं **मनोरथं अनारतं** अश्रान्तं **धारयन् मनोः कुलोद्वहो** मनुवंशश्रेष्ठ इत्यर्थः । **सुमन्त्रस्य वचनात् मखस्य** यज्ञस्य **विधौ** विधाने । 'विधिर्विधाने दैवेऽपि' इत्यमरः । **निश्चयं दधत्** बिभ्रत् सन् **सम्बन्धिनं** शान्तया स्वसम्बन्धिनमित्यर्थः । विभण्डकस्य मुनेरपत्यं **वैभण्डकं** ऋश्यशृङ्गमित्यर्थः । **मुनिं** **समुपगम्य** सम्प्राप्य **स्वमन्दिरं** स्वगृहमुपानयन् सन् **शरणमाप** रक्षितारं प्राप । 'शरणं गृहरक्षित्रोः' इत्यमरः ॥ २ ॥

वसिष्ठेति । **स राजा तु स्वयं वसिष्ठस्य मुनेः** आज्ञायां **तिष्ठमानो** वर्तमानः । तदाज्ञां परिपालयन्नित्यर्थः । **सरय्वाः तटे अश्वमेधाख्यं अध्वरं विधिवत्** यथाविधि **व्यधत्त** कृतवान् । **प्रकृष्टानां** उत्कृष्टानां **फलानां संज्ञया** तद्बोधिकयेत्यर्थः । प्रकृष्टफलजनन्येति यावत् । **स्फुटं** ध्रुवम् , स्थितयेति शेषः । **ऋश्यशृङ्गाज्ञया** पुनरश्वमेधावसाने पुत्रेभ्यो हितया **पुत्रीयया इज्यया** इष्ट्या **अयष्ट** यजितवान् । पुत्रीयामिष्टिं कृतवानित्यर्थः ॥ ३ ॥

इदानीमेकेन श्लोकेन भगवान् दशरथपुत्रत्वेनावतरितुं मेन इत्याह —

दशास्येति । । **अशास्यः** अनियम्यः महिमा यस्य स तथा । अपरिच्छिन्नमहिमेत्यर्थः । **अखिलानां लोकानां साक्षी** सर्वद्रष्टा भवान् **दशास्येन** रावणेन **परितः पीडितान्** उपद्रुतान् **दिविषदो** देवान् **विषादैः** दुःखैः **अवशान्** विवशानपि **पुत्रीयतः** आत्मनः पुत्रमिच्छतः । 'सुप आत्मनः क्यच्' इति क्यच् । **दशरथस्य दशां** अवस्थां **तादृशीं** तथाभूतां अनिर्वचनीयामित्यर्थः च **दृशा** दृष्ट्येत्यर्थः । **स्वयमवेक्ष्य** ज्ञात्वा तव **दशरथस्य तनयतां** पुत्रत्वं **अवाप्तुं** प्राप्तुं **मनो** व्यधात् अकृत ॥ ४ ॥

प्रकृतमनुसरति — **तत इति** । **ततः** पुत्रीयेष्टिकरणानन्तरं **कनकभाजने** सुवर्णपात्रे **त्वन्मयं** त्वद्रूपं किमपि अनिर्वचनीयमित्यर्थः । **पायसं परमान्नम्** । 'परमान्नन्तु पायसम्' इत्यमरः । **दधत्** दधानः हुतेन सुवर्णक्षितेन

पूज्येत्यर्थः, **भव्या** कल्याणी **दिव्या चाकृतिः** आकारः यस्य स तथा । **अतिसुभगः** अत्यन्तसौन्दर्यशाली **सुतः** पुत्रः **भवान् असावि** प्रसूतः । **सुराणां** देवानां **मण्डली** समूहः । 'षिद्गौरादिभ्यश्च' इति ङीष् । **स्तुतिभिः पिचण्डिलानि** बृहत्कुक्षीणि **आशान्तराणि** दिगन्तराणि यस्या सा तथा । स्तुतिपूरितदिगन्तरा सतीत्यर्थः । 'बृहत्कुक्षिः पिचण्डिलः' इत्यमरः । **तुतोष** तोषितवती ॥ ८ ॥

सुतेति । **केकयेन्द्रस्य सुता** कैकेयी च **शराणां** ओषधिविशेषाणां वनम् । 'पूर्वपदात् संज्ञायामगः' इति सूत्रेण वनशब्दनकारस्य णत्वम् । **स्थली** अकृत्रिमप्रदेशः । 'जानपदकुण्डगोणस्थल' इत्यादिना ङीष् । **शरवणस्य स्थली गुहं** सेनान्यमिवेत्युपमा । 'सेनानीरग्निभूर्गुहः' इत्यमरः । तथा चोक्तं **ब्रह्माण्डपुराणे** —

"नानाविधेषु स्थानेषु रतिं प्राप महेश्वरः ।
अथ तस्यां ससर्जाग्रे वीर्यं सा सोढुमक्षमा ॥
भुव्यक्षिपत् सापि वह्नौ तारकासु स चाक्षिपत् ।
अक्षिपंस्ताश्च गङ्गायां सा वै शरवणेऽक्षिपत् ॥"

इति । **अपदानेन** पुरावृत्तेन, कीर्त्येत्यर्थः, **आश्रितम्** । 'अपदानं पुरावृत्तम्' **इत्यमरः** । कीर्तिमन्तमित्यर्थः । **सुतं सुषुवे** प्रासोष्ट । शुभेत्यपदानाश्रितमिति च पदद्वयमन्यत्रापि योज्यम् । **मागधी** सुमित्रा च **सुरशिल्पिनः** विश्वकर्मणः **सुता** अश्विनी **अश्विनौ** नासत्याविवेत्युपमा । 'नासत्यावश्विनौ दस्रौ' **इत्यमरः** । **स्वाकृती** शोभनाकारौ । **सुखिताः** सुखं प्रापिताः **सज्जना** याभ्यां तौ तथा । **उभौ सुतौ अजीजनत्** जनयामास । स्वाकृती सुखितसज्जनाविति विशेषणद्वयमन्यत्रापि योज्यम् ॥ ९ ॥

इदानीमेकेनावतारकाले जनानामानन्दमाह — **सुतेति** । **अखिलाः** सर्वे **कोसलाः** कोसलविषयवासिनो जना इत्यर्थः । **सुकृतानां** पुण्यानां **शेवधेः** निधेः 'निधिर्ना शेवधिः' **इत्यमरः** । **भूपतेर्दशरथस्य सुतोद्भवे** एव **महोत्सवे स्वस्य** धनस्य **लाभेन परिहर्षुलाः** परितोषयुक्ताः । सुतोद्भवे राजदत्तद्रव्यलाभादत्यन्तं मोदयुक्ता इत्यर्थः । यद्वा **स्वस्य** आत्मनः **लाभेन परिहर्षुलाः** आत्मानं भगवन्तं मांसमयेन चक्षुषा दृष्ट्वा निरतिशयानन्दं प्राप्ता

तस्य परमस्योत्कृष्टस्य वेधसः नियन्तुः भीमानां दस्यूनां प्रत्यर्थिनां निधने नाशे उद्यतस्य उद्युक्तस्य । 'दस्युः प्रत्यर्थिचोरयोः' इति नानार्थरत्नमाला । ते तव राम इति नाम अकृत कृतवान् ॥ ३ ॥

प्रीतीति । तव पिता दशरथः उच्चै रसो रागो यस्य स तथा सन् । प्रीत्या रञ्जिता जना येन तं भरतं कैकेयीसुतमित्यर्थः । नामतः नाम्ना भरतं आह । स्मेति शेषः । तदनु तदनन्तरं पक्ष्माणि अक्षिरोमाणि लालयत इति पक्ष्मले सान्द्रपक्ष्मणी इत्यर्थः । पक्ष्मलयोरक्ष्णोर्जिता निद्रा मुकुलीभावो येन तम् । उन्मिषिताक्षमित्यर्थः । मागधीसुतं सुमित्रासुतं नामतो लक्ष्मणञ्चाह स्म ॥ ४ ॥

नित्येति । नृपो राजा वस्तु सत्पदार्थः, ब्रह्मेत्यर्थः । तद्विदन्तीति वस्तुविदः मुनयः तेभ्योऽतिशायी वस्तुवित्तमः । वस्तुवित्तमश्चासौ वसिष्ठश्चेति वस्तुवित्तमवसिष्ठः तेन चोदितः प्रेरितः सन् । 'अतिशायने तमबिष्ठनौ' इति तमप् । एतदर्थं पूर्वश्लोकेऽपि योज्यम् । अरिवाञ्छितस्य शत्रुवाञ्छितस्य विघ्नभूतं प्रत्यूहभूतं एतदनुजं लक्ष्मणानुजं संज्ञया नाम्ना शत्रुघ्नं चाकरोत् ॥ ५ ॥

तातेति । तातमातृमुखेषु जातं सौहृदं स्नेहो येषां ते तथा तान् । प्रीत्या यो हासः तेन हृतानि लोकलोचनानि जननयनानि यैस्ते तथा तान् सोदरान् सगर्भ्यान् वो युष्मान् इह अस्मिन् राजमन्दिरे के सुरा नराश्च न ववन्दिरे । सर्वेऽपि ववन्दिर एवेत्यर्थः ॥ ६ ॥

पाणीति । पाणी च जानू च पाणिजानु तेन या गतिर्गमनं तस्यां जातं नैपुणं सामर्थ्यं येषां ते तथा । स्वैरात्मीयैः अनुभावैः अवबोधकैः मानसविकारैः कमनीया मनोहराश्चैते पावनाः पुनानाश्च तथा । 'विकारो मानसो भावोऽनुभावो भावबोधकः' इत्यमरः । स्वानुगानां स्वाश्रितानां अवने रक्षणे पराः तत्पराः । स्वेषां आत्मीयानां अनुगानैः मुदिताः सन्तुष्टाः चतुष्टये चत्वार इत्यर्थः । 'सङ्ख्याया अवयवे तयप्' इति तयप् । 'प्रथमचरम' इत्यादिना जसः कार्यं प्रति विभाषया सर्वनामसंज्ञा । तुष्ट्यै तोषाय । बभूवुरिति शेषः ॥ ७ ॥

रामभद्रेति । हे **रामभद्र** ! **भवतां** उदरेण सह वर्तत इति **सहोदरं** सजननमित्यर्थः । **प्रेम्णः** स्नेहः **समं** तुल्यं **यद्यपि** तथापि **स लक्ष्मणः** विशिष्य **त्वां असेवत** । प्रशस्ता श्रीः शोभा अस्यास्तीति **श्रीमान्** तस्यास्य **लक्ष्मणस्यानुजः** शत्रुघ्नः विशिष्य **भरतं चासेवत** ॥ ८ ॥

राजनन्दनेति । अथ अनन्तरं हे **राजनन्दन** ! त्वं **सानुजः** सन् समोदं सानन्दं यथा तथा **ओदनस्य** आहारस्य **प्राशनं** भक्षणम् । चटुं श्लाघां लालयतीति चटुलम् । श्लाघ्यमित्यर्थ. । 'अस्त्री चाटु चटु श्लाघा' **इत्यमरः** । चटुलं च तत् चेलं वस्त्रं च **चटुलचेलम्** । तस्य **शीलनं** धारणमित्यर्थः । **लिपिततेः** अक्षरपङ्क्तेः **वाचनं** कथनं **चौलं उपनयश्च आपिथ** प्रापिथ ॥ ९ ॥

सङ्गमेशेति । हे **सङ्गमेश**! **क्ष्मां** अवनिम । 'क्ष्मावनिर्मेदिनी **इत्यमरः** । **गतेन भवता निगमा** वेदाः उपवेदाः शास्त्राणि सन्त्यस्यामित्युपवेदवत् । सशास्त्रं यथा तथेत्यर्थः । **हृदि** हृदये **कृता निहिताः** । शार्ङ्गाख्यं चापं धनुर्दधातीति **शार्ङ्गचापधरः** तस्य सम्बुद्धिः । **ततः पिता त्वां कृतानि** शिक्षितानि **अस्त्राणि** येन स तथा तम् । शिक्षितधनुर्वेदमित्यर्थः । **अकरोत्** कृतवान् । त्वं **मां पाहि** पालय ॥ १८ ॥

(१)

सम्प्रत्येकेन विश्वामित्रागमनमाह— **तदन्विति** । **तदनु कुहचन समये कौशिको** विश्वामित्रो **मुनीन्द्रः** मुनिश्रेष्ठः **प्रेमयोगात्** स्नेहसङ्गत्या ।

'योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु ।'

इत्यमरः । **आत्मजान्** तनयान् **ईक्षमाणं** पश्यन्तं अत एव **बहिः** बाह्ये **दृशि** नेत्रे **अन्तरान्तरे** हृदि च **तादृशमनुपममित्यर्थः** । **तनयसौख्यं** पुत्रसुखं प्राप्तवन्तं **दशरथधरणीन्द्रं** दशरथराजं **द्रष्टुं** कामोऽस्तीति तथा सन् '**तुं** काममनसोरपि' इति मकारलोपः । **अगात्** प्रापत् ॥ १ ॥

अवहितेति । **अवहिता** सावधाना **मतिर्बुद्धिर्यस्य** तेन **अनेन** दशरथेन **आदरात् अर्च्यमानः** पूज्यमानः **तव हितवचनाद्यैः तर्पितः** तृप्तिं प्रापितः ।

त्वया हितवचनादिभिः तृप्तिं प्रापित इत्यर्थः । **पृच्छ्यमानः** आगमनकारणादिकमिति शेषः । **स** विश्वामित्रश्च **सदसि** सभायां **स्वक्रतुत्राणहेतोः** स्वयागरक्षायै इत्यर्थः । 'षष्ठी हेतुप्रयोगे' इति षष्ठी । **ससहजस्य** सानुजस्य सलक्ष्मणस्येत्यर्थः । **तव स्वेनात्मना साकं** सह । 'हि हेतावब धारणे' इत्यमरः । **ययाचे** याचितवान् ॥ २ ॥

सुतेति । **सोढुमशक्यं सुतविरहं** आलोच्य विचार्य **मूढे** विवेकशून्ये **भूपे** राजनि **बहु कथयति** । याच्ञाप्रतिबन्धमिति शेषः । **कौशिके** विश्वामित्रे **जातकोपे** क्रुद्धे **वासिष्ठे** हितं श्रेयस्करं वचो यस्य तस्मिन् सति **ह्रीतस्य** लज्जितस्य **तातस्य** दशरथस्य **अनुमत्या** सम्मत्या **सानुजः चापी** धानुष्कः **त्वं तं** तापसं तपस्विनं विश्वामित्रमित्यर्थः । **अनुययिथ** अन्वगाः ॥ ३ ॥

प्रतिकलेति । हे **रघुवर**! तदा **पौरनार्यः** पुरस्त्रियः प्रतिकलं कलायां कलायां वलितसहितं आस्यं यस्य स तथा तम् । सकलकलाजातवार्धक्यमित्यर्थः । सकलकलाकृतसम्यक्परिचयमिति यावत् । **प्रेक्षमाणं** प्रकर्षेण विलोकयन्तं **मुनीन्द्रं** विश्वामित्रं **सविनयं** यथा तथा **अनुयान्तं** अनुगच्छन्तं त्वां उपरि ऊर्ध्वं **सौधानां** राजसदनानां **व्रातस्य** समूहस्य **वातायनेषु** गवाक्षेषु तिष्ठन्तीति तथा सत्यः । 'सौधोऽस्त्री राजसदनम्' **इत्यमरः** । 'वातायनं गवाक्षः स्याद्' इति च । **लाजैः** किंतु **कीर्तिरेव वल्ली** तस्याः **बीजैः नु** । धावल्येन वर्ध्यमानायाः कीर्तेः बीजानामपि धावल्यात् सन्देहो जात इत्यर्थः । **ववृषुः** वृष्टिं चक्रुः । एतल्लाजवर्षणमविलम्बेन कीर्तिजनकमभूदिति भावः ॥ ४ ॥

भुवीति । **ये भाविते** सृष्टे । त्वयेति शेषः । अन्नं च पानं च अन्नपानं तस्मिन् निमित्ते विहितो जातो बहुर्विभेदो यस्य तत्तथा । **तत् भूतजातं** प्राणिसमूहं **विगुणयतः** विगतगुणं कुरुतः नाशयत इत्यर्थः । तत्करोत्यर्थे णिच् । **पथि** मार्गे **वां** युवयोः **एते** क्षुत् च पिपासा च **क्षुत्पिपासे शमयितुं** नाशयितुं **मुनि**र्विश्वामित्रः **बलाख्यां अतिबलाख्यां च द्वे विद्ये अदिशत्** दत्तवान् ॥ ५ ॥

प्रियसखेति। प्रियसखश्चासौ जनकेन्द्रश्चेति तथा तस्य प्रीतये। प्रस्थितः, मिथिलां प्रतीति शेषः। अनुत्तानं गम्भीरं चेतो यस्य स तथा।

'निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये'

इत्यमरः। स विश्वामित्रस्तु अनुजेन लक्ष्मणेन नुत्तं प्रेरितं त्वां अनयत् प्रापयत्। अनेकैः तापसैः तपस्विभिः अपि सकुतुकं सकौतुकं यथा तथा अनुयातः स त्वं मम चेतः सुखय सुखं प्रापय॥ १०॥

(७)

यात्वेति। दूरं यात्वा गत्वा निशि रात्रौ कौशिकात् विश्वामित्रात् तस्या गङ्गायाः प्रसूतिं उत्पत्तिं निशमयन् आकर्णयन् शोणं शोणाख्यं नदमित्यर्थः। तीर्त्वा सन्तीर्य त्रिदशतटिन्याः गङ्गायाः सीम्नि तीरे।

'सीमसीमे इमे क्षेत्रे कूकमर्यादयोरपि'

इति नानार्थरत्नमाला। विशालां विशालाख्यां नगरीमित्यर्थः। पश्यन् आलोकयन् तस्यां विशालायां सुमतिनाम्नो नृपतेः राज्ञः आदरः श्रद्धातिशयः तेन सह वर्तत इति सादरां; अतिथौ साधुरातिथेयी, अतिथिविषयः सत्कार इत्यर्थः, ताम्। 'पथ्यतिथिवसतिस्वपतेर्ढञ्' इति ढञि 'यस्येति च' इति लोपे 'तद्धितेष्वचामादेः' इत्यादिवृद्धौ आतिथेय इति रूपात् 'शार्ङ्गरवाद्यञो ङीन्' इति ङीन्। आप्त्वा लब्ध्वा। गौतमो नाम ऋषिः तस्य सम्बन्धि गौतमीयं विजनं जनरहितं आश्रमं उपगम्य विस्मेरः सविस्मयोऽभूः॥ १॥

कस्येति। प्रशस्तो भगो माहात्म्यमस्तीति भगवान् तस्य सम्बुद्धिः।

'भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु'

इत्यमरः। प्रशंसायां मतुप्। इह अस्मिन् प्रदेशे पूर्वं भूतः भूतपूर्वः। 'भूतपूर्वे चरट्' इति निर्देशात्। पूर्वशब्दस्य परनिपातः। आश्रमः कस्येति कथय। अयमाश्रमः कस्माद्धेतोर्विजनोऽजनि जात इति वा त्वया पृष्टः अमलश्रीगाधेरात्मजो विश्वामित्रः अथ अनन्तरं आदेरारभ्य अकस्माद्भवं आकस्मिकं निष्कारणमित्यर्थः। अतिमहदहल्येन्द्रयोः साहसिक्यं साहसिकत्वं एवं आह स्म उक्तवान्॥ २॥

पुत्रीति । सरसिजभुवो ब्रह्मणः अतुल्या अहल्येति काचित् पुत्री जाता । गौतमाख्यः तापसः तया अहल्यया सत्री यागवान् पुत्री पुत्रवान् समजनि जातः । अहल्यां पत्नीत्वेन स्वीकृतवानित्यर्थः । सुत्रामा इन्द्रः तां अहल्यां अली भृङ्गः सुमनसं पुष्पविशेषमिवेत्युपमा । उपभुज्य । एतेन सुकरत्वं द्योत्यते । अपयातः अपगतः । तापसो गौतमः पत्नीं शतमखं इन्द्रं अपि शप्त्वा अस्मात् आश्रमात् प्रावसत् दूरस्थितिमकरोदित्यर्थः ॥ ३ ॥

इदानीमेकेनेन्द्रसाहसिक्यमाह—वृष्ण इन्द्रस्य जातं वृषणपतनं मुष्काभावः मेषस्य अजस्य मुष्को वृषणो यस्य स तथा तस्य भावः । 'मुष्कोऽण्डकोशो वृषणः' इत्यमरः । जन्ये युद्धे धृष्णोः प्रगल्भात् दशमुखसुतात् रावणपुत्रात् । मेघनादादित्यर्थः । बन्धनञ्च स्मर । एतत् सर्वं विचारयेत्यर्थः । अहल्या अबला गौतमस्योक्त्या गिरा कस्याप्यक्ष्णोर्नयनयोः अविषयतनुः । केनाप्यदृश्यमूर्तिरित्यर्थः । वातं वायुं भुङ्क्त इति वातभुक् सती स्वमकं स्वदोषं तक्ष्णोति तनूकरोति । तत्याजेत्यर्थः । कल्या निरामया सती । 'निरामयः कल्य उल्लाघः' इत्यमरः । अश्म शिलारूपमित्यर्थः । न तक्ष्णोति ॥ ४ ॥

अस्मिन्निति । गौतमेन अस्मिन् काले यत् घटते सम्भवतीत्यर्थः । तत् पुरा पूर्वं बुद्ध्या वीक्ष्य दिव्यज्ञानेन ज्ञात्वेत्यर्थः । त्वत्सान्निध्यात् त्वत्सामीप्यात्, त्वत्स्पर्शादित्यर्थः । विपदः आपदः, शापस्येत्यर्थः, उपरतिः उपरमः, मोचनमित्यर्थः, उदिता उक्ता । भो राम ! बत् तस्मात् कारणात् तस्याः अहल्यायाः तादृशीं विपदं क्षपय नाशय । यस्याः विपदः सामर्थ्यात् जनकहृदयेन जनकमनसा श्लाघनीयया प्रशंसनीयया जनकपुत्र्येत्यर्थः । ईहितः स्पृहितः स्याः भवेः । शापमोक्षश्रवणात् त्वयि सीताया अत्यन्तं स्पृहा स्यादिति भावः ॥ ५ ॥

आज्ञामिति । मुनिजनैः मानितः सानुजन्मा सानुजस्त्वं आर्द्राक्षराणि मृद्वक्षराणीत्यर्थः, गुरूणि गौरवयुक्तानि, बह्वर्थानीत्यर्थः, पदानि यस्यां तां वैश्वामित्रीं विश्वामित्रसम्बन्धिनीं आज्ञां आज्ञावचनं आस्थया आदरेण शीर्ष्णा मूर्ध्ना आदाय मलयगिरिजः चन्दनाद्रिजातः मातरिश्वा वायुरिवेत्युपमा । अनेन सकलजनसुखकरत्वं सूचितम् । मन्दं मन्दं गत्वा

द्रुहिणतनयां ब्रह्मपुत्रीं देवीं अहल्यामित्यर्थः । आरात् समीपे । 'आराद्दूरसमीपयोः' इत्यमरः। दृष्ट्वा दीर्घं यथा तथा । साष्टाङ्गपातमित्यर्थः । अनंसीः अनमः ॥ ६ ॥

सारमिति । अरुन्धत्या वसिष्ठपत्न्या सदृक् सदृशा धातुः ब्रह्मणः शिल्पं सृष्टिनैपुण्यं स्वरूपं यस्याः सा तथा। अत्यन्तं सौन्दर्यादिगुणशालिनीत्यर्थः । स्वकृततपसां स्वार्जिततपसां सारं स्थिरांशम् । 'सारो बले स्थिरांशे च'इत्यमरः। धृत्वा एतदेव मत्कृततपसां सार इति विचार्येत्यर्थः। ते आतिथेयीं अतिथियोग्यां अपचितिं पूजाम् । 'पूजा नमस्यापचितिः' इत्यमरः । अतनोत् अकृत । स्वैरं यथा तथा ससुखमित्यर्थः तत्क्षण एव उपागतेन समीपं प्राप्तेन भर्त्रा गौतमेन मिलिता सहिता मथितजलधेः मर्दितसमुद्रस्य अम्भसः जलात् उत्थिता उत्पन्ना अच्युतेन मिलिता श्रीरिवेत्युपमा । तादृशसुषमाशालिनीत्यर्थः । व्यजनि जाता ॥ ७ ॥

त्वत्पादेति । अदृश्रुते अल्पेतरस्मिन् अनल्पे त्वत्पादाब्जद्वितयमहिमनि त्वत्पादसरोजयुगमाहात्म्ये अभ्यायातैः अभ्यागतैः अपरैः अन्यैः मुनिभिः निर्भरं भृशं जल्प्यमाने कथ्यमाने सति गौतमः तव च एवं सती चासौ भार्या चेति सद्भार्या भविता भविष्यतीति त्वां अब्रवीत् अवोचत्। तदानीं तत्काले अमिता अनल्पा पुष्पवृष्टिः अभ्रात् आकाशात् उर्व्यां भूमौ अपतत् पपात ॥ ८ ॥

आपृच्छ्येति । कौशिको विश्वामित्रः मुनिभिः परिवृतं आवीतं अमुं गौतमं आपृच्छ्य आमन्त्र्य कवयतीति कविः काव्यकर्ता चाटुश्लोकौ श्लाघारूपपद्ये इवेत्युपमा । अनेनादरातिशयो द्योत्यते । स्फुरन्तौ प्रकाशमानौ वां युवां नर्म यथा तथा श्रावयिष्यन् श्रावयितुमिच्छन् , जनकमिति शेषः , सन् आत्मभूलोकतुल्यां सत्यलोकसदृशामित्यर्थः । अनेन सकलसम्पत्समृद्धिर्द्योत्यते। मिथिलां जनकराजधानीं अलोकयत अपश्यत् । अथ अनन्तरं भूपो जनकश्च प्रचुरकुतुकः सन् युष्मान् प्रत्युदेति स्म प्रत्युज्जगाम ॥ ९ ॥

सत्कृत्येति । कमन्यः पौरस्त्रियः रथ्याया मार्गस्य मध्ये मध्येरथ्यम् । 'पारे मध्ये षष्ठ्या वा' इति समासः । मुनिना विश्वामित्रेण च सह सत्कृत्य सादरं यथा तथा नीयमानौ, जनकेनेत्यर्थः । वां उभौ मधुमनसिजौ वसन्तकामौ मेनिरे । 'चैत्रवसन्तमधुद्रुमदैत्यविशेषेषु पुंसि मधुशब्दः' इति नानाथ-

रत्नमाला। आत्तानन्दो जनकनृपतिः मूर्तौ मूर्तिमन्तौ सत्यधर्मौ। गम्योत्प्रेक्षेयम्। मूर्तौ सत्यधर्माविव स्थिताविव्यर्थः। वां आर्चयत् अपूजयत्। तौ युवां मादृशां मद्विधानां मुदं अतिशयेन दत्त इति तथा सन्तौ स्तं भवतम्॥ १० ॥

(८)

तत इति। शतानन्दो नाम ऋषिः पुरोहितो यस्य स तथा नृपो जनकः मुनिं विश्वामित्रं सभां उपानीय ततो विश्वामित्रात् श्रुतैः त्वच्चरितैः मुदश्रुमान् आनन्दाश्रुमान् सन् मिथः अन्योन्यं कथाभिः दिनं अत्यवाहयत् निनायेत्यर्थः। 'वह प्रापणे' इति धातोर्लङ्॥ १ ॥

परेद्यवीति। परेद्यवि परेऽह्नि 'परे त्वह्नि परेद्यवि' इत्यमरः। तव गुणान् शंसितुं शीलमस्येति त्वद्गुणशंसी। त्वद्गुणशंसी चासौ कौशिकश्चेति तथा। तस्य प्रिये उद्यत उद्युक्तोऽसौ जनकः सकिङ्करैः सभृत्यैः सचिवैः मन्त्रिभिः परार्घ्यं श्रेष्ठं जामातृपणं दुहितृपतिमूल्यम्। तत्कर्तृकमूल्यमित्यर्थः। 'जामाता दुहितुः पतिः', 'पणो मूल्ये धनेऽपि च' इति चामरः। अधिरोपणं यस्य तत्तथा। ईश्वरस्य कार्मुकं धनुः पुरः अग्रे समानानयत् आनीतवान्॥ २ ॥

श्रमेणेति। श्रमेण सह उमेशतः शिवात् लब्धं गुणाधिरोपणं मौर्व्यारोपणं यस्य तत्तथा। सुमेरोः सार इव सारो यस्य तत्तथा। सत् समीचीनं परमुत्कृष्टं पुरत्रयस्योच्छेदे नाशे परिच्छदमुपकरणं इषुमत् सशरं अच्युतेन नारायणेन अर्चितं पूजितं यत् धनुः चापं पुरे जनकमन्दिरे, अस्तीति शेषः। तदिति पूर्वेण सम्बन्धः॥ ३ ॥

तदिच्छयेति। त्वं जनेषु पश्यत्सु इच्छया यदृच्छया दैवेच्छया इवेत्युपमा। गुरोर्विश्वामित्रस्य अनुज्ञया निविश्य प्राप्य इष्टं तत् धनुः अविमृश्य अविचार्य तोलयन् उत्क्षिपन्। यत्नं भजतीति यत्नभाक् स न भवतीति अयत्नभाक् सन् अधिज्यं सज्यं आधाय कृत्वा चकर्षिथ कर्षितवान् अभूः॥ ४ ॥

प्रहृष्यतीति। प्रेक्षकाणां द्रष्टृणां मर्त्यानां जनानां मण्डले प्रहृष्यति सन्तुष्यति सति गुणे मौर्व्यां विकृष्य श्रवणान्तिकं श्रवणसमीपं नीते प्रापिते सति। त्वयेति शेषः। तत् धनुः अञ्जसा शीघ्रं सुखं दुःखेन

श्रोतुं शक्यं सुदुःश्रवं उच्चध्वनितं उन्नतशब्दं, सुदुःश्रवं च तत् उच्चध्वनितं च सुदुःश्रवोच्चध्वनितं तस्य प्रतिश्रुत्या प्रतिध्वनिना प्रवेश्यं प्राप्यं विश्वं यस्मिन् कर्मणि तत् तथा । अभञ्जत भङ्गमापत् ॥ ५ ॥

विदेहेति । विदेहस्य जनकस्य कैवल्यस्य श्रेयसः निधानं निधिः निधानभूता देवतेत्यर्थः । यद्वा विदेहानां तन्नामजनपदानां तद्वासिनां जनाना मित्यर्थः । कैवल्यस्य श्रेयसः निधानदेवता । विगतो देहो यस्य स विदेह-काम इत्यर्थः, तस्य कैवल्यस्य निधानदेवतेति वा । रजस्पदं तमसोऽप्यु-पलक्षणम् । राजसी रजस्तमोगुणप्रधाना, सा न भवतीत्यराजसी । सत्वगुण-प्रधानेत्यर्थः । विदेहराजस्य सुता सीता मुत् प्रीतिरेवैकवाराशिः मुख्यसमुद्र-तस्मिन् विगाहिनी स्नायिनी सती चिरात् चिरकालं शेमुषीं धियम् । 'धीः प्रज्ञा शेमुषी मतिः' इत्यमरः । विवाहसन्नाहं विवाहोत्साहं उवाह प्रापयत् । 'वह प्रापणे' इति धातोर्लिट् ॥ ६ ॥

प्रकल्पितेति । अथ प्रकल्पितेन प्रकर्षेणाहितेन आकल्पेन वेषेण । 'आकल्पवेषौ नेपथ्ये' इत्यमरः । समुज्ज्वला सम्यक् प्रकाशमाना आकृति-राकारो यस्याः सा तथा । प्रगल्भैः प्रौढैः धात्रीसवयोजनैः उपमातृसमान-वयोजनैः आवृता परिवृता अगर्भजा अयोनिजेत्यर्थः । मैथिली जगत-प्रकाशानि जगत्प्रसिद्धानि अद्भुतानि चेष्टितानि यस्य स तथा । तं त्वां पतिं भर्तारं अवृत अवृणोत् ॥ ७ ॥

जवेति । शतक्रतोः इन्द्रस्य सखा दशरथ इत्यर्थः । जवेन वेगवत आप्तेन निपुणेन वार्ताहरेण दूतेन गीतस्य उक्तस्य वास्तवस्य परमार्थस्य श्रवात् श्रवणात् सुताभ्यां भरतशत्रुघ्नाभ्यां आचार्येण वसिष्ठेन च युतो युक्तः सन् समाप्ताः भूयिष्ठाः महान्तः क्रतवो येन स तथा तस्य निमीनामीशितुः ईशस्य जनकस्येत्यर्थः, पुरीं आशु अवाप्तवान् प्राप्तवान् ॥ ८ ॥

शुभेति । शुभे अह्नि सुलग्ने शोभनराश्युदये । 'राशीनामुदयो लग्नम्' इत्यमरः । यथा सीतामुपयमयथाः परिणीतवान् भवान् तथा भरतो माण्डवीं च । अथ सुमित्रातनयौ लक्ष्मणशत्रुघ्नौ ऊर्मिलां च श्रुतकीर्ति-मपि उभे उदूहतुः परिणीतवन्तौ ॥ ९ ॥

कृतेति । अथ **कृतेन प्रतीकारेण** प्रतिक्रियया **कृतार्थं मानसं** मनो यस्य स तथा तस्मिन् **कौशिके** विश्वामित्रे **यथेष्टं आपृच्छ्य** आमन्त्र्य **गते** सति **प्रतीताभ्यां** विश्वस्ताभ्यां **तातश्वशुराभ्यां** दशरथजनकाभ्यां **अनुमोदितः** त्वं प्रसीद ॥ १० ॥

(९)

प्रस्थानिति । अथ **मिथिलाधिपेन** जनकेन **चतसृणां सुतानां** पुत्रीणां **प्रस्थान्** मानपरिमितानित्यर्थः । 'प्रस्थोऽस्त्री सानुमानयोः' **इत्यमरः** । **बहून् मणीन्** रत्नानि प्रचुरं प्रभूतं हेम स्वर्णम् । **हस्तिनो** गजाश्च अश्वाश्च पत्तयो रथाश्च **हस्त्यश्वपत्तिरथम्** । 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इत्येकवद्भावः । **अप्रतिमा** अनुपमाः **दासीः धनं** च **दत्वा ससुतः दशरथः प्रस्थापितः** ॥ १ ॥

सेनेति । **घनेषु** मेघेष्विव **सेनारजस्सु** सैन्यपरागेषु । 'उपमितं व्याघ्रादिभिः' इत्यादिना समासः । **तटिद्गुणाः** तटिद्गुल्य इव **वेत्रिवेत्राः** संविदल्लयष्टिविशेषाः **तैर्नानानकानां** नानापटहानां **ध्वनिभिः शब्दैश्च** हेतुभिः **नटन्त्यो वलभीमयूर्यो** गृहावयवविशेषस्थितबर्हिणाङ्गना यस्यां सा तथोक्ता । **तस्यां** मिथिलानगर्यां **सुभ्रुवां** सुन्दरीणां सीताद्यानामित्यर्थः । **वशामधीनां सुमहितां** सुतरां पूजितां **जनतां** जनसमूहम् । 'ग्रामजनबन्धुसहायेभ्यस्तल्' इति तल् प्रत्ययः । **विकर्षन्** नयन्नित्यर्थः । **महः** उत्सवः । महोऽस्यास्तीति **मही** । 'मह उद्धव उत्सवः' **इत्यमरः** । त्वं **बहु** यथा तथा **बभ्राजिषे** नितरां रेजिष इत्यर्थः ॥ २ ॥

उद्वाहेति ॥ **उद्वाहवेषैः** विवाहाकल्पैः **विलसन्ति** प्रकाशमानानि **वपूंषि** शरीराणि येषां ते तथा तान् **सद्विवाहनैः** गजतुरगादिभिः **आवृतिं** आवरणं **जुषान्ति** श्रयन्तीति तथा तान् **सुतान् वः** युष्मान् **स्नुषाः** पुत्रभार्याश्च । पूर्वोक्तविशेषणद्वयमत्रापि योज्यम् । **निकषा** समीपे **चरता** युष्माकं **स्नुषाणां** च समीपे सञ्चरतेत्यर्थः । 'अभितः परितः समया निकषा' इत्यादिना द्वितीया । **मृदा** मृत्तिकया । रजोरूपयेत्यर्थः । **वासितेन** आच्छादितेन । 'वस आच्छादने' इति धातोः कर्मणि (क्तः) ।

× × × ×

'(छात्रान्तेवा)सिनौ शिष्ये' इत्यमरः । अपि मयि इह अस्मिन् प्रदेशे वसति तिष्ठति सति पुरां हन्तुः परमेश्वरस्य महितं पूजितं शरासं धनुः अशङ्कं निस्संशयं यथा तथा दलितवान् खण्डितवान् । भवानिति शेषः । त्वं क्वनु अन्तर्हितः तिरोहितः सन् जिजीविषसि जीवितुमिच्छसि इत्येवं वाग्भिः वचनैः सन्ताडयन् सम्यक् प्रहरन् स भृगुपतिः भार्गवः भवन्तं आप प्रापत् ॥ ७ ॥

सत्त्वेति । सत्त्वेन बलेन अधिकः उत्कृष्टः अपि भवान् विनयं विवृण्वन् आविष्कुर्वन् नत्वा गिरां वाचां उचितं उत्तरं ईरयित्वा उक्त्वा क्रुद्धात् ततः भार्गवात् सपदि दिव्यधनुः दिव्यचापं गृहीत्वा तत्र तस्मिन् प्रदेशे सोढुं शक्यं सह्यं धाम तेजो यस्य सः सह्यधामा, स न भवतीत्यसह्यधामा सन् युद्धाय युद्धं कर्तुम् । 'क्रियार्थोपपद' इत्यादिना चतुर्थी । समनह्यत् केशवसनादिकं बबन्धेत्यर्थः । 'णह बन्धने' इति धातोर्लङ् ॥ ८ ॥

शान्तेति । ततः तव सायकेन शरेण शान्ते निवृत्तरोषे भृगुपतौ भार्गवे तावत् स्वां ऊर्ध्वगतिं आशु अनुरुध्य अनुसृत्य याते गते सति तदानीं कान्ता जहर्ष हर्षितवती । पितरौ मातापितरौ । 'पिता मात्रा' इत्येकशेषः । जहृषतुः । भिया क्लान्ता क्लमं प्राप्ता पृतना सेना जनाश्च जहृषुः । क्लान्ता भियेति च पदद्वयं वचनविपरिणामेन सर्वत्र योजनीयम् ॥ ९ ॥

लोकेति । यः त्वं लोकोपकारि निहितं न्यस्तं त्वयेत्यर्थः । स्वं आत्मीयं धाम तेजः मुनिपुङ्गवात् भार्गवात् आकृष्य गृहीत्वेत्यर्थः । भानुमान् सूर्यः स्वं धाम दहनात् वह्नेः आकृष्य द्यां आकाशमिवेत्युपमा । तथा चोक्तं रघुवंशे—

"स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥"

इति । आघोषितैरावघोषैः दिग्भिमान् बधिरयन् बधिरान् कुर्वन् अयोध्यां अगाः । स त्वं शोकात् परिपाहि परिपालय ॥ १० ॥

(१०)

गन्त्वेति । प्रशस्ता मातरः सन्त्येषामिति मातृमन्तः । प्रशंसायां मतुप् । सकान्ताः सप्रियाः भवन्तः प्रकर्षेण कुप्यतः कोपं गच्छतः भृगुपतेः

The Ms. looks very old and its sides have become discoloured on account of dirt. Worms have also injured the Ms. slightly. The numbering of the folio begins with 171. Folio 233 is missing. The letters on the first 119 folios are very small and compact. These folios contain eleven lines on every page. With all these differences between these two styles, it cannot be definitely said that two different hands did the copying of the Ms. At the end is seen '*Seṣan svahastalikhitam*' *i. e.*, the Ms. was copied by one Śeṣan. In continuation is written '*Jayanāma saṁvatsare kārtika nāḷe susinadu*' in Telugu characters. The folios are numbered. The numbers 265 and 276 are repeated. The folios after 365 are wrongly numbered. The first folio is numbered 171 and the last 380. So it is clear that the first portion of the Ms. is missing. Corrections are seen here and there on the margin (see folios 290, 376-9 etc.) The Ms. contains 139-299 chapters parallel to 139-315 in K. Ed. The colophons sporadically mention

102. B. O. R. I. Ed. 3. 138. 18;
103. Ibid, 3. 298. 28.

the name of the work, parvan, anuparvan and number of the adhyāya.

61. No. 156. Begins with 3. 172. 5[104] and ends with 3. 281. 1[105]. Grantha characters ; palm-leaf – $17\frac{3}{4}''$ × $1\frac{1}{2}''$; folios 93 ; lines—11 ; letters—66.

The Ms. is a very old one and is considerably injured. The writing on most of the folios is mutilated and erasured to a certain extent, but it is legible. The handwriting is steady. On folios 50 and 76 additions are made on the margin by a later hand. The serial number is seen only in a very few folios due to the damage caused to the Ms. The Ms. has 171-268 chapters (see colophon on folio 1b – *Ityāraṇyake ekasaptatitamo'dhyāyaḥ* and 93b – *saptaṣaṣṭidviśatatamo'dhyāyaḥ*) parallel to 172—281 chapters in the K. Ed. The colophons are not uniform. They usually give the name of parvan and number of adhyāya, but occasionally add the name of the upākhyāna also.

62. No. 1242. Begins with 3. 219. 1[106] and ends with 3. 284. 30ab.[107] Malayalam characters ; palm-leaf – 18″ × 2″ ; folios—45 ; lines—10 ; letters—68.

The Ms. is very old and damaged to a considerable extent. The first and the last folios are broken. The portion containing the benedictory passage is worn out. There are a few frangible folios in the middle also. The writing is bold, beautiful, legible and of uniform style. Black pigment is not applied to illumine the writing. There are no corrections or scratchings. The folios are numbered by *akṣaras*. The Ms. contains 209-271 chapters corresponding to 219-284 chapters in K. Ed. The colophons give parvan, upākhyāna and chapter.

---

104. B. O. R. I. Ed. 3. 167. 5.
105. Ibid, 3. 264. 1.
106. Ibid, 3. 206. 1.
107. Ibid, 3. 267. 30ab.

Licence No. 644 dated 9-3-1949.

VOL. V. NO. 2 APRIL 1949

JOURNAL

OF THE

TRAVANCORE UNIVERSITY ORIENTAL MANUSCRIPTS LIBRARY

TRIVANDRUM



[Annual Subscription Rs. 4]

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1949

CONTENTS

जनैरिति शेषः । किञ्च शिष्टोऽवशेषितो गात्रस्य त्रिभागो भागत्रयं यस्य तथा सन् दृष्टः । गात्रदैर्घ्येण चतुर्धा विभक्ते सत्येकपादांशमेवैतस्मिन्नद्रौ वेष्टित इत्यर्थः ॥ ३१ ॥

पुच्छाकृष्टौ ह्रीमतः पूर्वदेवान्
पूर्वं तस्य प्राहिणोत् पूर्वकाये ।
शिष्टानिष्टान् शिष्टभागे च विष्णुः
स्वेच्छावाप्तिस्मेरवक्त्रारविन्दः ॥ ३२ ॥

पुच्छेति । विष्णुर्भगवान् पूर्वं प्रथमं तावत् पुच्छाकृष्टौ वासुकेः पुच्छभागं गृहीत्वा क्रष्टुं ह्रीमतो लज्जया पराङ्मुखान् पूर्वदेवान् दैत्यान् । वयं हि चिरन्तनदेवास्तादृशामस्माकमस्य पुच्छाकर्षणं महत लाघवायेति ततो निवृत्तानित्यर्थः । तस्य वासुकेः पूर्वकाये शिरोभागे ततोऽवशिष्टे पुच्छभागे (देवान्) च प्राहिणोत् । कीदृशः । स्वेच्छाया निजाभिलषितस्यावाप्त्या लाभेन स्मेरं स्मयनशीलं वक्त्रारविन्दं यस्य तथा सन्निति सम्बन्धः । वासुकिवक्त्राद्विषोद्गारो भविष्यति, तेनेमे देवाः पनरा मा भूवन्निति कृत्वा पूर्वकायादपवाहनमभिमतमेवेति भावः ॥ ३२ ॥

द्राघिष्ठं तं पन्नगप्रष्ठपाशं
व्याकर्षन्तः शैलपृष्ठावनद्धम् ।
क्षिप्रं तावत् क्षिप्तसर्वौषधिं ते
क्षीराम्भोधिं देवदैत्या ममन्थुः ॥ ३३ ॥

द्राघिष्ठम् इति । ते सम्मिलिता देवदैत्या देवासुरा वासुकेः पुच्छभागे पूर्वकाये च नियुक्ताः शैलपृष्ठे मन्दरमध्ये अवनद्धं बद्धं द्राघिष्ठं दीर्घतरं तं; पन्नगप्रष्ठो वासुकिस्तद्रूपं पाशं व्याकर्षन्तः (व्याक्षेपं) कुर्वन्तः सन्तः, तावत्तदानीं क्षिप्ता निहिता सर्वौषधयो यस्मिंस्तथाभूतं क्षीराम्भोधिं ममन्थुः मथितवन्तः ॥ ३३ ॥

मङ्क्षु भ्राम्यन् मन्दराघूर्णितार्ण-
स्तूर्णोद्गीर्णस्फीतफेनाट्टहासः ।
क्रोधान्नु स्वं मथ्नतो वीचिहस्तै-
राहन्ति स्म क्षीरधिस्तीरलग्नी ॥ ३४ ॥

मङ्क्षिवति । क्षीराणि धीयन्तेऽस्मिन्निति क्षीरधिः क्षीराब्धिः मङ्क्षु क्षिप्रं भ्राम्य(तः?न्) पाशाकर्षणाद् द्रुततरं भ्रममाणस्य मन्दरस्यास्फालनेन तद्वदेव भ्रमन् जनितावर्त इत्यर्थः । अत एव तीरं लङ्घितुमतिक्रमितुं शीलमस्येति तीरलङ्घी । मन्दरेणाघूर्णितेभ्यश्चलितेभ्यो जलेभ्यस्तूर्णं त्वरितं उद्गीर्णा उद्गता स्फीताः प्रवृद्धाः फेना एवाट्टहासः प्रहासो यस्य तथा सन् वीचिहस्तैस्तरङ्गैरेव हस्तैः । स्वमात्मानं मथ्नतो देवासुरानाहन्ति स्म जघान । अत्रोत्प्रेक्षते । क्रोधान्विति वितर्के । उत्प्रेक्षाद्योतकोऽव्ययं निपातः । स्वमथनमसहमानोऽब्धिः सक्रोधाट्टहासः स्वहस्तैः स्वमाथकान् प्राहरदिवेत्युत्प्रेक्षा ॥ ३४ ॥

भूयोभूयस्ताड्यमानस्तरङ्गै-
धातुव्याजादुद्वमन् रक्तपूरम् ।
वाताध्मातप्रध्वनत्कन्दरत्वा-
च्चक्रन्देव स्पन्दवान् मन्दराद्रिः ॥ ३५ ॥

भूय इति । तरङ्गैः वीचिभिः करणैः भूयोभूयः पुनःपुनरपि ताड्यमान आहन्यमानः क्षीराब्धिनेति शेषः । स्पन्दवांश्चलनवान् मन्दराद्रिर्वातैर्जलपवनैराध्मातानि पूरितानि अत एव प्रध्वनन्ति शब्दायमानानि कन्दराणि गुहा यस्य, तस्य भावस्तत्त्वं तस्माद्धेतोश्चक्रन्देव क्रन्दितवानिव । धातवो मनःशिला(द)यस्तद्व्याजाद् धातुद्रवोद्गमच्छलेन रक्तपूरं शोणितप्रवाहमुद्वमन् उद्गिरन् । अयमेव रोदनस्य हेतुः । तरङ्गताडनमसहमान उच्चैःशब्दं रक्तमुद्वमन् क्रन्दितवानिवेत्युत्प्रेक्षा ॥ ३५ ॥

ऊर्ध्वोद्गच्छत्तुङ्गशृङ्गाश्चलोत्थै-
श्चक्रभ्रान्तौ मण्डलेनापतद्भिः ।
अप्युच्छिन्नैर्निर्झरीवारिवर्षै-
र्मुक्तालम्बिच्छत्रतामाप शैलः ॥ ३६ ॥

ऊर्ध्वेति । शैलो मन्दरः अप्युच्छिन्नैरपि भग्नैर्निरस्तैरित्यर्थः । निर्झरीणां वारिवर्षैर्जलधाराभिर्हेतुभिर्मुक्तालम्बिच्छत्रतामाप । मुक्तालम्बितं तु स्यूतमुक्ताफलावलम्बितं यच्छत्रं तत्तां तत्सदृशत्वमवाप्तवान् । कीदृशैर्वारिवर्षैः । ऊर्ध्वमुपरि(उद्)च्छतस्तुङ्गस्योन्नतस्य शृङ्गस्याश्चलादग्रादुत्थैरुद्गतैः चक्रभ्रान्तौ चक्रवद्भ्रमणे सति मण्डलेन मण्डलाकारेण समन्तादापतद्भिः । एकदिशा पतनेऽपि

भ्रमवशात् समन्ततो निरन्तरं निपतन्ति वारिधाराः । तेन मुक्ताच्छत्रसादृश्यम् । गिरेश्च दण्डसादृश्यम् ॥ ३६ ॥

वेगोद्रेको दुर्वचाः सर्पपाश-
क्षिप्राकृष्टावुत्कटं भ्राम्यतोऽद्रेः ।
एकामाशामाश्रितं शृङ्गमस्य
प्रत्याशं यैनैककालं व्यलोकि ॥ ३७ ॥

वेगेति । सर्पपाशस्य वासुकिरूपस्य पाशस्य क्षिप्राकृष्टौ सत्यां द्रुततरसमाकर्षणे सति उत्कटमत्यर्थं भ्राम्यतो भ्रमणकवद् भ्रमणं कुर्वतोऽद्रेर्मन्दरस्य वेगोद्रेको वेगातिशयो (दुर्वचाः । ये)न वेगोद्रेकेण हेतुनास्याद्रेरेकामाशामाश्रितं एकभागस्थितं शृङ्गं शिखरम् एककालमेकस्मिन्नेव काले प्रत्याशं व्यलोकि । सर्वासु दिक्ष्वपि दृष्टः । जनैरिति शेषः । एकक्षण एव समन्तादवस्थितमिवावलोक्यते स्मेत्यर्थः ॥ ३७ ॥

विद्युन्मालाशालिभिर्नीलमेघै-
र्विष्वग्भ्रान्तैः सानुनि स्पृष्टमात्रे ।
श्यामक्षौमप्रोन्नतस्वर्णकाञ्ची-
दामोद्दामश्रीकतां प्रापितोऽद्रिः ॥ ३८ ॥

विद्युद् इति । विद्युन्मालया तडित्समूहेन शालिभिः श्लाघ्यैर्नीलमेघैर्नवजलधरैः कर्तृभिः, सानुनि तस्य गिरेः प्रस्थभागे क्वचित् स्पृष्टमात्रे सति स्पर्शदशायामेव, विष्वग्भ्रान्तैः समन्ताद्भ्रमद्भिः पूर्वोक्तन्यायेन सर्वदिक्षु दृश्यमानैः श्यामक्षौमेन कृष्णवर्णदुकूलेन प्रोन्नतः प्रकर्षेणाच्छादितः परिधृतः । किञ्च स्वर्णकाञ्चीदाम्ना कनकमेखलाकलापेनोद्दामश्रीकश्चोत्कृष्टशोभश्च यो भवति तत्त्वं तत्साधर्म्यं प्रापितो नीतः । कृष्णपटं परिधाय तदुपरि कनकमेखलामलङ्कृतवतः कस्यचित्समाधिः ॥ ३८ ॥

तुङ्गत्वाच्च श्वेतिमोद्रेकतश्च
न्यक्कुर्वाणैः सर्वशैलेन्द्रकूटान् ।
ताराहारा चन्द्रवक्त्रा चुचुम्बे
दुग्धाम्भोधेरूर्मिसङ्घैर्नभश्रीः ॥ ३९ ॥

तुङ्गेति । दुग्धाम्भोधेः क्षीराब्धेरूर्मिसङ्घैस्तरङ्गसमूहैर्नभश्रीश्चुचुम्बे संस्पृष्टा । दूरोच्छलत्तरङ्गैस्तत्तरङ्गा नभसा संश्लिष्टा इत्यर्थः । कीदृशैः । तुङ्गत्वादौन्नत्यात्, श्वेतिमा धावल्यं तस्योद्रेकतोऽत्युत्कृष्टत्वाच्च शर्वशैलेन्द्रस्य कैलासस्य कूटान् शिखरान् न्यक्कुर्वाणैरधःकुर्वद्भिः । तदतिशयिभिरित्यर्थः । कीदृशी नभश्रीः । ताराहारा नक्षत्ररूपमुक्तागुणवती, चन्द्र एव वक्त्रं यस्यास्तादृशी च । ताराणां हारत्वेन चन्द्रस्य वक्त्रत्वेन च रूपणात् नभःश्रियो नायिकात्वेन ऊर्मिसङ्घस्य नायकत्वेन च रूपणमर्थवशात् फलितमिति एकदेश(वि)वर्तिरूपकम्। अत्राप्रस्तुतार्थापेक्षया चुचुम्बे वक्त्रसंयोग इति मुख्योऽर्थः । समासोक्तिरलङ्कारः ।

'समासोक्तिः परिस्फूर्त्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् ।' इति ॥ ३९ ॥

> दूरक्लान्तेष्वद्रिमन्थाभिकृष्ट्या
> वृष्टिर्मेघैः पातिता दैवतेषु ।
> तुल्यायासेष्वन्यतो नासुरेषु
> स्वत्वैकाग्र्यं साध्वहो खेचराणाम् ॥ ४० ॥

दूरेति । अद्रिरेव मन्थो मथनदण्डस्तस्याभिकृष्ट्याभितः समाकर्षणेन हेतुना दूरक्लान्तेष्वत्यर्थमवसन्नेषु (दैवतेषु) देवसमूहेषु मेघैर्वृष्टिः पातिता । देवानामालस्यापनोदनाय मेघास्तेषु ववर्षुरित्यर्थः । अन्यतोऽन्यभागेषु तुल्यायासेषु देवैः सदृशालस्येषु । मन्थाकर्षणप्रयासस्य साधारणत्वात् । तादृशेष्वसुरेषु न पातिता वृष्टिः । तान् वर्जयित्वा देवान् वृष्ट्या तर्पयामासुरिति यत् तदिदं कविरपहसति स्वत्वेति । खेचराणां गगनचारिणां स्वत्वे स्वकार्ये ऐकाग्र्यं तात्पर्यं साधु समीचीनम्। अहो कष्टमिति भावः। खे चरन्तीति स्वेषां देवानां च मिथः सौहार्दम्। अत एवं कृतवन्त इति परिहासाभिप्रायः ॥ ४० ॥

> देवेष्वेको दैत्यवर्गेषु चैको
> मूर्तित्रय्याः पूरकोऽदृश्यतैकः ।
> एको निद्रन् शेषतल्पे च विष्णुः
> सत्यं व्याप्तेर्वाचको विष्णुशब्दः ॥ ४१ ॥

देवेष्विति । विष्णुर्देवेष्वेकोऽन्यतमोऽदृश्यत पुरः स्वरूपमवलम्ब्याद्रिं कर्षन् कश्चिद्विष्णुरदृश्यत । तथा दैत्यानां वर्गेषु चैको भगवांस्तद्रूपोऽदृश्यत । एकः पुनर्मूर्त्तित्रय्याः पूरकोऽदृश्यत। येन विना मूर्त्तित्रयी न पूर्णा भवति । अत-

स्तरपूरकोऽपि विष्णुस्तत्राऽदृश्यत । एकः शेषतल्पे फणिराजशयने निद्रन् स्वपन् । द्राधातोः शतरि रूपम् । तत्रापि शयानोऽदृश्यत । अत इदं निश्चितमित्याह सत्यमिति । विष्णुरिति यः शब्दः स व्यापकर्ता-त्यर्थस्य वाचक इति यत् तत् सत्यमेवेत्यर्थः । विष्लृ व्याप्ताविति धातुः । मुख्यया वृत्त्या तदर्थ एवायं विष्णुशब्द इतीदानीं निश्चितमिति भावः ॥ ४१ ॥

दातुं किञ्चिद्विश्रमं कर्षकेभ्य-
स्तादृग्दीर्घैर्बाहुदण्डैश्चतुर्भिः ।
स्वेनैवासौ वासुकिं व्याचकर्ष
श्लाघापात्रीभूय भूतेशधात्रोः ॥ ४२ ॥

दातुम् इति । असौ विष्णुः कर्षकेभ्यः कर्तरि ण्वुल् । देवासुरेभ्य इत्यर्थः । किञ्चिद्विश्रमं दातुमल्पमुच्छ्वासं सम्पादयितुं स्वेनैव स्वयमेव न त्वन्यसहायः, तादृग्दीर्घैस्तथाभूतद्राघिष्ठतया विश्वातिलङ्घिभिर्बाहुदण्डैर्वासुकिं व्याचकर्ष सर्पपाशाकर्षणं कृतवान् । कथम् । भूतेशधात्रोः शिवविरिञ्चयोः श्लाघापात्रीभूय श्लाघा स्तुतिस्तस्या विषयतां प्राप्य; वर्तमान इति शेषः । मूर्तित्रयेऽन्यतमयोरप्यावयोरसाध्यम् । तत्राप्ययं तामप्यधिगतवानित्यर्थः ॥ ४२ ॥

वर्गावेतौ तत्र पूर्वाधिकेन
प्रोत्साहेन व्याप्रियेतां स्वकृत्ये ।
आत्मक्लेशं जानतो भर्तुरग्रे
प्राणांश्चापि स्वैरमुज्झन्ति भृत्याः ॥ ४३ ॥

वर्गाविति । एतौ वर्गौ देवसङ्घोऽसुरसङ्घश्च तत्र स्वकृत्ये समुद्रमथनरूपे आत्मकरणीये वस्तुनि पूर्वस्मादधिकेन प्रोत्साहेन व्याप्रियेतां व्यापारं कृतवन्तौ भगवदाकर्षणदर्शनात्तयोः पूर्वाधिकस्तदाकर्षणोत्साहोऽभूदित्यर्थः । उक्तमर्थान्तरन्यासेन समर्थयते । भृत्याः कर्मकराः आत्मक्लेशं स्वप्रयत्नं जानत स्वामिनोऽर्थे प्रयोजने विषये प्राणांश्चापि निजजीवितमपि स्वैरं स्वच्छन्दं यथ भवति तथोज्झन्ति । किं पुनरन्यदिति भावः । तदुक्तम् —

'सिध्यन्ति कर्मसु महत्स्वपि यन्नियोज्यः
संभावनागुणमवेहि तदीश्वराणाम् ।'

इति ॥ ४३ ॥

इत्थमाकृष्यमाणस्याद्रेरवस्थामाह —

वेगाकृष्टिभ्रष्टमूलो महाद्रि-
मज्जन्नैक्षि क्षीरसिन्धावगाधे ।
इष्टप्राप्तौ सत्वरस्यापि हि स्या-
दत्यारम्भः क्वाप्यनिष्टाप्तिहेतुः ॥ ४४ ॥

वेगेति । महाद्रिर्मन्दरः वेगाकृष्ट्या द्रुततराकर्षणेन हेतुना भ्रष्टमूलः सन् स्वस्थानात् च्युतमूलभागः सन् अगाधे तलस्पर्शरहिते क्षीरसिन्धौ मज्जन् क्रमेणाधोऽधो निमज्जनं कुर्वन्नैक्षि ईक्षितः । रज्जुबन्धनस्थानमतिक्रम्योपर्युपरि सलिलमग्नोऽभूदित्यर्थः । तदेव समर्थयते । इष्टस्याभिलषितस्य वस्तुनः प्राप्तौ लाभे विषये सत्वरस्यातित्वरावतो जनस्य अत्यारम्भः सामान्यतोऽतिप्रवृत्तिः क्वापि कस्याञ्चिदवस्थायामनिष्टाप्तेरनिष्टाया आपदः प्राप्तेर्हेतुः कारणं स्यात् । हि यस्मात्तस्मादिदमापतितमित्यर्थः । यदुक्तम् 'अति सर्वत्र गर्हितम्' इति । यच्चाहुः 'अतिरागोऽपि कार्याणामरागपदलम्भकः' इति ॥ ४४ ॥

भगवदवतारमुपन्यस्यति —

शैलस्थूलस्थेष्ठपृष्ठास्थिपीठ-
स्पष्टाघृष्टिभ्रष्टभास्वद्विमानम् ।
विश्वव्याप्तं वर्ष्म भीष्मं दधान-
स्तत्रोदासीत् कच्छपः कश्चिदुच्चैः ॥ ४५ ॥

शैलेति । तत्र तस्मिन्नवधौ कश्चिदनिर्देश्यरूपः उच्चैरत्युन्नतः कच्छपः कूर्मराज उदासीदुद्भूतः । विश्वव्याप्तं वर्ष्म शरीरं भीष्मं भयानकं दधानो धारयन् । वर्ष्म प्रमाणं वा । तत् कीदृशम् । शैलवत् स्थूलस्य बृहत्प्रमाणस्य स्थेष्ठस्य स्थिरतरस्य पृष्ठास्थिपीठस्य पीठरूपपृष्ठास्थिकस्य स्पष्टं सर्वप्रकाशं यथा भवति तथा आघृष्ट्या सङ्घर्षणेन भ्रष्टं प्रयाणमार्गात् किमपि च्युतं भास्वद्वि-मानं सूर्यस्यन्दनं येन तादृग्गुणं(न ? उन्न)तं वर्ष्म दधानस्तत्राविर्भूत इति समन्वयः ॥ ४५ ॥

दूरोद्वेल्लद्भूरिकल्लोलमाले
भीतिभ्राम्यन्नक्रमातङ्गचक्रे ।
वारां पत्युर्वारिणि स्फारघोर-
प्रव्यक्तास्यो दिव्यकूर्मो ममज्ज ॥ ४६ ॥

दूरेति । दिव्यकूर्म आदिकूर्मो वारां पत्युरम्बुधेर्वारिण्यम्भसि ममज्ज मग्नवान् । कीदृशोऽसावित्यत्राह । स्फारं विस्तीर्णं यथा भवति घोरं भयङ्करं यथा भवति तथा च प्रत्यक्कं विदीर्णमास्यं मुखं यस्य स तथा । कीदृशे वारिणि । दूरमत्यर्थमुद्वेल्लन्त्य उच्चलन्त्यो भूरिकल्लोलमालाः प्रवृद्धतरङ्गा (वलयो यस्मिन् । भीत्या भ्राम्यतां नक्रमातङ्गा) नां करिमकराणां च चक्रं समूहो यस्मिन् । इदं च तन्मज्जनसमयावस्थाप्रतिपादकं विशेषणद्वयम् ।। ४६ ।।

अथ ब्रह्मरुद्रादीनामस्य तथावबोधप्रकारमाह—

एवंभीमं कामठं कामरूपी
रूपं धत्ते विष्णुरेवैष देवः ।
वक्तीदं नो व्यक्तमस्याङ्गदीप्ति–
र्मेघच्छन्नोऽप्यूष्मणोन्नीयतेऽर्कः ।। ४७ ।।

एवमिति । एष दृश्यमानो देवः क्रीडाविजिगीषादिगुणशाली विष्णुरेव, नान्यः । कामरूपी स्वेच्छानु(गणना ? गुणनाना)रूपग्रहणशीलः, एवंभीमं ईदृक्प्रकारभयङ्करं कामठं कमठसम्बन्धि रूपं धत्ते स्वीकरोति । कथं भवन्तो जानन्तीति चेदत्राह । अस्य कूर्मराजस्याङ्गदीप्तिरसाधारणशरीरौज्ज्वल्यं नोऽस्मान् प्रतीदं, अहं विष्णुरेवेति, व्य... ... किज्ञापयति । अत्र युक्तिमाह — अर्को मेघच्छन्नोऽपि जलधरनिकरतिरोहितोऽपि सन् ऊष्मणा औष्ण्येन चिह्नेनोन्नीयते ऊह्यते मेघगर्भे स भगवानस्तीति । एवमयमपीत्यभिप्रायः ।। ४७ ।।

अम्भोमग्नस्यास्य मन्थाचलस्य
प्रोद्धारार्थो ह्यस्य कूर्मावतारः ।
इत्याबुध्य ब्रह्मरुद्रेन्द्रमुख्या
देवास्तावद्देवदेवं प्रणेमुः ।। ४८ ।।

अम्भ इति । अस्य विष्णोः कूर्मावतारः किमर्थमिति चेत् अम्भसि मग्नस्यास्य मन्थानाचलस्य प्रोद्धार उद्धरणमर्थः प्रयोजनमस्येति तथाविधः । हिरवधारणे । तदर्थ एवेत्यर्थः । इति एवंप्रकारमाबुध्य ज्ञात्वा ब्रह्मरुद्रेन्द्रमुख्यास्तत्प्रधाना देवास्तावत्तदवसरे देवदेवं देवानामपि देवं महाविष्णुं प्रणेमुः प्रणतवन्तः ।। ४८ ।।

क्रूरोन्नर्दी कूर्मराडम्बुराशे-
रन्तर्भागं वेगतो गाहमानः ।
पृष्ठाष्ठीलेनाप्रमेयप्रथिम्ना
निमज्जन्तं मन्दरं सन्दधार ॥ ४९ ॥

क्रूरेति । क्रूरं परुषं यथा तथोन्नर्दितुमुच्चैः शब्दं कर्तुं शीलमस्येति स तथा सन् कूर्मराडादिकूर्मपतिरम्बुराशेरन्तर्भागमभ्यन्तरं वेगतः क्षिप्रं गाहमानः प्रविशन् निर्मज्जन्तं मङ्क्त्वा मङ्क्त्वाधोगच्छन्तं मन्दरम् अप्रमेयः ईदृगिति प्रमातुमशक्यः प्रथिमा विस्तारातिशयो यस्य तथाविधेन पृष्ठाष्ठीलेन पृष्ठास्थ्ना सन्दधार सन्धारितवान् ॥ ४९ ॥

विष्वग्व्यापिस्थूलमूलोऽपि शैल-
स्तिष्ठन् मध्येकर्परं कच्छपस्य ।
तौल्यं दध्रे पद्मपत्रैकदेश-
व्यालग्नस्य प्रायशः षट्पदस्य ॥ ५० ॥

विष्वगिति । शैलो मन्दराद्रिर्विष्वग्व्यापि समन्ताद्व्याप्तं स्थूलं (मूलं) यस्य तथा सन्नपि कच्छपस्य कूर्मराजस्य मध्येकर्परं कर्परस्य पृष्ठास्थ्नो मध्ये तिष्ठन्, पद्मपत्रस्य एकदेशे एकभागे व्यालग्नस्य (शि ? श्लि)ष्टस्य, स्थितस्येत्यर्थः । षट्पदस्य भृङ्गस्य प्रायशो बाहुल्येन तौल्यं सादृश्यं दध्रे धृतवान् । विस्तारिणि पद्मदले स्थितमल्पप्रमाणं मधुकरमनुकृतवानित्यर्थः ॥ ५० ॥

कूर्माधीशेनोद्धृतः पूर्वमुच्चै-
रुत्सर्पद्भिः सूचितो वीचिभङ्गैः ।
ईहावातव्यस्तवारिप्रबन्धा-
दम्भोराशेरद्रिराडुन्ममज्ज ॥ ५१ ॥

कूर्मेति । अद्रिराडम्भोराशेरुन्ममज्जेत्यन्वयः । कीदृशः । कूर्मराजेनोद्धृतः पृष्ठे सन्धार्योद्गमितः । पूर्वं तदुद्गमनात् प्रथममेव उच्चैरुत्सर्पद्भिः उपरि प्रवर्तमानैः वीचिभङ्गैस्तरङ्गैः सूचितः । अयमुन्मज्जतीति व्यञ्जितः । कीदृशादम्भोराशेः । ईहावातेन वेगपवनेन व्यस्तो विभक्तो वारिप्रबन्धो जलसमूहो यस्य तस्मादम्भोराशेः क्षीराब्धेः सकाशादुन्ममज्ज उद्गतवान् । नासूचितस्य प्रवेश इति वचनानुसारेण कस्यचिन्नायकस्य सूत्रधारसूचितो रङ्गप्रवेशोऽत्र साधीयते ॥ ५१ ॥

स्नातोत्तीर्णस्वर्वधूकेशपाश-
श्च्योतत्पाथोबिन्दुमुक्तावतंसः ।
सिक्तोन्मृष्टस्पष्टसानुस्तदानी-
मासीदुच्चैःसुन्दरो मन्दराद्रिः ॥ ५२ ॥

स्नातेति । (मन्दराद्रिः) उच्चैःसुन्दरः अतिशयेन सुभगदर्शन आसीत् । कीदृग्भूतः । पूर्वं स्नातानां पश्चादुत्तीर्णानामुत्थितानां स्वर्वधूनां तच्छृङ्गविहारिणीनामप्सरसां केशपाशेभ्यः प्रशस्तकुन्तलभारेभ्यः श्च्योतद्भिर्विगलद्भिः पाथोबिन्दुभिः जलकणैरेव मुक्ताभिर्वतंसः शिरोलङ्कारो यस्य । किञ्च पूर्वं सिक्तानि पश्चादुन्मृष्टानि धौतानि (स्पष्टानि च) सानूनि प्रस्थदेशा यस्य । तथा मूलत्वादस्योच्चैःसुन्दरत्वमुपपादितम् ॥ ५२ ॥

भूयोऽप्येनं पीनदीर्घाहिनद्धं
दुग्धाम्भोधावुच्चकैरुद्भ्रमन्तम् ।
अक्राक्षुस्ते शुक्रशिष्यादितेया
विक्रोशन्तं चक्रवाताभिघातात् ॥ ५३ ॥

भूय इति । शुक्रशिष्या असुरा आदितेयाः सुराः । ते शुक्रशिष्यादितेया भूयोऽप्येनमक्राक्षुरित्यन्वयः । भूयोऽपि तदुन्मज्जनादनन्तरं पुनरपि एनं मन्दरमक्राक्षुः कृष्टवन्तः । कीदृशमेनम् । पीनेन स्थूलेन दीर्घेणायतेनाहिना वासुकिना नद्धं बद्धम् । दुग्धाम्भोधौ उच्चकैरतिशयेनोद्भ्रमन्तं परिवर्तमानम् । चक्रवातानां पर्वतभ्रमानुसारेण मण्डलाकारतया पततां वातानामभिघाताद्धेतोर्विक्रोशन्तं विशेषेण शब्दायमानम् । अभिहननशब्दशक्तिम्(लम ? लो)ऽत्र विक्रोशस्य रोदनार्थध्वनिः ॥ ५३ ॥

कूर्मश्रेष्ठस्येष्टपृष्ठास्थिघृष्टि-
त्रुट्यन्मूलस्तूर्णमद्रिर्जुघूर्णे ।
वाताविद्धप्रस्थकान्तारपुष्प-
व्रातश्च्योतत्पांसुजम्बालिताम्बुः ॥ ५४ ॥

कूर्मेति । (अद्रिः) कूर्मश्रेष्ठस्येष्टपृष्ठास्थिघृष्टित्रुट्यन्मूलस्तूर्णं जुघूर्णे इत्यन्वयः । जुघूर्णे बभ्राम । 'घुण घूर्ण भ्रमणे' इति धातुः । कीदृशः ।

कूर्मश्रेष्ठस्य दिव्यकच्छपस्य स्थेष्ठेन स्थिरतरेण पृष्ठास्थ्ना या घृष्टिर्घर्षणं तया हेतुना त्रुट्यन्मूलः छिन्नाधोभागः। वाताविद्धानां मरुता प्रेरितानां प्रस्थे सानुनि यानि कान्ताराणि काननानि, तेषां पुष्पव्रातेभ्यः कुसुमनिकरेभ्यः श्च्योतद्भिः किरद्भिः पांसुभिः परागैः जम्बालिताम्बुः पङ्कीकृताब्धिसलिलः ॥ ५४ ॥

अब्धेरित्थं क्षोभितादुत्पपात
क्ष्वेलस्तावत् कालकूटाभिधानः ।
आदायैनं विश्वमेतद् दहन्तं
व्यग्रेष्वन्येष्वग्रसत् कृत्तिवासाः ॥ ५५ ॥

अब्धेरिति। तावत् तदवसरे इत्थमुक्तप्रकारेण क्षोभितात् सञ्चालितात्। 'क्षुभ सञ्चलने' इति धातुः। मथितादिति यावत्। अब्धेः सकाशात्। कालकूट इत्यभिधानं यस्य स क्ष्वेलो विषम्। 'क्ष्वेलस्तु गरलं विषम्' इत्यमरः। उत्पपात उज्जगाम। अन्येषु विरिञ्चपुरन्दरादिषु व्यग्रेषु व्याकुलेषु सत्सु कृत्तिवासाः परमेश्वरः। एतद् दृश्यमानं विश्वं लोकं दहन्तं तपन्तमेनं क्ष्वेलमादाय स्वकपालपात्रे निधायाग्रसद् भक्षितवान्। 'ग्रसु ग्लसु अदने' इति धातुः॥५५॥

आहेयं तत् पीतमप्यस्य कण्ठं
नीलं चक्रे शूलिनश्चित्रमेतत् ।
यद्वा हेतोरस्ति कार्यं विरुद्धं
श्यामा यूनः किं न रक्तान् करोति ॥ ५६ ॥

आहेयम् इति। तदाहेयमहेः सम्बन्धि विषं पीतमपि ग्रस्तमपि। पीतवर्णमपीति च स्फुरति। अस्य शूलिनः शम्भोः कण्ठं नीलं कृष्णवर्णं चक्रे। अत एव नीलकण्ठ इत्युच्यते। एतत् पीतवर्णं वस्तु नीलवर्णं चक्र इति यत् तदिदं चित्रमद्भुतम्। अथवा नेदमद्भुतमित्यद्भुतत्वाभावे उपपत्तिमाह यद्वेति। हेतोर्विरुद्धं कार्यमस्ति। कारणविलक्षणं कार्यमपि क्वचिद्विद्यते। कुत्र तदिति चेदत्राह। श्यामा यौवनमध्यस्था स्त्री। श्यामवर्णेति च रति। यूनस्तरुणान् रक्तान् अनुरागयुक्तान् रक्तवर्णानिति च। किं न करोति। करोत्येवेत्यर्थः। अत्र श्यामवर्णा(न्? रक्तान्) करोतीति तावदाभासमानोऽर्थः पीतं वस्तु नीलं चक्रे इत्याभासमानमर्थं समर्थयते। अतोऽयमर्थान्तरन्यासः ॥ ५६ ॥

भूयो जातो भूरुहः पारिजातो
दातॄणां यो जायते स्मोपमानम् ।
धेनुश्चैवं कामदा प्रादुरासीत
प्रायः सिद्धं वज्रिणः साध्यमाभ्याम् ॥ ५७ ॥

भूय इति । भूयस्तदनन्तरं पारिजातो नाम भूरुहः सुरशाखी जातः । अब्धेरित्येव प्रादुर्भूतः । कीदृशः । यः पारिजातो दातॄणां दानशौण्डानामुपमानमुदाहरणं जायते स्म जातः । पारिजात इवासाविति तेन दातृजन उपमीयते । एवं तद्वदेव कामदा अभीष्टप्रदा धेनुः सुरभिश्च प्रादुरासीदब्धेरुद्भूता । आभ्यां पारिजातधेनुभ्यां वज्रिण इन्द्रस्य साध्यं प्राप्तव्यं प्रायो बाहुल्येन सिद्धं प्राप्तम् । एतदुभयमपेक्ष्यामृतलाभ उपसर्जनमेवेति भावः ॥५७॥

सर्वश्वेतो नाग ऐरावतोऽभू-
दश्वस्तादृक्साधुरुच्चैःश्रवाश्च ।
सर्वं चेदं वासवः स्वीचकार
श्रेयस्कामो न क जागर्ति लोकः ॥ ५८ ॥

सर्वेति । सर्वेऽवयवा श्वेता यस्येति सर्वश्वेतः । सर्वशुक्ला सरस्वतीतिवत् । ऐरावतो नाम नागश्च । तादृक्साधुः ऐरावत इव सर्वश्वेतत्वात् साधुर्भद्ररूपः उच्चैःश्रवा नामाश्वश्चाभूत् । अब्धेरित्येव । इदं च सर्वं पारिजातादि । 'नपुंसकमनपुंसकेन' (१-२-६९) इत्येकवद्भावः । वासव इन्द्रः स्वीचका परिगृहीतवान् आत्मस्वं कृतवानित्यर्थः । तथाहि श्रेयस्काम आत्माभ्युदयार्थी लोको जनः क न जागर्ति कास्मिन्नर्थे जागरूको न भवति । आदेयेषु वस्तुषु क्वापि न प्रमाद्यतीत्यर्थः ॥ ५८ ॥

चन्द्रो जातस्तं पुनः शम्भुदेव-
श्चक्रे सद्यः स्वात्मनो मौलिभूषाम् ।
नूनं जानन्नोषधीशाख्यमेनं
क्ष्वेलक्षोभे तत्प्रतीकारकामः ॥ ५९ ॥

चन्द्र इति । चन्द्रो जातः अब्धेरुद्भूतः । पुनःशब्दो जननानन्तरकालवाची । शम्भुदेवस्तं चन्द्रं सद्यः तत्क्षणमेव स्वात्मनः स्वस्य मौलिभूषां शिरोलङ्कारं चक्रे कृतवान् । जातमात्रमेनमादाय निजकपर्दे निक्षिप्तवानित्यर्थः

तत् किमर्थमित्याकाङ्क्षायां तद्धेतुरुत्प्रेक्ष्यते । एनं चन्द्रमोषधीशाख्यम् ओषधीश इत्याख्या संज्ञा यस्य तथाभूतं जानन् । हेतौ शता । क्ष्वेलस्यात्मना पीतस्य विषस्य क्षोभे सति कदाचित् प्रकोपे सति, तस्य क्ष्वेलस्य प्रतीकारकामस्त-त्क्ष्वेलवीर्यविजृम्भणमनेनौषधीशेन प्रशमयिष्यामीति वाञ्छया ; नूनमिति सम्भावनाद्योतकम् । अस्यौषधीशत्वाद्विषौषधेरपि विद्यमानत्वमविवादम् । अत-स्तत्परिग्रहणाद्विषमोहप्रशान्तिः स्यादेवेति विज्ञातत्वादिवेति हेतूत्प्रेक्षा ॥ ५९ ॥

जज्ञे लक्ष्मीः स्वर्णपद्मासनस्था
वव्रे चैषा वल्लभं पद्मनाभम् ।
सर्वानन्यानुत्सुकानप्यहासीत्
कोऽन्यः सूर्यात् प्रीतिहेतुर्नलिन्याः ॥ ६० ॥

जज्ञे इति । लक्ष्मीः श्रीर्जज्ञे अब्धेर्जाता । कीदृशी । स्वर्णमयं पद्ममेवासनं तत्रस्था । एषा लक्ष्मीः पद्मनाभं विष्णुं वल्लभं वव्रे च भर्तृत्वेन वृतवती । चकारो जननवरणयोरेककालत्वं द्योतयति । अन्यानिन्द्रादीनुत्सुकान् साभिलाषानपि सर्वानहासीत् त्यक्तवती । एतत् समर्थयते । नलिन्याः पद्मिन्याः सूर्यादन्यः सूर्यं वर्जयित्वेतरः कः पुरुषः प्रीतिहेतुः प्रमोदकारणम् । न कोऽपीत्यर्थः । पद्मायाः पद्मनाभवरणमुचितमेवेति भावः ॥ ६० ॥

लीलाचारुर्वारुणी नाम देवी
तत्रोदासीदायतारक्तनेत्रा ।
जग्राहैनां तामसीं दैत्यवर्गो
यच्छीलो यस्तस्य तच्छील इच्छा ॥ ६१ ॥

लीलेति । तत्राब्धौ वारुणी नाम देवी सुरादेवतोदासीदुदभूत् । कीदृशी । लीलया विलासेन चारुः सुन्दरी । आयते दीर्घे आरक्ते पाटले च नेत्रे यस्याः । मदहेतुत्वेन विलास आरक्तनेत्रत्वं चेति ज्ञेयम् । दैत्यव-र्गोऽसुरसमूहस्तामसीं तमःस्वभावामेनां वारुणीं जग्राह स्वचिकार । अत्र हेतु-माह । यो यच्छीलो यादृक्स्वभावः तस्य जनस्य तच्छीले तादृक्स्वभावेऽर्थे इच्छा अभिलाषः । तमःप्रकृतयोऽसुरास्तमःप्रकृतावस्यामनुरक्ता इत्युपपन्नमेवेत्यर्थः । एतत्पर्यन्तं शालिनी नाम वृत्तम् ।

'शालिनी मतौ त्गौ गो विरतिर्युगलाजिभिः' इति तल्लक्षणम् ॥ ६१ ॥

अमृतकलशपाणिस्तावदाविर्बभूव
स्मितमधुरमुखेन्दुः स्निग्धनीलोपलश्रीः ।
मकुटकटकहारभ्राजितो यः स देवो
दिशतु विशदमुच्चैर्धाम धन्वन्तरिर्वः ॥ ६२ ॥

अमृतेति । तावत् तस्मिन् काले यो धन्वन्तरिः धन्वन्तरिनामादिवैद्यो विष्णोरवतारविशेष आविर्बभूवाम्बराविरासीत् । कीदृशः । पाणावमृतकलशः सुधापूर्णकुम्भो यस्य । (शोभ ? स्निग्ध)स्य नीलोपलस्येन्द्रनीलरत्नस्य श्रीरिव शोभा यस्य । मकुटेन किरीटेन कटकैर्वलयैर्हारेण मुक्तागुणेन । इदं चोपलक्षणं वनमालाङ्गदकाञ्चीपीताम्बरकौस्तुभादीनामपि । एतैश्च भ्राजितश्शोभितसर्वाङ्गः स देवस्तादृशगुणविशिष्टो द्युतिविशेषशाली धन्वन्तरिर्वो युष्मभ्यमुच्चैर्विशदमत्यर्थावदातं धाम तेजः सकलरोगप्रशमनेन प्रकृष्टशरीरलावण्यादिकं दिशतु प्रतिपादयतु । अथवा उच्चैर्विशदं धाम सदानन्दमयं ब्रह्म । तद्दिशतु । तत्र लयनं हि मुक्तिः, तं परमपुरुषार्थं मोक्षमेव प्रदिशत्विति प्रार्थनायां लोट् । मालिनी नाम वृत्तमिदम् ।

'ननौ मयौ यकारश्च मालिनी वसुवाजिभिः' इति ॥ ६२ ॥

शम्भुजम्भदमनादिषु पश्य-
त्स्वम्भसां निलयनादुदितस्य ।
तस्य पाणिकमलादथ दैत्या-
स्तत्क्षणादहृषतामृतकुम्भम् ॥ ६३ ॥

शम्भ्विति । अथ धन्वन्तरेराविर्भावादनन्तरं दैत्याः शम्भुजम्भदमनादिषु हरपुरन्दरप्रमुखेषु । अमरेष्विति शेषः । पश्यत्सु सत्सु ताननादृत्येत्यर्थः । तस्य धन्वन्तरेः पाणिकमलादमृतकुम्भं तत्क्षणात् तदानीमेवाहृषत हृतवन्तः कीदृशस्य । अम्भसां निलयनात् क्षीरसागरादुदितस्य उद्गतस्य । अनेन तेषांसाहसिक्यातिशयो व्यज्यते । स्वागता नाम वृत्तमिदम् ।

'रनभागुरुयुग्मं च स्वागतेति निगद्यते' इति ॥ ६३ ॥

नारीभूत्वा नरकमथनः स्निग्धमुग्धैरपाङ्गै-
रादायासावमृतकलशं मोहितेभ्योऽसुरेभ्यः ।

निःशेषार्तिक्षपणममृतं पाययामास देवा-
नापन्नार्तिप्रशमनविधौ किं न कुर्यात् स देवः ॥ ६४॥

नारीति । नरकमथनो भगवान् महाविष्णुर्नारीभूत्वा मायया स्त्रीरूपं गृहीत्वा स्नेहव्यञ्जिभिर्मुग्धैः सुन्दरैरपाङ्गैः कटाक्षविक्षेपमोहितेभ्यो वैचित्त्यं प्रापितेभ्यः । परवशेभ्य इति यावत् । असुरेभ्यः सकाशादमृतकलशमादाय स्वीकृत्य देवानमृतं पाययामास । पिब(तोत्वद्रसनार्थत्व ? तेः प्रत्यवसानार्थत्वाद् ः द्विकर्मकत्वम् । कीदृशम् । निश्शेषाणां समस्तानामार्तीनां जरावैरूप्यप्रभावक्षया-दीनां दुःखानां क्षपणं नाशनम् । अनेनामृतपानक्षण एव निर्जरा विज्वरा पूर्वस्मादधिकतरप्रभावा बभूवुरिति द्योत्यते । ननु तादृशस्य भगवतः स्त्रीरूप-ग्रहणं कथं न लाघवाय भवतीति चेदत्राह । स देवो भगवान् नारायणः आपन्नानाम् आपदं प्राप्तानामार्तेः पीडायाः प्रशमनविधौ प्रशान्तिकर्मणि विषये किं न कुर्यात् । सर्वं करोत्येव । येन ह्यतिक्षुद्रतरमत्स्यकूर्मादिरूपमपि गृह्यते । तदुक्तम् :—

"तिर्यक्त्वमङ्गनात्वं च मनुष्यत्वं च माधव ।
ऊरीकरोतु भक्तानामनुग्रहविधित्सया ॥" इति ।

मन्दाक्रान्तावृत्तमिदम् ।

'मन्दाक्रान्ता मभौ नतताद्गुरू गो दिक्तुरङ्गैः' इति ॥ ६४ ॥

कूर्मावतारकथामुपसंहरति —

अनन्यशरणानमूनखिलनिर्जरान् विज्वरान्
विधातुमयमास्थितः कमठविग्रहं दुर्ग्रहम् ।
दधत् कठिनकर्परे विपुलकन्दरं मन्दरं
चराचरगुरुस्स वो भवतु भूयसे श्रेयसे ॥ ६५ ॥

अनन्येति । अन्यशरणं न विद्यत इत्यनन्यशरणानमूनखिलनिर्जरान् सर्वदेवान् विज्वरान् ज्वरो जरागमप्रभावक्षयादिस्तद्रहितान् विधातुं दुर्ग्रहं दुरभिभवं अरिभिर्दुर्जयं च कमठविग्रहं कूर्मशरीरमास्थितोऽधितिष्ठन्नङ्गी-कुर्वन्नित्यर्थः । कठिने कर्कशे कर्परे पृष्ठास्थि विपुला विस्तीर्णाः कन्दरा गुहा

यस्य तादृशं मन्दरं दधत् धारयन् चराणां जङ्गमानाम् अचराणां स्थावराणां च भूतानां गुरुर्नियन्ता सोऽयं नरकमथनो वो युष्याकं भूयसे प्रभूताय श्रेयसेऽभ्युदयाय; निःश्रेयसायेति यावत् । भवतु प्रार्थनायां लोट् । तत्तादृशस्वच्छन्दकच्छपाकृतिरच्युतो विच्युतिरहितां मुक्तिं वः प्रदिशत्विति सामाजिकान् प्रत्याशीर्मङ्गलमिदम् ।

'वसुग्रहयतिः पृथ्वी जसौ जसयला गुरुः' इति ॥ ६५ ॥

इति श्रीविष्णुविलासे कूर्मावतारो नाम

द्वितीयः सर्गः ॥

तृतीयः सर्गः ।

अथ वराहावतारं प्रस्तौति —

> ततो हिरण्याक्ष इति प्रतीतो
> दितेस्तनूजोऽजनि दानवेन्द्रः ।
> यस्याभ्रमातङ्गमदाम्बुवृष्टे-
> रवग्रहो दुर्ग्रहवद् भुजोष्मा ॥ १ ॥

तत इति । तत इत्यनेन प्रस्तुतभगवदवतारवर्णनक्रमापेक्षया द्वितीयावतारादनन्तरभावी तृतीयावतारः परामृश्यते । हिरण्याक्ष इति प्रतीतः प्रसिद्धो दितेस्तनूजोऽजनि तनूजतया सम्भूतः । दानवेन्द्र इति जातमात्र एव दानवां कुलाधिपत्यसाम्राज्यमास्थितवानिति द्योतयति । यस्य हिरण्याक्षस्य भुजोष्म भुजप्रतापोऽभ्रमातङ्गस्यैरावतस्य मदाम्बुवृष्टेर्मदजलवर्षस्यावग्रहोऽभूत् प्रतिबन्धोऽभवत् । 'अवे ग्रहो वर्षप्रतिबन्धे' (३-३-५१) इत्यप् । दुर्ग्रहवत् । दुष्टग्रहो यथा वर्षं प्रतिबध्नाति तथाभ्रमातङ्गस्य मदजलरूपं वर्षं प्रतीत्यर्थः । तत्प्रतिबन्धस्तु भयहेतुकमदजलशोषणरूपभुजोष्मणोऽतिगरीयस्त्वद्योतकः । यदुक्तं राघवीये—

'रक्षःपतेः संस्मरता भुजानां क्षणे क्षणे शुष्ककटावटेन ।
ऐरावतेन' इति ॥ १ ॥

> पुरा जयो नाम जनार्दनस्य
> दौवारिको यः सनकादिशापात् ।
> अन्येन साकं विजयाभिधेन
> दैतेयभूयं बिभरांबभूव ॥ २ ॥

पुरेति । पुरा पूर्वं जयो नाम जनार्दनस्य दौवारिको द्वारि नियुक्तः । 'तत्र नियुक्तः' इति ठक् । यो हिरण्याक्षः सनकादीनां मुनीनां शापाद्धेतोः विजयाभिधानेनान्येन साकं दैतेयभूयं दैतेयत्वं बिभरांबभूव धृतवान् । स्वयमेवाङ्गीकृतवान् । यतः सप्तजन्मानि स्थानभ्रष्टतया सामान्यजनवत् स्थितेर्जन्मत्रयमात्रं शत्रुत्वेनावस्थानमेव श्रेय इति भगवद्वैरित्वमेव स्वयं वृतवानित्यर्थः ॥ २ ॥

पुष्पं जीमूताविर्भावकारणं च, इन्द्राणीपर्यङ्कमिव कौशिककमनीयं, वासुदेवमिव रञ्जितमार्जुनं, बन्धविशेषमिव सर्वतोभद्रं, सुरेशनिशान्तमिव ऐरावतोल्लसन्तं, सत्यवन्तमिव गायत्रीकान्तं, दुग्धाम्भोधिमिवामृतोद्भवं, कार्मुकसङ्गोत्सुकितकामिनीसमाजमिवाभिनवमालिकाभासमानं, पश्चिमोत्तरहरि(ता? द)न्तरमिव समीरणरमणीयं, दाशरथिमिव वैदेहीविलाससामोदं, भीमसेनमिवाधिगतबहुनागबलं, नृपतिसभान्तरमिव नटीलसमानं, नीलाम्बुजमिव चक्रमर्दकाह्लादकं, स्रवन्मकरन्दारविन्दमिव नन्दनीयभृङ्गराजं, अलकापुरमिव सौगन्धिककमनीयं, स्कन्दमिव वल्लीविलसितं, कलशोदयसदनाद्रिप्रान्तमिव पापविनाशशालिनं, प्रत्यक्पारावारमिव कुशस्थलीसमुल्लसितं, गाङ्गेयधरणीधरमिव सांकाशगङ्गं, तदुदग्रराजमानपरंज्योतिस्सिसेविषया समाप्रसाद समीरणजठरंभरिपरिपालकधरणीधरवरीणम् ॥

अस्मद्देशिकदर्शनार्थमवनौ तं मार्गमाणश्चिरं
प्राप्तं पङ्कजवासिनीसहचरं द्रष्टुं तदीयं धरम् ।
श्रुत्वा रम्यतदद्रिपादपवरानारुह्य वल्लीपथैः
रेजे तस्य दिदृक्षया ऋतुमिषान्नूनं वसन्तस्तदा ॥ २६ ॥

तदानीं तु —

शृङ्गारराज्ये स्वसखं वसन्तः
स्वान्ते वसन्तं स किमभ्यपिञ्चत् ।
मरन्दनिष्यन्दतरङ्गिणीना-
मम्भोभिरेतं सुमनोवरीणैः ॥ २७ ॥

मदनाय तदा मुदा ददुः
प्रमदाः प्रमदावहे उभे ।
शितसायकयुग्मयोजिते
धनुषी रुचिरे जयप्रदे ॥ २८ ॥

अनिर्गलविकर्षणाद्घणघणायमानं रणे
षडङ्घ्रिगणसद्गुणं पटुमुपाजहाराद्भुतम् ।

बहुपल्लवसेवनरञ्जितः
　　पिकवरः कळकूजितकैतवात् ।
मदनस्य जगद्विजयोल्लस-
　　द्विरुदवाक्यकदम्बमजूघुषत् ॥ ३६ ॥

राजते स खलु माधवागमे
　　कानने व्रततिवल्लवीजनः ।
प्राप्तमोद इव कुड्मलच्छला-
　　द्दन्तपङ्क्तिमनु सम्प्रदर्शयन् ॥ ३७ ॥

माधवस्य विविधेषु विलासे-
　　ष्वेधितेषु सुतरां व्यतिभाते ।
अद्भुतं हि कुरवो यदराज-
　　दर्जुनः सुमनसेत्यनुरूपम् ॥ ३८ ॥

समिन्धमाने सति माधवेऽलं
　　प्रमोदभारानभजन् धरेऽस्मिन् ।
माधव्य आसां खलु तस्य सङ्गमे
　　सतीमणीनामनुरूपमेतत् ॥ ३९ ॥

मधुनार्पितं मधुरपल्लवं तदा
　　परिभुज्य सादरममी पिकद्विजाः ।
जगदुः प्रणादमिषतो मुहुर्मुहुः
　　कुशलं सतां प्रकृतिरीदृशी खलु ॥ ४० ॥

गन्धचोर इति तं सदाचरं
　　दर्शित द्विजवरै रुतच्छलात् ।
माधवो मधुपशृङ्खलारवै-
　　राबबन्ध विश्रुतां प्रदर्शयन् ॥ ४१ ॥

अस्मदीप्सिततमां हरितं ते
तात एष करसञ्चयतोऽलम् ।
विध्यतीति समवर्तिसमीपे
वक्तुकाम इव वायुरथागात् ॥ ४२ ॥

वसन्तसमये तस्मिन् लसन्ती मधुपावलिः ।
आक्रम्य सुमनोव्रातं बुभुजे वीतसाध्वसम् ॥ ४३ ॥

तदानीं खल्वनिदानींतनवाणीरमणीवेणीवतंसवाणीतरङ्गिणीवरणीयधोरणीधुरीणरमणीयचरणाग्रणीधरणीगीर्वाणगणसन्ततशरणीकृतचरणारविन्दः प्रणतजनकामितवितरणगीर्वाणधरणीरुहायितकरुणारसवरुणालयशरणान्तःकरणो देशिकप्रवीणः दरीवररममाणगीर्वाणरमणीतन्तन्यमानरमणीयतरगीताकर्णनाविदीर्णहृदयपथिकजनजाततापप्रशमनसमाश्रितसरसीरुहपर्यङ्कोल्लासिदर्मन्तशालिपर्यन्तशोभितं, सरसीरुहवासिनीनिवाससेवासमागतनगरीसंश्रयनारीराजितकबरीकान्तिलहरीवीक्षणसंभावितविभावरीसमागमशङ्कातः वारं वारमुपक्रान्तसौरतरथाङ्गमिथुनपक्षयुगलविक्षेपविकीर्णार्णोजानितराजतपात्रपरिस्रस्तसमीकृतपटवाससञ्चयपरागपरम्परापङ्क्तिलितपाथःपटीरपङ्काङ्कितकटकाबलाशतसमुल्लासितं, पुरन्दरपुरीराजत्सुन्दरीवदनविभावरीकान्तविलोकनतस्स्तोकेतरकौतुकचकोरनिकरकूजितानुरञ्जितकान्तोपान्तकान्तारं, रसालसालतमालप्रियालप्रमुखसालावालिकमनीयकिसलयनिकरनिगरणरमणीयकण्ठकळकण्ठवरश्रवणीयरवश्रवणोत्कण्ठकण्ठीरवकुलकण्ठोपकण्ठाकुण्ठविक्षिप्तशुण्डादण्डवनशुण्डालवरकरटयुगलानिरर्गलानिर्गलद्दाननीरवीचीनिचयगन्धचोरसदाचरसञ्चारदरविदलितमन्दारकुन्दमाकन्दसिन्दुवारकुमुदकोकनदकुरवकमरुबककेतकीप्रभृतिसुमप्रकरपरागसन्दोहकर्बुरितमकरन्दवृन्दनिष्यन्दसन्दोहावहसेवासमागतगुहाशयमहीश्रयशुद्धान्तमहिळाशयपञ्जरालयविपञ्चिकावरहंसिकास्वनसमाकर्णननिरन्तरानिष्यन्दमानमन्देतरतटानिष्यन्दवृन्दनन्दनीयतरं, मन्देतरसिद्धिप्रदोऽयमिति उपान्तमुपसृतैः

रम्भादिममेनकान्तामरवारकान्ताधरपल्लवसमपल्लवोपभोगाभिलाषया मञ्जुतरशिञ्जितव्याजान्मन्त्रमावर्तयद्भिरिव शारिकाशुकपोतकसङ्घातैरतिकान्तं, नितान्तसम्प्राप्तनिशान्ततया सुमनोरससञ्जिघृक्षया नितान्तं परिभ्रमाद्भिर्मधुपैरभिप्रकटयन्तामिव नात्र मधुपानामवकाश इति, कृतज्ञतयैव प्रतिदिवसं व्याकुर्वद्भिरिव परेभ्यो मञ्जुतरमालपद्भिरुद्भासितं परभृतैः, क्रियाकलापनिर्वर्त्तनकल्येतरवालखिल्यप्रमुखकान्तारावसथैस्तापसयूथैरपि पर्वतशिखराग्रात् पतितव्यमेवमिति प्रदर्शयद्भिरिव शिखराग्रान्निष्पताद्भिर्निर्झरसङ्घैः समलङ्कृतं, शिलाकलापाद्युपरुद्धेनापि स्निग्धतरविमलान्तर्हृदयेन करणीयैव सता सर्वदा परोपकृतिरुदकेनापीति प्रकाशयद्भिरिव पयोवितरणतत्परैः वापीकूपतटाकादिसरःप्रवरैरभिमण्डितं, शिखण्डिमण्डलतुण्डानिलपारणसुखितकुण्डलन्द्रिमण्डलसुखानिद्रादण्डजरकुलपण्डलेन्द्रपरिमण्डितं, अनुवादममरगिरेराम्रेडितं मृडानीवल्लभभूमीभृतः, प्रतिसर्गं प्रालेयशैलस्य, द्वैविध्यं विन्ध्यस्य, द्विर्भावं प्रभाकरभूधरस्य, मूर्त्यन्तरं मन्दरस्य, वसुधातलसम्भूतमिव सुधान्धसां सुकृतसमाजं, मानसमदकारिणमपि मानसमदहारिणं, वासन्तिकपादपसमुदायमिव घनपुष्पोल्लसितं, शिलीमुखमिव शैत्योद्भासितं, वर्णिवरमिव प्रशस्तमेखलं, निखिलजनमनोरञ्जनमभिवीक्ष्य समन्तादनन्तानन्ताधरं तत्र च नितान्तं वीक्ष्य लसन्तं वसन्तमवजगाहे चामोदसरस्वन्तम् ॥

एषोऽनन्तक्षितिभृदधिराड्राजमार्गे निनीषन्
वल्लीनादीन् द्विजनृपकरादीन् परेभ्यो विजानन् ।
आहूयैतान् सुरपथमहामण्डपे संविचार्य
प्रत्येकं यत्प्रतिदिवसतां पश्यतां नीतिमार्गम् ॥ ४४ ॥

आलोच्यायं सुहुतवहनेऽन्यानिदानीं नियोज्य
रन्ध्रे नूनं महति च भृशं राजतेऽन्यत्र दण्डे ।
इत्यस्माकं बहुतरमयं बन्धुवर्गाभिमाना-
दिन्दुः पूर्वं निजकुलगुरू रौहिणेयावतारे ॥ ४५ ॥

यत्क्षोणीधरतुङ्गशृङ्गविलसत्सालं समीक्ष्योन्नतं
देवः कश्चन पाकशासनपुरप्रोत्तुङ्गकेतूत्तमम् ।
गन्तुं निर्जरपत्तनं कृतमतिस्तल्लक्ष्मदर्शी जवा-
द्गत्वा स्वर्गमधश्च वीक्ष्य कुसुमं तत्राशशङ्के परम् ॥४६॥

वियत्करेणौ वियदापगाया-
मगाधतोयेष्ववगाहमाने ।
यन्ता समारुह्य यदद्रिकूटं
दूरीचकारातिनिपातशङ्काम् ॥ ४७ ॥

वियत्करेणुर्मदविह्वलाक्षो
यदद्रिकूटं वियदापगायाम् ।
विलोक्य तत्रत्यकरीरराशा-
वाशापरीतः खलु चुम्बति स्म ॥ ४८ ॥

यदद्रिकूटोपरि राजमाना
वापीः प्रसन्नोत्पलसारसास्ताः ।
उल्लासभाजां त्रिदशेश्वराणां
व्रातो वधूनामवगाहते स्म ॥ ४९ ॥

यदद्रिवापीविहरद्दिवौक-
स्सीमन्तिनीवक्त्रसरोरुहेषु ।
निशाम्य नेत्राणि जवेन नून-
मिन्दिन्दिराः स्वीयधिया भ्रमन्ते ॥ ५० ॥

यदद्रिकूटे कमलानिवास-
सेवाविशेषोल्लसता जवेन ।
मृगाङ्कबिम्बेन करोति काचित्
तन्नामगन्धान्मृगनाभिशोभाम् ॥ ५१ ॥

मृगनाभिविशेषकं ललाटे
कमनीयं विधृतं तया तदानीम् ।
अपरा तु समीक्ष्य मार्गमाणा
मृगनाभिं न हि तादृशं त्ववाप ॥ ५२ ॥

यदद्रिरामाशिखराग्रफाले
मुक्ताललन्तीव विराजतीयम् ।
नक्षत्रपङ्क्तिर्नयनप्रमोद-
प्रदा सदामोदकरावबद्धा ॥ ५३ ॥

उत्तुङ्गयत्पर्वतशृङ्गराज-
त्तारावली तत्र सरोरुहाणाम् ।
पत्रस्थिताच्छाच्छपयःकणानां
रीतिं विशुद्धां विवरीकरोति ॥ ५४ ॥

मत्सूनुभग्ना अपि कीचकाः पुन-
र्यस्मिन् भणन्तीति कथं नु निर्भयाः।
आलोकितुं प्राप्त इव प्रभञ्जनो-
ऽनन्ताचले मन्दगतिर्विराजते ॥ ५५ ॥

यदद्रिशृङ्गोपरि तुङ्गसालान्
सालाः सुराणामवलोक्य नूनम् ।
तत्साम्यलाभाय नभोऽन्तराळे
स्थित्वा सुमैर्विष्णुपदं यजन्ति ॥ ५६ ॥

यदद्रिसद्मामरसुन्दरीणां
मुखारविन्दस्य विलोकनेन ।
त्रपापरीतं सरसीरुहाणां
वृन्दं विलीनं समभूद्वनेषु ॥ ५७ ॥

यत्स्फाटिकोत्तुङ्गतटेषु दृष्ट्वा
निजां पुरीं निर्जरसः कदाचित् ।
त्वरातिरेकात् प्रविशन्त एव
प्रज्ञावतां हासपदान्यभूवन् ॥ ५८ ॥

यो भूधरः सद्धरतानुबन्धा-
न्नूनं सुधादीधितिदर्शनेच्छुः ।
भूरुट्करै रम्यफलप्रसूना-
न्यादाय तद्वीथिषु तिष्ठतीव ॥ ५९ ॥

मत्वा यदुर्वीधरहेमकूटं
त्रिविक्रमस्वामिकिरीटकोटिम् ।
अकाण्ड आसीत् स कथं प्रगल्भा
अपि ध्रुवं बभ्रमुरित्यजस्रम् ॥ ६० ॥

फणाधरवराचलः सुरवरेशवेश्मोल्लस-
त्सुवर्णमयगोपुरस्फुरदुदग्रभृङ्गश्रियम् ।
स एष शिखरैरलं प्रकटयन् भृशं राजते
प्रियापरवशो रसोल्लसिततुङ्गभृङ्गः सदा ॥ ६१ ॥

रमणीयतमां गुरूत्तमः
फणिराड्धरणीधरस्य ताम् ।
सहसाधिययावधित्यकां
स सहानुचरैः सदग्रणीः ॥ ६२ ॥

तदनु समन्तादुद्वीक्षितचक्षुःश्रवोऽध्यक्षक्षोणीधरः स गुरुपुङ्गवः स्वच्छतया स्वादुतया च भगवतस्तस्य शतपत्रवासिनीभर्तुरङ्कुरयन्ती मनुकम्पारसभरशङ्कां, शशाङ्कवद्विलसत्कमलां, मेघमालामिव कादम्बिनीं, ऊर्मिलामिव लक्ष्मणोपेतां, सरस्वदुपान्तभूमिमिव विलसत्प्लवां, वीणामिव प्रवालरमणीयां, उद्यानभूमिमिव भृङ्गवरशोभमानां, निष्यष्टकवन्मकरकच्छपालङ्कृतां, दिग्गजराजीमिव कुमुदपरिराजमानां, सङ्ख्यामिव महाशङ्खकमनीयां, पद्मनाभनाभिमिव सारसोल्लसन्तीमासाद स्वामिपुष्करिणीम् ॥

तदानीं तु स गुरुपुङ्गवो गाहमानजनतापहारिणि वारिणि रमणीये स्वामिपुष्करिण्याः निर्वर्तितस्नानादिनियमकलापो लसदूर्ध्व-पुण्ड्रभसिततुलसीनलिनाक्षमालिकः सञ्चितचम्पकपङ्केरुहप्रभृतिसुमप्रकरः दर्वीकरवरगिरिवासनीतबहुवासरैर्विनयातिरेकभासुरैर्भूसुरैः सततमुपसृतपरिसरतया पुलस्त्यपुलहप्रभृतितापसव्रातसमेतप्रभाकरसमीभावमधिवहन् अम्भोरुहवासिनीनिवाससदनाभिमुखो निरगमत् ॥

एवं निर्गतो गुरुरग्रत एव प्रत्यग्रमणिप्रत्युप्ततया प्रभाकरसङ्घमिव सेवकजनभावुकपङ्कजप्रकरविकासनस्य, वसन्तसमयमिव प्रणतलोकसुकृतव्रातचूतसमुल्लासस्य, शतधारमिव विश्वव्यामोहमहीधरभेदनस्य, सत्कविकाव्यमिव सुवर्णभासमानं, पङ्केरुहकर्णिकोपमानं विमानं कमपि विलोकयमानः चामीकरधरणीधरमिव कल्याणवितरणप्रवीणं, प्रभाकरमिव प्रबोधजलजातविकासापादकं, विद्युत्सन्दोहमिव घनप्रकाशावहं, वासन्तिकपादपसमुदायमिव सुमनोभिरामोदितं, पाणिनीयतन्त्रप्रवर्तकतपोधनसम्बाधमिव वररुचिरमणीयं, निश्चयद्वकमिव शङ्खपद्मोल्लसितं नीळालङ्कृतं च, यशोदानन्दनमिव नन्दनीयनन्दकामितप्रदं, रत्नाकरमिव लसमानोर्मिकं, प्रावृट्कालिकनभःस्थलमिव राजदिनमणिवलयोल्लसितं, उद्यानवनतल्लजमिवाभिनवमालिकामणिधरमकुटोज्ज्वलं, वरदराजमिव काञ्चनकाञ्चीमाबिभ्राणं, आर्यावर्तप्रदेशमिव प्रचकासत्कुण्डलकवचोज्ज्वलकर्णाङ्गदेशसमुद्भासितं, पद्माकरमिव चक्रराजराजमानं, वनितामिवातनुसमीरलीलोपयोगिनीं, समरोन्मुखमेघनादवाचमिव रक्षोभयविधायिनीं मुनिजनमानसमत्तदन्तावळालानायमानां निखिलजगदामोदकीं कौमोदकीमाबिभ्राणं, देशजातोल्लसिताख्यातिशोभितयापि न देशजातोल्लसिताख्यातिशोभितया, अङ्गदविलसितयाप्यनङ्गदविलसितया कैलासलक्ष्म्येव अळकान्तोल्लसमानया, मत्तमातङ्गवद्दानवारिमनोहरया, रामधनुर्वल्ल्येव रक्षोपायविधायिन्या श्रुत्यन्ताकृष्टगुणविशेषया च, भूसुतयेव जनकाभिमतसम्पत्प्रदया, वासुदेवलीलयेव नरकच्छेदिकया, प्रावृट्श्रियेव विलसद्धारपयोधरभासमानया, अभिनवप्रभासा रङ्गराजपरितोषप्रदया, कामधेन्वेव श्रीवत्सार्णवासरसिकया, त्रिदशेश्वरसम्पदेव विष्णुपदाश्रितया, प्रियतमया

रमया संशोभितवक्षस्तटं, जाजीराजीवपारिजातजातीतुलसीमालती-कुटजमञ्जरीपुञ्जपरिनिष्यन्दमानमाध्वीकपानपरमादरपरिपतितदीधिति-परीवाहसन्दोहसन्देहापोहकझङ्काररवनिगमधुकरव्रातरमणीयतनुं, सेवकजनकामितं वितरीतुकामो विचेतुमिव निचयं तेषां काननौकसामधि-समीरणचरणाग्रणीधरणीधरशिखरमतितरां समिन्धमानम्, अरुणसारस-राजमानकरुणारसपरिपूर्णारुणनयनं, स्वकृपापगापारकल्लोललवलेश-प्रशमितापरिमितदुरितजनजातदत्तपरमाद्भुतभूतिमपारनिजभूतिं, सुर-सार्थपोषकमपि नरसार्थपोषकं, तमोदावहरणसमर्थमपि नतमोदाव-हरणसमर्थं, राघवारीशशमनक्षमलीलमपि नराघवारीशशमनक्षमलीलं, वारिजातासनकलितोल्लासविलासिनमपि नवारिजातासनकलितोल्लास-विलासिनं, वनितापापहारिणमपि अवनितापापहारिणं, अधिगतपरमान-न्दमपि अनधिगतपरमानन्दं, तारकान्तलसमाननमपि नतारकान्तल-समाननं, वसुदेवसेवितमपि सेवितवसुदेवं, आमोदितसुमनःपुञ्ज-मपि सुमनःपुञ्जामोदितं, रञ्जितकान्तारावासजनविलासमपि भञ्जित-कान्तारावासजनविलासं श्रीनिवासं विलोकयामास ॥

देशिकः स समभिवन्द्य पुनः पुनस्तमिन्दिरारमणं समर्प्य च तस्मै विविधोपहारं कुसुमादिहारं सङ्गृह्य सादरं शिरसा तत्प्रसादं तदनु समस्तावीदेवं देवम्—

अभिनवघनभासं चम्पकाभिख्यनासं
सितरुचिसमहासं सज्जनस्वान्तवासम् ।
वृषशिखरिनिवासं वेदविद्वेषिशासं
विहितबहुविलासं तं भजे श्रीनिवासम् ॥ ६३ ॥

दनुजकुलकुठारं सन्धृतानेकहारं
निजरुचिजितमारं गोपिकायूथजारम् ।
उरसि विधृतदारं संहृतेलातिभारं
भवधरशतधारं साब्धिकन्याविहारम् ॥ ६४ ॥

तदानीम्, इत्थमभिष्टूयमानस्तदीयतपश्चर्यापरितुष्टमानसो भग-वानम्भोरुहवासिनीनिवासः समवादीदेवं प्रददामीति सकलेप्सितं ते । तदनु गुरुरपि सादरमभाणीदेवम् —

यदि रासि मदीप्सितं रमेश
शरणं प्रवृणे सतां गतिं त्वाम् ।
प्रददातु रतिं त्वचञ्चलां त्व-
च्चरणाब्जसुधारसस्य पाने ॥ ६५ ॥

तदवकर्ण्य फणीशगिरीश्वरः
पुनरुवाच गुरुं निरपेक्षकम् ।
तव सदास्ति मदीयकथारति-
स्तदितरं वृणु मत् परमं वरम् ॥ ६६ ॥

इति समभिहितं महाभागवतं भगवता दयावता आर्यवर्येप्सितं पूर्वमेव करुणार्णवेन नारायणेन वरानपि वगनवरान् मन्वानः पुनरपि परमपुरुषपादपङ्कजपरिचर्यापरमादरतामेव वृष्टवन्तमिष्टं तं गुरूनमनुगृह्य परमाशीर्भिः, असहमानं निजतिरोधानं समाश्वयित्वा च स्मृतः स्मृतः पुनःपुनरायास्यामीति पोषयित्वा च तं नानानिजगाथासुधाधाराभिरभिनवरमणीयाभिरभिययौ निजभवनम् ॥

तदन्वनवाप्यामपि समवाप्य वेङ्कटेशापारकृपां स्वप्नानुभूतमिव पन्नगेन्द्रधराधरराजमाननारायणसम्पूजनप्रमाश्लेषणसम्भाषणादिकं सम्भावयमानो भगवतोऽपारवैभवात् समाराध्य तं भगवन्तं नितान्तमम्भोजवासिनीनिशान्तं सम्प्रणम्य पुनः पुनः घटिकाचलालयानिलात्मजं तं, ततश्च नरके सरिचरणनलिनावलोकनलसमानमानसः सहितः परममहाभागवतैः सहितां काञ्चनगृहसञ्चयैः काञ्चीं नाम काञ्चन कमनीयां नगरीमानञ्चायमाचार्यः साचार्यः ॥

या च सेवासमायातपाकाहितानीतपारिजातप्रभृतिप्रसवजातप्रसूनमरमकरन्दास्वादनससंभ्रमसम्पतद्भ्रमरकुलसङ्कुलवरझङ्कारादि नूतनेतरभाषितस्तवदत्तादरश्रुतिश्रुतिचक्षुर्जनानिबिडनरपरिसरेण बालारुणमणिमालाञ्चिततनुलीलाविजितरिपुजालाश्रितजनपरिपालाम्भःमदमालासमरुचिपशुपालबालाजनवरोल्लासागिडालसमनोविलासेन सीमारहितमहिमासहितराकाहितङ्करपाकाहितप्रदमागाहितप्रमुखलेखाग्रणीविहि-

तानवद्यस्तुतिपरिगृहीतमहितामितगुणगणपरिवीतमानसरिपुभीततापस-परिगीतसङ्कटपरिपाटनक्रमपटुतरचटुलचरितभुवनविदितनिजमङ्गलदेव-ताप्रियतमभावेन तोत्राहतगोत्राहितपत्रामितगतिजैत्रातुलरययात्राविशे-षचित्रांशुमित्रातिरयगर्वसर्वस्वनिर्वापकधुरीणसाधारणेतरवरणीयगतिधो-रणीसमेतविनतासुतारूढवनितायुतानेकद्विजातानीतफलजातास्वादनस-ञ्जातामितमोदेन वरदेन परिणलिता समृद्धतरसर्वार्था दरीदृश्यते नितान्तमद्यापि ॥

यां च राकाशशिकान्ताननिर्जरलोकाखिलशोकापोहकसेवक-जनामितदायकाचरितनायकाधिकमोदकादद्भुतकामरसाश्रयमानसारुण-सारसाङ्घ्रियुगलसामगानपरकाकुसङ्कपरिसाधिताधिकतरभावुकया वीक्ष-णमात्रक्षपिताखिलरक्षोगणलोकत्रयरक्षाविधिदक्षाद्भुतचरितयक्षाधिपी-कृतनिजपक्षाश्रितजनपाथोरुहाक्ष्या कामाक्ष्या सहितः स हि मानी मदनीयमहिमा हिमानीधरतनयाकामुकः सेवकजनकामितवितरणगी-र्वाणतरुर्निवसति ॥

सन्दृश्य तां तु वरदस्य पुरीमुदार-
मेधाविलासजितगीष्पतिरार्य एषः ।
वेगापगाविरचितोचितकाल्यकर्मा
सेवार्थमाप सदनं वरदस्य तस्य ॥ ६७ ॥

संसेव्य भक्त्या भगवन्तमार्य-
स्ततः समुद्वीक्ष्य मनोभवाक्षीम् ।
गोपालकृष्णाख्यगुरुं महान्तं
संसेवितुं तस्य निशान्तमाप्नोत् ॥ ६८ ॥

तदनन्तरं गुरुरेषोऽनुदिनमनतिक्रान्तनिजदिनचर्यं सज्जनवर्यं निगमान्तसारसारार्थबोधननिरतं श्रीमन्नारायणचरणारविन्दगाथासुधा-रसपानाभिरतं श्रीरामचन्द्रमन्त्रयन्त्रतन्त्रार्थव्याख्यातारं आश्रितजन-त्रातारं सेवकजनकामितवितरणगीर्वाणतरुं धरणीगीर्वाणगुरुं तं गोपाल-कृष्णं तुलसीकुसुमानयनारोपणासेचनादिभिश्शुश्रूषाभिः शुश्रूषमाण-स्तत्रोवास कतिचित्कालम् । तदानीमस्याजगाम च निदाघसमयः ॥

शुक्रागमे सुमनसां भृशमाविरासी-
दुल्लासहानिरिति साम्प्रतमेव यत्तत् ।
तस्मिन्नवाप समये तु पलाशसङ्घः
खेदं नितान्तमिति यत्तदिदं विचित्रम् ॥ ६९ ॥

विव्याध लब्धावसरः प्रभाकरः
स्वैरं स शुच्याश्रयगर्वितः करैः ।
अस्मत्कुलीनप्रमदापहारिणो
नूनं पलाशा इति सेर्ष्यमद्य तान् ॥ ७० ॥

अह्नामधीशः खररश्मिसञ्चयै-
रह्नाय धात्रीजनितान् विधुप्रियान् ।
सम्पीडयामास स लोकबान्धव-
श्चित्रं धरित्र्यामिति यद्विजृम्भते ॥ ७१ ॥

पादपान् करसहस्रपीडितान्
नात्यजन् द्विजवरा इति ध्रुवम् ।
पूर्वमस्मदुपकारिणो ह्यमी
सूचयन्त इव तां कृतज्ञताम् ॥ ७२ ॥

पत्रदानमपि नाचरन्ति ये
तानमी द्विजवराः समत्यजन् ।
दानतत्परजनस्य सेवनं
ह्याचरन्ति धरणीतले जनाः ॥ ७३ ॥

विजहौ विधुरपि जाड्यं
हिमकिरणोऽयं जडाशयोद्भूतः ।
तदिदं प्रथितं भुवने
यच्छुचिसङ्गो हरेज्जाड्यम् ॥ ७४ ॥

तदानीं तु —

प्रावृड्विष्णुः शितिगलकुलाह्लादसङ्घातदायी
मेघश्यामो मदनजनकश्चञ्चलाश्रीनिवासी ।
सम्प्राप्तोऽयं घनरसमयः शक्रकोपप्रदायी
दातुं नूनं चिरतरतपःस्थास्नुभिः प्रार्थितार्थम् ॥ ७५ ॥

अतनुतापविदारणकारणे
रसमये समये समुपेयुषि ।
अपि मलीमसतामनवस्थितिं
समधिगच्छति कृष्णघनोऽद्भुतम् ॥ ७६ ॥

प्रतिक्षणं प्रस्फुरति प्रमोदात्
स्मरेऽपि तस्मिन् समये नितान्तम् ।
प्रोज्जृम्भने शम्बरवृद्धिरासी-
देताद्विचित्रं भुवनत्रयेषु ॥ ७७ ॥

रसारुहाणां रसकामुकानां
तदाविरासीदमृतं नितान्तम् ।
उपस्थिते कृष्णमहाघनौघे
तपःस्थितानां किमलभ्यमस्ति ॥ ७८ ॥

रमानिवासा अपि पद्मसङ्घा
विषातिरेकेण विषादमापुः ।
स्थिरात्मनामुल्बणसङ्क्रमेन
हानिर्भवेदित्यपि दर्शयन्तः ॥ ७९ ॥

तदानीमेवं विलसति वर्षासमये कश्चन चतुरः शिष्यवरीणः सम्पाद्य चाभ्यनुज्ञामस्मदार्यस्य सामोदं समवर्णयदेवं चित्रतरम् ॥

व्रातो मरुतां समीक्ष्य शुक्रान्ते-
वास्यभ्युदयादतीव तप्तः ।
वीतां सुमनस्ततिं विहायः-
पाथोधिं विममन्थ सोऽमृतेप्सुः ॥ ८० ॥

विमथ्यमानात्तरसा मरुद्भि-
र्नभःपयोधेर्घनमन्दरेण ।
तदा समुद्भूतमहाविषौघै-
स्तृप्तिं भजन्ते शिनिकण्ठसङ्घाः ॥ ८१ ॥

निर्मथ्यमाने नितरां नभोम्बुधौ
सा कामधेनुः समभून्मनोहरा ।
इष्टार्थसिद्ध्या परितोषयन्ति यां
रामासमेतास्तरुणास्तपोधनाः ॥ ८२ ॥

संसारेषु न चान्यदस्ति नितरां सम्प्रार्थनीयं यतः
यं सम्प्राप्य महत्तरं पितृऋणं दूरीकरोति क्षणात् ।
लाभे यस्य महीयते क्रतुभुजां लोके नितान्तं सुधीः
सोऽयं विष्णुपदाश्रयः समभवत्सन्तानभूमीरुहः ॥ ८३ ॥

विमलाप्सरसां सङ्घास्तदानीं प्रमदावहाः ।
रसातिरेकाद्विलसन्मञ्जुघोषोपशोभिताः ॥ ८४ ॥

तदाभवद्दिव्यतमामृतानां
निषेवणात्संविजहत्सु तापम् ।
मरुत्कदम्बेषु विचित्रमेत-
द्यच्छक्रकोपः समभून्नितान्तम् ॥ ८५ ॥

अवितटनिकटं विपाटयन्ती
विटपिवरांस्तटिनी प्रदर्शयन्ती ।
इति जडगतयो निजाश्रिताना-
मपि विरराज विरोधमाचरेयुः ॥ ८६ ॥

आश्रुत्य चेत्थमत्यर्थं कान्ततममुत्प्रेक्षितमन्तेवासिना निजोपान्तवासिना वीक्ष्य स तस्योपान्ते विलसन्तं नारदादिमुनिवृन्दमिव इन्द्रासदनसमानं दिनं, जयद्रथजन्यमिव प्रशस्ततमसुमनोव्रातराञ्जितार्जुनकीर्तिहरं, पयःपारावारमिव परिशुद्धतमामृतवितरणजागरूकं, गान्धारराजतनूजमिव धार्तराष्ट्राह्लादकरं, वैनतेयमिव विषधरनिर्यापणकारणं, मेदिनीश्रसभान्तरमिवानुद्भूतबलाकाकुलकोलाहलं, तपोधननिकुरुम्बमिव समुद्भासितमहत्तमजात्या, श्रीरामचन्द्रमिवागस्त्यामोदविधायिनं, केदा-

रक्षेत्रमिव स्वयमासन्नतमहिमागमं शरदागमसुद्वीक्ष्य नितान्तमानन्द-रससान्द्रीकृतमानसो बभूव ॥

तथा खलु गुणाम्बुधेर्गुरुवरस्य वीक्षाटवी-
विहारिहरिसेवने धृतविलाससमासीन्मनः ।
सनातनसरस्वतीमणिकिरीटपारम्परी-
विचारणकृते चिरं निवसतः सदेशे गुरोः ॥ ८७ ॥

निर्गम्य काञ्च्या निजदेशिकानां
निदेशमासाद्य सदासवर्गः ।
तदा समागाद्गुरुसार्वभौमो
वीक्षावनं राघववीक्षणार्थम् ॥ ८८ ॥

वीरराघवविलोकनोल्लस-
न्मानसः समगमत्स मे गुरुः ।
प्राक्तनोक्तिमयपोत्रिसन्निधिं
पार्थसूतमवलोक्य सादरम् ॥ ८९ ॥

तत्र वीक्ष्य कमलासखं किटिं
मत्नसूक्तितनुकोटिसमभम् ।
देशिकः समभिवन्द्य सादरं
सैष कानि च दिनान्यनन्दयत् ॥ ९० ॥

प्राचीनसूक्तिमयपोत्रिवरस्य वाणी-
माकर्ण्य देशिकवरः सहसादरेण ।
आसाद्य भूपपशुपालपुरं पुराणं
संसेव्य नन्दतनयं मुदमाससाद ॥ ९१ ॥

स रङ्गपुरवासिनं जलधिकन्यकाकामुकं
समैहत विलोकितुं सकलवावदूकाग्रणीः ।
सनातनसरस्वतीशिखरसूरिरसद्गुरुः
समासददिमां पुरीं तदनु दासवर्गैः समम् ॥ ९२ ॥

इति श्रीसीतारामसूरिविरचिते कविमनोरञ्जके तृतीयोल्लासः ॥

युङ्न क् ॥ ५३ ॥

तस्या अधिकाक्षरायाः प्रतिपादं युग्गणः ककारो (विभातिक्) न भवति ॥

क्तृतीयः ॥ ५४ ॥

तस्या अधिकाक्षरायाः प्रतिपादं तृतीयो गणः ककार एव भवति ।

[1]यी वान्त्यः ॥ ५५ ॥

तस्या अधिकाक्षरायाः प्रतिपादमन्त्यो गणो यकार (कमलिनीय्) ईकारो (धीवराश्) वा भवति ।

क्वचिदाद्योऽपि ॥ ५६ ॥

तस्या अधिकाक्षरायाः क्वचित् प्रयोगान्तरे आद्योऽपि गणो यकार ईकारो वा भवति । यथा —

[2]विकसितनीलोत्पलार्चितमदनबाणदीपनं
ध्रुवं मधुचषकार्थेतिशायिनं दयितमुखसमर्पितम् ।
सुतनु निषेवितेवति रतिरहस्तनुतरङ्गविह्वलं
नववागधिकाक्षरा यथा च श्रुतिमनोभिनन्दिनी ॥(?)

शीर्षकं गीतिकापरा ॥ ५७ ॥

१. क. omits this letter.

२. This sūtra, its vṛtti and the next sūtra are omitted in ख.

३. The verse is defective in the MSS.

४. 'धयिका' ख. ग.

५. तवव' ख, ग.

सैवाधिकाक्षरा गीतिकापरा भवति चेत् शीर्षकं नाम भवति । यथा —

विचरन्ति महेन्द्रगोपका नीलशाड्वलश्रियः
स्तोकं ग्रहचन्द्रभास्कराञ्छादयन्ति नीरदाः ।
मेघोदकचारिणी च विलसति तटित् समन्ततः
प्रणदन्ति वनस्थलीषु मुदितमनसश्च[1] चातकाः॥

कुटचकुसुमाधिवासितसिळिन्ध्रकन्दळवनान्तसेविनश्च ।
वान्ति पवनाः प्रवासिनां कुर्वन्ति[2] सोत्सुकानि मानसानि ॥

एकैकवृद्ध्या ललित-सुभद्रा-विद्रुम-वंशपत्र[3]-कुञ्जर-पुष्पदन्त-मालाः ॥ ५८ ॥

[4]अधिकाक्षराया गीतिकापरायाः प्रतिपादं एकैक-गणवृद्ध्या ललितं, सुभद्रा, विद्रुमः, वंशपत्रं, कुञ्जरः, पुष्पदन्तः, माला इत्येवंनामकानि[5] सप्त शीर्षकाणि भवन्ति । तत्र ललितस्य पादः सप्त गणा भवन्ति, अन्ते गीतिका च । सुभद्राया अष्टौ, [6]अन्ते गीतिका च । एवं शेषाणि शीर्षकाणि एकैकवृद्ध्या ज्ञेयानि ।

१. 'सश्चातकाः' क.
२. MSS. 'न्ति च सो'.
३. 'वंशपुष्प' ख. ग.
४. MSS. omit अधिकाक्षरायाः.........माला.
५. 'नामानि' ख. ग.
६. क. omits this sentence.

निर्धायिकामध्यं त्रिकलयम् ॥ ५९ ॥

उक्तप्रकारं शीर्षकं निर्धायिकामध्यं भवति चे. त्रिकलयं नाम भवति । आदावधिकाक्षरा मध्ये निर्धायिक अन्ते गीतिका; एवमेतास्तिस्रस्त्रिकलयमिति । यथा —

विकसितकुसुमं निशागमे पूर्ण[1]चन्द्रबोधितं
सङ्कोचमुपैति पङ्कजं भ्रमर एव सोत्सुकः ।
विनदन्ति मनोहराणि केदारोदरसंस्थिताः
कान्तासहिता विचिन्त्य किमपि कलहंससारसाः ॥
शालारूढैरिवेन्द्रगोपकैः
पुष्पैर्विभान्ति च बन्धुजीवकाः ।
शर्वर्य इव प्रकीर्ण[2]तारका
विकसितकुसुमा विभान्ति शीर्षकाः ॥
सप्रच्छदमकरन्दं[3] विहाय कुसुमातिपातिलोलुपानि ।
मधुकरकुलानि सादरं श्रयन्ति कुमुदानि रेणुपाण्डराणि ॥

गणास्त्रयो भङ्गद्विपदी ॥ ६० ॥

त्रयो गणाः प्रतिपादं भवन्ति चेत् भङ्गद्विपदी नाम भवति, गणाधिकारे वर्त्तमाने पुनर्गणग्रहणं चतुर्लघूनां पञ्चलघूनां च सर्वेषां गणानां चाभेदेन[4] ग्रहणार्थम् । इतरथा हि चतुर्लघूनामेव ग्रहणं स्यात् ।

१. MSS. omit 'पूर्ण'.
२. MSS. 'विकीर्ण'.
३. 'न्दमवि' ख. ग.
४. 'दोऽपि ग' ख.

चत्वारः पञ्च षट् सप्त वा ॥ ६१ ॥

तस्या भङ्गद्विपद्याः न केवलं त्रय एव गणा भवन्ति। चत्वारो वा पञ्च वा षड् वा सप्त वा भवन्ति।

भान्ते वा ॥ ६२ ॥

तस्या भङ्गद्विपद्याः प्रतिपादं गुरुरन्ते भवति वा न वा।

त्रिंशद्वा परमा ॥ ६३ ॥

त्रिंशल्लघवो यस्या भङ्गद्विपद्याः सा भवति त्रिंशद्वा परमाधिका भङ्गद्विपदी, ततः सर्वाभ्यो भङ्गद्विपदीभ्यो या परमा सा त्रिंशद्वा भवति। तदधिका नास्ति।

द्विपदी गीतिकापरा ॥ ६४ ॥

सैव भङ्गद्विपदी द्विपदीत्युच्यते गीतिकापरा भवति चेत्। उदाहरणम्—

क्षीणमम्बु वापीषु सरित्सु च साम्प्रतं
रक्ष्यमाणं बहुधनमिह भाग्यविपर्यये।
तप्तपांसुरेषा च विशुष्कवनद्रुमा
बद्धचोरमत एव मही परितप्यते॥
अवसीदति श्रमासहं गात्रं माहिषस्य घर्ममूर्छितस्य।
बहुपोष्यबालपरिजनं गृहतन्त्रमिवातुरं निरुद्यमस्य॥

इयमपरा द्विपदी—

करुणाकर निष्करुणेन वायुना
रिपुवारवारणदानगन्धिना।

बहुवल्लभविप्रयोजितो जन
कान्तो जनश्चरताद्य दूयते ॥ (?)

अधुना मधुकरबन्धुना बन्धूकेन सरजस्ककेसरेण ।
भवतेव जगद्बन्धुना कुलमण्डनमण्डितानि भूस्थलानि ॥

क्वचिद्विदारी मध्ये ॥ ६५ ॥

क्वचित् प्रयोगान्तरे भङ्गद्विपदीगीतिकयोर्मध्ये विदारी भवति । विदारीलक्षणमुत्तरत्र वक्ष्यति । यथा—

अभिनवकन्दलीकुसुमकेसरलीलाधरस्थलीमुखाः
कुसुमितकुटजसुरभिपरागाविराजितसानुकाननाः ।
समदमयूरमधुकरकेकारावपूरितकन्द्रोदराः
ससलिलमुखरजलदमलिना गिरयो रमयन्ति
[मानसम् ॥

केतकसूचिभिदा मरुता
बकुलरजांसि समुद्वहता ।
अभिमुखदयितजनोऽपि जनः
सोत्सुक एव बलात्क्रियते ॥

भवनुज्ञातपरेणुना करेणुनाथ मलिनेन तोयदेन ।
उपगिरिमुदन्ताविद्युता सकलं जगदर्घ्यते मनोभवाय ॥

विदारी भान्ताश्चतुर्दशलघवः ॥ ६६ ॥

गुर्वन्ताश्चतुर्दश लघवः प्रतिपादं भवन्ति चेत् विदारी नाम भवति ।

१. MSS. omit 'गुर्वन्ताश्चतुर्दशलघवः.'

मिश्रः पञ्चमः प्रायः ॥ ६७ ॥

तस्या विदार्याः प्रतिपादं पञ्चमो लघुः पूर्वेण वा लघुना परेण वा मिश्रो गुरुर्भवति प्रायः ।

ए[1] उपान्त्यः[2] ॥ ६८ ॥

प्राय इति वर्तते । तस्या विदार्याः प्रतिपादमन्त्यस्य समीपे प्राय एकारो (नि श्रीः क्वब्) भवति । अन्यत्रानियमः[3] ।

सायमुराभिरजधूसरया
  मृदुमलयानिलक्षपितया ।
कामिजनो नवमालिकया
  वि[4]गलितमानमनाः क्रियते ॥

त्रयोविंशतिर्भङ्गुरासकम् ॥ ६९ ॥

भान्ता इति तु वर्तते । गुर्वन्तास्त्रयोविंशल्लघवो यथेष्टं मिश्रिता भवन्ति चेत् भङ्गुरासकं नाम भवति ।

द्वादशावलम्बनम् ॥ ७० ॥

द्वादशलघवः प्रातिपादं भवन्ति चेदवलम्बनं नाम भवति ।

१. MSS. omits 'ए'
२. MSS. 'न्त्या'.
३. MSS. 'अंत्रानियम:'
४. MSS. 'यदीप बिगलित'

ञौऽन्ते ॥ ७१ ॥

तस्य प्रतिपादमन्ते प्रायो ञकारो भवति ।

उभे रासकम् ॥ ७२ ॥

उभे भङ्गुरासकावलम्बने सहिते रासकमित्युच्यते । यथा —

कैया बाहुमूलत्रिकदेशनिवेशितानि
गूहसेऽद्य वसनेन किमङ्गनखक्षतानीति ।
लक्षमङ्गनालिङ्गनलग्नमनङ्गसाक्षिझषजन्मा
तव भरति तृतीयामिवेदमक्षिदशनदह्नचितेन ।
क्षतजलवारुणि तेन शोभितेन
वाधरेण त्वमसि विलासधरे ॥ (१)

गाथा ॥ ७३ ॥

गाथेदानीं वक्ष्यते ।

सार्षी ॥ ७४ ॥

सा च गाथा आर्षीति ज्ञेया । ऋषेरेवेयमित्यार्षी । पञ्चस्वनुष्टुबादिजगत्यन्तेषु सा गाथा भवति ।

पादैश्चतुर्भिष्षड्भिर्वा ॥ ७५ ॥

सा गाथा चतुर्भिर्वा षड्भिर्वा पादैः स्वजातीयैर्वा विजातीयैर्वा भवति यथा —

१. The verse is very defective.

पश्यासि पश्यासि परदोषमात्मदोषं न पश्यासि ।
भर्तारमथ धनं च कुलं च हित्वा किं किं हसासि[1] ॥
दशधर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
त्वरमाणश्च भीतश्च कामी चोरश्च ते दश ॥

इति जानाश्रय्यां छन्दोविचित्यां
जात्यध्यायः पञ्चमः
समाप्तः ॥

---

१. 'हसति' क.

अथ षष्ठोऽध्यायः ।

प्रस्तारः ॥ १ ॥

प्रस्तार इत्यधिकारः । इत उत्तरं वक्ष्यमाणः[1] प्रस्तार इति ज्ञेयः[2] ।

आद्ये भाः ॥ २ ॥

सर्वेषां छन्दसामाद्ये वृत्ते गुरव एव भवन्ति । एतदुक्तं भवति — सर्वेषां छन्दसामाद्यं वृत्तं सर्वगुर्विति ।

आदौ हा ॥ ३ ॥

सर्वगुरुवृत्तमाद्यं कृत्वा ततो द्वितीयस्य वृत्तस्य छेदने द्वितीयवृत्तादौ लघुरेकः कार्य इति ।

पूर्ववच्छेषम् ॥ ४ ॥

द्वितीयवृत्तादौ लघुमेकं कृत्वा ततोऽनन्तरमुपरि न्यस्तं पूर्ववृत्तमिव शेषं कुर्यात् । शेषमिति क्रियमाणवृत्तशेषम् । इदं प्रस्तारद्वितीयसूत्रयुक् सर्वेषां छन्दसां युग्वृत्तप्रस्तारे योज्यम् ।

1. 'यद्वक्ष्यमाणं' क.
2. 'ज्ञेयं' क.

भा इतुल्या ॥ ५ ॥

अथ तृतीयवृत्तस्य छेदने पूर्ववच्छेषं कृत्वा परिसमाप्ते द्वितीये वृत्तेऽथ तृतीयस्य छेदने तृतीयवृत्तादौ गुरुः द्वितीयवृत्तादिवत् तुल्यसंख्यः कार्य इति ।

ह ॥ ६ ॥

अथ तृतीयवृत्तादौ पूर्ववृत्तलघुसङ्ख्यं गुरुं कृत्वा तेषां गुरूणामनन्तरं ह इति लघुरेकः कार्य इति ।

शेषं पूर्ववत् ॥ ७ ॥

शेषमिति क्रियमाणवृत्तशेषमित्यर्थः । पूर्ववदिति अनन्तरमुपरिन्यस्तवृत्तसूत्रवदित्यर्थः । एतदुक्तं भवति — अनन्तरमतीतवृत्तलघुगुरुसङ्ख्यं लघुगुरुविन्यासं कुर्यादित्यर्थः । इदं तृतीयप्रस्तारसूत्रयुग्मं सर्वेषामयुग्वृत्तप्रस्तारे योज्यम् । आभ्यां प्रस्तारसूत्राभ्यां क्रमशो विवर्त्तमानाभ्यां सर्वेषां छन्दसा चतुर्थादिषु युगयुग्वृत्तेषु प्रस्तारविधिः कार्यः । आसर्वलघुवृत्तदर्शनादे सर्वेषां छन्दसां प्रस्तारविधिः । अयमन्यः क्रमः —

भाहौ मिश्रावधोऽधः ॥ ८ ॥

दिदृक्षितस्य छन्दसो वृत्तानां प्रमाणसङ्ख्या लब्धा यावत्तावत्तौ गुरुलघू मिश्रौ एकान्तरितौ कार्यावधोऽधः ।

१. MSS. 'युक्पम्'
२. MSS. 'नेत्राभ्यां'

भौ[1] द्वौ परे[2]तः ॥ ९ ॥

तेषां तथा न्यस्तानां परतो द्वौ गुरूलघू चाधोऽधो कार्यौ पूर्वमेकान्तरितन्यस्तगुरुलघुसङ्ख्याप्रमाणप्राप्तेरिति ।

तद्द्विः ॥ १० ॥

परत इत्यनुवर्तते । तथा न्यस्तानां च तेषां परतो द्विगुणं द्विगुणं गुरवो लघवश्चाधोऽधः कार्या आच्छन्दोऽक्षरप्रमाणपरिसमाप्तेरिति । उक्तमेवार्थं निरूपयिष्यामः— आद्या द्विगुणक्रिया चत्वारो गुरवश्च लघवश्च ततोऽष्टावेवं द्विगुणद्विगुणवृद्धिः सर्वेषां छन्दसामाछन्दोऽक्षरपरिसमाप्तेरिति ।

नष्टम् ॥ ११ ॥

नष्टमिदानीं वक्ष्यते ।

हृत्वा होऽर्धम् ॥ १२ ॥

यस्य कस्यचिच्छन्दसः सम्भवति दश सहस्रतमं वा दर्शयेत्युक्ते तेनोक्ता या सङ्ख्या तावन्ति रूपाणि विन्यस्य तदर्धमपनीय लघुमेकं न्यस्य पुनः पुनरेवं कार्यः ।

दत्त्वैकं समे भाः ॥ १३ ॥

अर्धे पुनर्ह्रियमाणे यदि विषमता स्यात् तत एवैकं दत्त्वा समतां कृत्वा ततोऽर्धमपनीय गुरुमेकं विन्यस्य पुनः

१. MSS. 'भौ'
२. MSS. 'परे'

पुनरेवं कार्यः । यावद्दिदृक्षितस्य छन्दसोऽक्षराणि परिपूर्णानि भवन्ति तावदेवं कृत्वा इदं तद्वृत्तमिति दर्शयेत्[1] ।

उद्दिष्टम् ॥ १४ ॥

उद्दिष्टमिदानीं वक्ष्यते ।

द्विगुणं द्विगुणं वर्धयेत्प्रतिलोमतः ॥ १५ ॥

यस्य कस्यचिच्छन्दसो यत्किञ्चिद्वृत्तं विन्यस्येदं वृत्तं कतममित्युक्ते तस्य वृत्तस्यान्त्यादक्षरादारभ्य द्वे चत्वार्यष्टौ षोडश इति प्रतिलोमतो द्विगुणं द्विगणं वर्धयेत् ।

एकहानिर्भे ॥ १६ ॥

एवं प्रतिलोमतो वर्धयेता गुरौ वर्धिते एकेन हानिः कार्या । एवं कृत्वा यथालब्धसङ्ख्यावशाद्वक्तव्यमि ति अयमेकस्तूपदेशः । अत्र सर्वेषां छन्दसां वृत्तेषु विधिवत्प्रस्तरितेषु तत्राद्यमर्धं गुर्वन्तं भवति । अपरमर्धं लघ्वन्तम् । उद्दिष्टे तत्र लघ्वन्ते उत्तरार्धे वृत्तमिति ज्ञात्वा तस्योत्तरार्धवृत्तस्यान्त्याक्षरात् प्रभृति द्विगुणं वर्धयित्वा गुरौ वर्धिते पूर्ववदेकहानिं कृत्वा आच्छन्दोऽक्षरपरिसमाप्तेः + + + पूर्वार्धवृत्तानि च वक्तव्यानीति । अयं तृतीयस्य[2] क्रमः ।

लघुपरीक्षा ॥ १७ ॥

लघुपरीक्षेदानीं वक्ष्यते ।

१. MSS. 'तद्यत्तमिति'

२. 'तृतीयस्य प्रस्तारस्य क्रमः' क.

एकैकवृद्धमाच्छन्दसः ॥ १८ ॥

यस्य कस्यचिच्छन्दस एकलघुवृत्तानामन्येषां च प्रमाणं जिज्ञासमाने एकैकवृद्धान्यक्षरस्थानानि दिदृक्षितछन्दोऽक्षरप्रमाणानि क्रमान्न्यस्यानि । एवं विन्यस्य पूर्वं पूर्वं परयुतमविनाश्यान्त्यमपास्य पूर्वमक्षरस्थानं परेणाक्षरस्थानेन युक्तं कर्तव्यम् । अविनाश्यान्त्यमक्षरस्थानं पूर्वमेवापास्यान्यत्र न्यस्येत् । ततः पुनः पुनः पूर्वं परयुतं कृत्वान्यत्र न्यस्तस्य परतः परतो न्यसितव्यम् । अन्त्यमेकमवशिष्टं भवति । तच्च तेषां परतो न्यसितव्यम् । एवं विन्यस्य प्रथममक्षरस्थानमवेक्ष्य तदुपलब्धसङ्ख्यावशादेकलघुवृत्तानीयन्तीति वदेत् । एवं तृतीयादीनवेक्ष्य त्रिलघुवृत्तादीनि ब्रूयादिति ।

अयमन्यः क्रमः —

सबिन्द्वाद्यं ततो द्विर्द्विः[1] ॥ १९ ॥

सबिन्दु आद्यमक्षरस्थानं कुर्यात् । पश्चाद्द्विगुणद्विगुणितानि दिदृक्षितछन्दोक्षरप्रमाणानि कार्याणि । एवं कृत्वा एकलघुवृत्तादिदिदृक्षायां सत्यां —

तदधो रूपं नयेत् क्रमात्[2] ॥ २० ॥

तेषां तथा न्यस्तानामक्षरस्थानानामधस्ताद्[3]दिदृक्षितलघुवृत्तप्रमाणानि रूपाणि विन्यस्य क्रमान्नयेत् । एकं द्वे

१. MSS. add 'सबिन्दुः'.
२. MSS. add 'द्विवरत्'.
३. 'स्थानादधस्ताद्दिदृक्षित' ख. ग. पाठः.

त्रीणीति गणयन्नाद्यादारभ्यान्तादेवं नीत्वा यथालब्ध-सङ्ख्यावशादेकादिलघुवृत्तादीनि वक्तव्यान्येतावन्तीति । अनेन स्वेषु रूपेषु विन्यस्तेष्वन्त्यं यथावस्थितस्थानमेकैक-मिति द्वे इत्युक्तमक्षरस्थानं नयेदिति । तानि पुनर्वृत्तानीदं चेति जिज्ञासायां सत्यां युक्तिरूपाणि विन्यस्य—

सरूपं बिन्दुना वदेत् ॥ २१ ॥

सह रूपेण वर्तत इति सरूपम् । बिन्दुना सार्धं सरूपं विगणय्य यथालब्धसङ्ख्यावशादिदं चेदिदं चेति वक्तव्यम् । ते ते लघवस्तेषु कस्मिन् कस्मिन् स्थाने स्थिता इति चेत्—

स्थानानि तान्येव ॥ २२ ॥

तेषां लघूनां स्थानानि तान्येव भवन्ति । एतदुक्तं भवति— येषु येष्वक्षरस्थानेषु रूपाण्यवस्थितानि तान्येव स्थानानि वृत्तेषु लघूनामिति । इयमपरा लघुपरीक्षा उक्ता— एकादशस्य वृत्तस्य लघवः कियन्त इत्युक्ते पूर्ववदक्षरस्थानानि न्यस्य तावत यावद्भिः सबिन्दुभिः स्थानैरबिन्दुना सह यावद्भिरक्षरस्थानैरेकादशसङ्ख्या परिपूर्णा भवति तावन्तस्तस्यैकादशस्य वृत्तस्य लघवो भवन्ति । एवं विशेषाणामपि विज्ञेयम् । अत्र तत्स्थानानि तान्येव भवन्ति ।

सङ्ख्या ॥ २३ ॥

सङ्ख्येदानीं वक्ष्यते । यस्य कस्यचिच्छन्दसः सम-

वृत्तसङ्ख्यादिदृक्षायां सत्यां तस्य पादाक्षराणि विन्यस्य ततः—

भार्धे हृते ॥ २४ ॥

विन्यस्तानां पादाक्षराणामर्धं हृत्वा गुरुन्यासः पुनः पुनरेव कार्यः । अर्धे पुनर्ह्रियमाणे यदि विषमता स्यात्—

ह्रोऽसमेऽपास्यैकम् ॥ २५ ॥

एकमपास्य पूर्वन्यस्तस्याधो लघुं न्यस्यैवं सर्वाण्यपनयेत् । एष सङ्ख्यागर्भः ।

भे द्विः ॥ २६ ॥

लघौ लघौ द्विः द्विः कुर्यात तावता भे गुणयेदर्धत्से-दित्यर्थः । उक्तमेवार्थं निरूपयिष्यामः । तद्यथा—चतुर्विंशत्यक्षरा गायत्री, तस्याः पादाक्षराणि षट् । तानि विन्यस्य ततस्तदर्धं हृत्वा गुरुं न्यस्य ततः त्रीण्यवशिष्टानि भवन्ति । तत्रासमतया अर्धं हर्तुं न शक्यते । तत एकमपास्य लघुं न्यस्येत । अवशिष्टे द्वे भवतः । ततोऽर्धमपास्य गुरुं न्यस्येत् । एकमवशिष्टं तदप्यपनीय लघुं न्यस्येत् । अयं सङ्ख्यागर्भः । ततस्तु—

हे द्विः ॥ २७ ॥

इति परमेव लघू द्वे कुर्यात् । ततस्ते तूपरिस्थानगुरुमुपनीय द्वाभ्यामेव गुणयेत् । गुणिते चत्वार्यक्षराणि भवन्ति । तानि चत्वारि चोपरि लघुमुपनीय द्विः कुर्यात् ।

अष्टौ भवन्ति । तानि चाष्टौ शेषगुरुमुपनीयाष्टाभिरेव गुणयेत् । गुणिते च चतुष्षष्टिर्भवति । तद् गायत्र्याः समवृत्तसङ्ख्यापरिमाणम् । अयमेव विधिः सर्वेषां छन्दसाम् । इह गायत्र्याः समवृत्तसङ्ख्यां ज्ञात्वा तत्परस्योष्णिक्छन्दसः समवृत्तसङ्ख्याधिगमे विधिर्वक्ष्यते —

तद्‌द्विः परस्य ॥ २८ ॥

तानि गतानि गायत्र्याः समवृत्तानि भवन्ति । तानि द्विगुणीकृतान्युष्णिहः । तानि द्विगुणीकृतान्यनुष्टुभः । एवं सर्वेषामिति वेदितव्यम् ।

गायत्र्याः समवृत्तसङ्ख्यां ज्ञात्वा पुनरुक्तादीनां षण्णां छन्दसां समवृत्तानि सर्वाणि सहैव ज्ञातुमिच्छतामुपायं ब्रूमः —

द्यूनं तदन्तानाम् ॥ २९ ॥

तद्‌द्विरित्यनुवर्तते । तद् गायत्रीसमवृत्तसङ्ख्याप्रमाणं द्विगुणीकृतं च द्वाभ्यां हीनं तदन्तानां गायत्र्यन्तानां षण्णां समवृत्तसङ्ख्याप्रमाणं भवति । तत्तु षड्‌विंशत्यधिकशतम् । एवं विशेषाणामपि ज्ञेयम् । समवृत्ताधिगमे ब्रूमः —

[1]समवृत्तवर्गमूलोनोऽर्धसमः ॥ ३० ॥

[2]समतुल्येन गुणितो वर्ग इत्युच्यते । [3]गायत्र्याः सम[4]वर्गस्य [5]मूलोनश्चेदर्धसमवृत्ताधिकरणं भवति । समवर्गस्तु

१. MSS. 'समवृत्तो वर्गमूलो मार्धसमः'.
२. MSS. 'समतुलेन'.
३. MSS. 'सागिणः'.
४. MSS. 'वर्गस्तस्य'.
५. MSS 'मूले गाश्चेद्'.

चत्वारि सहस्राणि षण्णवतिश्च । स तु मूलोनश्चत्वारि सहस्राणि द्वात्रिंशदधिकानि ।

उभयवर्गो विषमः ॥ ३१ ॥

मूलोन इति वर्त्तते । उभयेषां समानां वृत्तानां वर्गः स तु मूलोनः विषमवृत्तप्रमाणं भवति । उभयवर्गः कियानिति चेत प्रतिलोमः —

एकं षट् सप्त सप्ताथ सप्त द्वे चैकमेव षट् ।
वर्गः समार्धसमयोर्गायत्र्या कथयेद् बुधः ॥

मूलन्तु चत्वारि सहस्राणि षण्णवतिश्च । तेन हीन उभयवर्गः —

एकं षट् सप्त सप्ताथ त्रीण्येकं द्वे च शून्यकम् ।
प्रमाणं विषमाणां तु गायत्र्या लक्षयेत् बुधः ॥

एवमन्येषां छन्दसां ज्ञेयम ।

अध्वा ॥ ३२ ॥

अध्वा इदानीं वक्ष्यते ।

वृत्तं द्विरेकोनम्[1] ॥ ३३ ॥

वृत्तानि द्विगुणानि एकेन हीनानि अध्वप्रमाणं भवति सर्वेषां छन्दसाम् । तत्र गायत्र्या अध्वयोगं दर्शयिष्यामः । अस्याः सर्वाणि वृत्तानि द्विगुणीकृतानि —

त्रीणि त्रीण्यथ पञ्चापि पञ्च चत्वारि तत्त्वतः ।
चत्वारि त्रीणि चाप्येकं प्रमितान्यङ्गुलानि वै ॥

१. 'द्वारिरेकोनम्' ख. ग.

अङ्गुलान्यष्टौ यवाः, द्वादशाङ्गुलानि वितस्तिः, वितस्ती द्वे हस्तः, हस्तौ द्वौ किष्कुः, द्वौ किष्कू धनुः, धनुःसहस्रे द्वे क्रोशः, चत्वारः क्रोशा योजनम् । तान्यङ्गुलानि हस्तस्य सङ्ख्यया त्रयोदशलक्षाणि अष्टनवतिसहस्राणि चैका सप्ताङ्गुलानि धनुःसंख्यया त्रीणि लक्षाणि चत्वार्ययुतानि नवसहस्राणि च पञ्चशतानि पञ्चविंशतिश्च विंशतिश्च हस्तश्चैकः । योजनसङ्ख्यया त्रयश्चत्वारिंशद्योजनार्धयोजनश्च धनुषां सहस्राणि पञ्चविंशत्यधिकानि पञ्चशतानि च सप्ताङ्गुलाधिको हस्तश्चैक इति ।

स भा हा च येनाक्षरेभ्योऽधिका ॥ ३४ ॥

स खलु गुरुर्भवति । गङ्गा, कुरुते, विभाति, सातत्र, नचरति इत्यादिचतुष्काभ्यां गणाभ्यां षट्कसप्तकाष्टकैश्च मात्रासमूहैर्यथास्वमल्पभेदान्निष्पन्नानां वैतालीयादीनां जातिश्लोकानां लाघवे मात्रा येन प्रमाणेन यावताङ्गेनाक्षरेभ्योऽधिका भवतीति ।

इति जानाश्रय्यां छन्दोविचित्यां
प्रक्रियाध्यायः षष्ठः ॥

समाप्तेयं छन्दोविचितिः ॥

---

१. 'अङ्गुलमष्टौ' ख. ग
२. 'मात्रा च ङ' क.

मकुर्वतम्। मातॄणामपि अभेदं अविशेषं प्रमदं सन्तोषं अनुमतं मन्त्रिमोदं व्यधातं अकुर्वतम्। स्फीतां प्रवृद्धां प्रजानां प्रीतिं अदिशतं अदात-तम्॥ ३॥

रामेति। मे तनूजः अयं रामः भुवं अवितुं अलम्। तत् तस्मात् अत्र अयोध्यायां तं रामं सामोदं अभिषिञ्चन्नहं मुनिवनं संश्रयिष्ये इत्येकदा प्रेम्णा स्नेहेन उदञ्चन्ती उद्गता गीर्यस्मात् तादृशेन ते पित्रा उक्ता वामदेवादयो मुमुदिरे। एतद्जानन् त्वं तु ह्रीमान् लज्जावान् इयं किमिति ततां व्याप्तां किंवदन्तीं जनश्रुतिं अचिन्तीः॥ ४॥

आहूतेति। नृपो दशरथः आहूतानां आमन्त्रितानां अनेकराजन्यकानां अनेकराजश्रेष्ठानाम्। स्वार्थे कः। सदसि सुमन्त्रेण उपनीतं त्वां स्वाकूतं स्वाभिप्रायं बोधयित्वा वसिष्ठेन उपदिष्टान् पदार्थान् समभृत संबभार। त्वं साकेते नाकं स्वर्गं तर्जयन्ति भर्त्सयन्तीति नाकतर्जिनः तादृशाः ध्वजपटपटलाः पताकासमूहा यस्मिन् तादृशे सति निशि रात्रौ स्नेहेन तैलेन आ समन्तात् दीप्ताः प्रकाशमानाः प्रदीपा यस्मिन् तादृशे सुरसदने देवालये क्वापि सभार्यः दर्भशायी च उपावसः उपवासमकरोः॥ ५॥

तीर्थेति। वसिष्ठः तैः प्रसिद्धैः वामदेवादिभिरपि सार्धं त्वा त्वां अभिषेक्तुं तीर्थानां जलावतराणां अम्भोभिः जलैः मणिकलशशतं रत्नकुम्भशतं पूरयन् सुमुहूर्ताप्तिं शोभनमुहूर्तप्राप्तिं आलोच्य विचार्य तस्थौ स्थितवान्। वाद्यरावे वाद्यघोषे दिगन्तान् मुखरयति मुखरान् कुर्वति सति जनैः संज्ञया हस्ताद्यैरर्थसूचनया। 'संज्ञा स्याच्चेतना नाम हस्ताद्यैरर्थसूचना' इत्यमरः। वाच्यं वचनीयं अज्ञायि ज्ञातम्। 'ज्ञा अवबोधने' इति धातोः कर्मणि लुङ्। वेद्यां परिष्कृतभूम्यां सुप्ता चासावुत्थिता चेति सुप्तोत्थिता मन्थरा नाम कुब्जा त्रिवक्रा अत इतो व्यचलत् चचार॥ ६॥

सैषेति। सैषा कुब्जा रुषा रोषेण त्वद्राज्यलाभे एव उत्सवे मुदिता तुष्टा मतिर्यस्याः सा तथोक्तां तां अत एव आत्तभूषां गृहीताभरणां

कैकेयीं दुर्वचोभिः दुष्टवाग्भिः **रोपः** कोपः **आतङ्को** दुःखं **अभ्यसूया** ताभिः कलुषं कृतं **कलुषितं हृदयं** यस्याः तथाभूतां **कुर्वती** विदधती **क्रोधागारे** कोपोचितालये **अशीशयत्** शाययति स्म । **इयं कैकेयी अपि तं पार्थिवेन्द्रं** दशरथं इति **प्रार्थयत्** । **तव वचनं अमिथ्या** सत्यं **यदि** तदा **वाचा वितीर्णौ** दत्तौ **वरौ मे** मह्यं **दातव्यौ** देयौ ॥ ७ ॥

हे रामेति । **हे रामे** सुन्दरि! । 'सुन्दरी रमणी रामा' इत्यमरः । **त्वं ब्रूहि** वद, **अहं दद्यां** वितरेयमिति **नृपे वदति** सति । **दूरे** स्थित-मिति शेषः । अविचारितमित्यर्थः । **ते** तव **स्वपुत्रस्य** भरतस्य **अष्ट षट् च** चतुर्दशेत्यर्थः । **हायनान्** वर्षान् । 'अत्यन्तसंयोगे च' इति द्वितीया । **वनी** वनं **अवनिर्भूमिः** तयोः **निवासं** स्थितिम् । तव वनवासं भरतस्य सार्वभौमत्वेन अवनिनिवासं चेत्यर्थः । **गदितवती** उक्तवती । **स्वाराजा** इन्द्रेण **आराधितः** पूजितोऽसौ **अवनिपो** राजा **सुचिरं सान्त्वयन्** आश्वासयन् **अपि दाराणां** भार्यायाः । 'जाया पुंभूम्नि दाराः' इत्यमरः । **अस्याः** कैकेय्याः **ईदृक्** ईदृशं **हृदयं इतरथा** अन्यथा **कर्तुं अनीशः** असमर्थः **आर्तो** दीनः सन् **मुमूर्च्छ** मोहमगमत् ॥ ८ ॥

आर्तमिति । **अथ त्वं स्वतातं** दशरथं **आर्तं** दीनं **श्रुत्वा सविधगः** समीपगः सन् **मध्यमाम्बां** कैकेयीं **दृष्टवान्** । **वार्तां** वृत्तान्तं **पृष्टा**, त्वयेति शेषः, **अनच्छा** कलुषमतिः **सा** कैकेयी **हे वत्स! त्वमधुना वनभुवं गच्छेत्यवदत्** । त्वमस्याः कैकेय्याः **इच्छां विदित्वा मनसि नृपसुखं तुच्छं** निस्सारं **एव अनुगच्छन्** विचारयन्नित्यर्थः । **क्षौम-हेमाभरणं** दुकूलसुवर्णाभरणं **उज्झित्वा** त्यक्त्वा **अविकृतिः** तदीयवच-नश्रवणजन्यवदनग्लान्यादिविकाररहितः सन् **वल्कलं** चीरं **पर्यधत्थाः** बिभर्षि स्म ॥ ९ ॥

आश्वास्येति । **आश्वास्य** सान्त्वयित्वा । कौसल्यासुमित्रे इत्यर्थः । **इतरयोर्मात्रोः** कौसल्यासुमित्रयोः **चरणं आनम्य मूर्च्छापाये** मोहान्ते **प्रणम्रः पितुः** दशरथस्य **अनुमतिं** सम्मतिं **आप्य** प्राप्य जानकीलक्ष्म-णाभ्यां सह **शताङ्गं** रथम् । 'शताङ्गः स्यन्दनो रथः' इत्यमरः । **अधिरूढः यातः आयोध्यकैः** अयोध्यावासिभिः **सरुदितं** सरोदं यथा तथा **उपरुद्धो**

निवारितः अर्धरात्रे निशीथे सुमन्त्रस्य स्वातन्त्र्यात् स्वाधीनत्वात् शृङ्गिवेरं गुहनगरं इतः प्राप्तः त्वं पाहि पालय ॥ १० ॥

(११)

अविदूरेति । भवान् सीतया सह अविदूरे समीपे निवेशितात् स्थापितात् रथात् अवतीर्णः अपरं अन्यं अवरोधं शुद्धान्तमिवेत्युपमा। 'शुद्धान्तश्चावरोधश्च' इत्यमरः। एतेन सुखं द्योत्यते। सुखात् सुखं प्राप्येत्यर्थः। ल्यब्लोपे पञ्चमी । इङ्गुदीतरोः इङ्गुदीवृक्षस्य तले अधःप्रदेशे अधिशिश्ये अधिशयितवान्। तले सुप्वापेत्यर्थः। 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम् ॥ १ ॥

अभिवीक्ष्येति । शुभः शोभनो वाग्विभवो यस्य स तथा । प्रसन्नधीः गुहः स्वगृहं प्रत्यागतं आयातं सदारसोदरं सभार्यानुजं भवन्तमभिवीक्ष्य दृष्ट्वा अधिगतं प्राप्तं निधिं यथा तथा उपतस्थे सिषेवे इत्यर्थः ॥ २ ॥

अथेति । नितरां बद्धं नद्धं सौहृदं मैत्री येन स तथा । निषादानां व्याधानां नायकः पतिः स गुहः श्रुतं निशमितं वृत्तं चरित्रं येन स तथा । अनुतप्तं सन्तप्तं मनो यस्य स तथोक्तः सन् सुमित्रातनयस्य लक्ष्मणस्य मित्रतां समानशे प्रापेत्यर्थः । 'अशू व्याप्तौ' इति धातोर्लिट् ॥ ३ ॥

कृतेति । घनैः सान्द्रैः कचैः केशैः कृताः चारवो जटा येन स तथोक्तः । घृतहोमेन ऋद्धाः प्रवृद्धाः शिखा ज्वाला यस्य स घृतहोमर्धशिखः तथाभूतश्चासावग्निश्चेति घृतहोमर्धशिखाग्निः तद्वत् ज्वलन् प्रकाशमानः ससोदरः सानुजः त्वं जहदश्रू त्यजन्नेत्रजले दृशौ नेत्रे यस्य तादृशं गुहं, सुमन्त्रस्यापीदं विशेषणम् । सुमन्त्रमप्यापृच्छ्य अगाः अगमः ॥ ४ ॥

प्रियेति । परिशुद्धः भावः मनो यस्याः तथाभूतया प्रियया पत्न्या सह नियः मार्गाभ्युदयो मार्गाभिवृद्धिः यस्य स तथा सानुजः प्रयतः पूतः त्वं नृपो राजा अन्यां अपरां श्रियं राज्यलक्ष्मीमिवेत्युपमा। विबुधापगां गङ्गां पृष्ठतः अकरोः अतिक्रान्तवानित्यर्थः ॥ ५ ॥

स्वपरेति । त्वया **स्वपरत्वतमोपनुत्तये** पाञ्चभौतिकेषु शरीरादिषु । स्वशरीरे स्वत्वबुद्धिः परशरीरे परत्वबुद्धिः ताभ्यां यत् **तमः** अज्ञानं तस्य **अपनुत्तये** अपनोदनाय । अथवा स्वत्वपरत्वरूपं यत् तमः तस्य अपनुत्तये । **शफरो** मत्स्यविशेषः **ध्वजः** केतुर्यस्य सः कामः, तेन **दुर्गा** दुरासदा चासौ **दुर्गभूः** पुरप्रदेशश्च जितेन्द्रिय इत्यर्थः । 'दुर्गं तु नगरे पुरे' 'शैलादिदुर्गमस्थाने त्रिषु त्वेष दुरासदः' इति **नानार्थरत्नमाला** । तथाभूतः **सः** प्रसिद्धः भरद्वाजमुनिः आश्रितः । 'श्रीञ् सेवायाम्' इति धातोः **कर्मणि निष्ठा** । सच्चिदानन्दरूपस्य भगवतः स्वपरत्वतमोऽभावेऽपि मनुष्यजातावत्तीर्णत्वात् तद्वदनुकरणमिति बोध्यम् । **उपरक्तेन** उपरागं प्राप्तेन **इन्दुना** चन्द्रेण **बुधो यथा** तथेति पूर्वेण सम्बन्धः । चन्द्रस्य बुधसान्निध्ये उपरागाभावाद्विति भावः ॥ ६ ॥

महयन्निति । **मुदितः** तुष्टः **महयन्** पूजयन् **सहासिकायां** सहासने **स्पृहयालुः** स्पृहान्वितः । 'स्पृहिगृहि' इत्यादिना **आलुच्** । **सः** भरद्वाजः । **तव** चित्रकूटं गच्छतीति **चित्रकूटगा ताम्** । चित्रकूटगमनयोग्यामित्यर्थः । **सरणिं** मार्गं **करणीयं** कर्तव्यं **समस्तं** सर्वं **च आदिशत्** उपदिदेश ॥ ७ ॥

नवेति । **वने नव पञ्च** चतुर्दशेत्यर्थः । **वत्सरान्** वर्षान् । अत्यन्तसंयोगे द्वितीया । **मुनिवृन्दं** ऋषिसमूहं **रक्षतीति** मुनिवृन्दरक्षी तादृशस्य **तव पुण्यं अयुतं** दशसहस्रं **शरदः** समाः । इदमप्यत्यन्तसंयोगे द्वितीया । **कृतं** आचरितं **तपः व्यतिशेतां** विशेषेणातिशय्य वर्ततामिति **च मुनिः** भरद्वाजः **अब्रवीत्** ॥ ८ ॥

अमुनेति । **सानुजः** त्वं **अमुना** भरद्वाजेन **कथितेन** उक्तेन **वर्त्मना** मार्गेण **यमुनां** कालिन्दीमप्यतिलङ्घ्य अतिक्रम्य **अनाहिता** अकृता **मैथिल्याः** सीतायाः **व्यथा** दुःखं येन तथाभूतः सन् **विगता** अपगता **मुनयो** यस्मात् तादृशे **वने क्षपां** रात्रिं **अक्षपयः** अनयः ॥ ९ ॥

अपरेद्युरिति । त्वं **अपरेद्युः** अन्येद्युः **अनेकैः** बहुभिः **तापसप्रवरैः** तपस्विश्रेष्ठैः **अध्यासितं** अधिष्ठितं **तं गिरिं** चित्रकूटं **एत्य** प्राप्य **अमनाक्** अनल्पं **तुष्टधीः** सन्तुष्टचेताः सन् **शमनार्थं शमं** अन्तरिन्द्रियनिग्रहं **संयमं** सम्यग्भूतं यमम् । यमाख्यं योगाङ्गविशेषमित्यर्थः । **मौनं अगाः** प्रापः ॥ १० ॥

अनुवृत्तीति । अनुवर्तयत्यनुसरतीत्यनुवृत्तिः भृत्यः तस्य धुरं भारं धारयतीति **अनुवृत्तिधुरन्धरः** तादृशः **अनुजो** यस्य स तथा । मुनिपत्नीषु ऋषिजायासु कृतं सौहृदं यया सा **मुनिपत्नीकृतसौहृदा** तादृशी (प्रिया) जाया यस्य स तथा । निवृत्तिः व्यावृत्तिर्यस्य नास्ति तद**निवृत्ति** तादृशं **फलं** यस्य तत्तथा । तादृशमविनाशिफलमित्यर्थः । **तपश्चरन्** गच्छन् । 'चर गतिभक्षणयोः' इति धातोर्लटः शत्रादेशः । त्वं मे **अनुदृश्यो भव** । मयाभिवीक्षणीयो भवेत्यर्थः । 'कृत्यानां कर्तरि वा' इति षष्ठी ॥ ११ ॥

(१२)

करेति । **करापविद्धस्य** हस्तापगतस्य **मणेः** रत्नस्येवेत्युपमा । ते **दुरापतां** दुष्पापतां **विमृशन्** विचारयन् **विषण्णो** विषादयुक्तः सः **सुमन्त्रः सुरापगायाः** तटादुत्तीर्य उद्गम्य **पुराय यातः** ॥ १ ॥

तद्व्याहृतैरिति । **तेन** सुमन्त्रेण **व्याहृतैः** उक्तैः **त्वद्वनयानवृत्तैः उद्वेलः** उन्मर्यादः **तापो** यस्य स तथा **नृपः** **त्वां व्यलपत्** पर्यदेवयत । जरठः वर्षीयान् अहं **वृद्धरघुव्रतं** वृद्धानां रघूणां व्रतं नियमं **अध्यापयन्** पाठयन् **अद्यापि हा जीवामी**ति पूर्वेण सम्बन्धः ॥ २ ॥

अन्धेति । **परिपाकिनं** फलवन्तमित्यर्थः । **तं अन्धर्षिशापं अन्तर्वहन्** । दुःखेन वोढुं शक्यो **दुर्वहः देहदाहः** शरीरतापो येन स तथा । **धन्यः** सुकृती **रमण्यां** कैकेय्यां **अनृणः** ऋणरहितः, वरदानादित्यर्थः । **ते पिता** तव नामैव पीयूषं अमृतं भुङ्क्ते इति **त्वन्नामपीयूषभुक्** । राम रामेति जपन्नित्यर्थः । **नाकं** स्वर्गमाप ॥ ३ ॥

दिवेति । **इयं अयोध्या दवीयान्** दूरस्थितः **हरिणाङ्कः** चन्द्रो यस्याः सा तथोक्ता । तथा **प्रवासितः** दूरदेशवासितः **अहस्करः** सूर्यो यया सा तथोक्ता । तया सूर्याचन्द्राभ्यां रहितयेत्यर्थः । **दिवा** व्योम्ना **उपमेया** उपमितुं शक्या । तद्वन्निष्प्रभेत्यर्थः । **कियन्तं कालम्** । इदमत्यन्तसंयोगे द्वितीया । **अभूत्** । **हेति** विषादे । **कः विधेः** दैवस्य **दुर्विलासं** दुष्टभावम् । 'विलासो भावलीलयोः' इति **नानार्थरत्नमाला** । **लङ्घयेत्** ॥ ४ ॥

श्चकार अपसारयामासेत्यर्थः । स्त्रीवधो न कर्तव्य इति बहुभिरुक्तत्वादिति भावः ॥ ९ ॥

स्वार्थेति । भरतः स्वार्थे स्वाभिषेकार्थमित्यर्थः । भूतं पार्थिवनाया राजत्वस्य आप्तेः प्राप्तेः तीर्थं पात्रं तीर्थोदकं जलावतारतोयं ते मूर्धनि अभिषेक्ष्यन् अभिषेक्तुमिच्छन् समस्तैः सकलैः सार्धं प्रतस्थे प्रस्थितवान् । स दर्श मे वार्तं आरोग्यम् । 'वृत्तिमञ्जीरुजो वार्तं त्रिषु चारोग्यफल्गुनोः' इति नानार्थरत्नमाला । वर्तय जनयेत्यर्थः ॥ १० ॥

(१३)

आगङ्गमिति । आगङ्गं गङ्गापर्यन्तं सुतरां विहितः कृतः मार्गेषु सम्यग्भूतः प्रकृष्टः मार्गः मार्गणं येन स तथा तम् । भावे घञ् । भवति वाचश्चाङ्गञ्च वागङ्गम् । अङ्गशब्देन सूक्ष्माङ्गं गृह्यते । तेन मन इत्यर्थः । प्रयान्तं गच्छन्तं पतङ्गस्य सूर्यस्येदं पातङ्गम् । 'तस्येदम्' इत्यण् । 'पतङ्गौ सूर्यशलभौ' इत्यमरः । कुलं वंशं विभूषयन्तं प्रकाशयन्तं तं भरतं घनाः सान्द्राः जनौघाः जनसमूहाः सातङ्कं सदुःखं यथा तथा समनुययुः समनुजग्मुः ॥ १ ॥

तन्वान इति । तं गुहमपि वशे अधीने तन्वानः कुर्वाणः गुणैः मुदितात् तुष्टात् मुनेः भरद्वाजात् सपर्यां पूजां गृह्णानो गृह्णन् आददानः एकं अद्वितीयं बहुधा बहुप्रकारेण तन्वानं कुर्वन्तम् । भक्तानुग्रहार्थं विविधावतारान् कुर्वन्तमित्यर्थः । भवन्तं बहुमन्वानो बहुमानयन् सः भरतः तृषितः पिपासित इवेत्युपमा । मार्गं पन्थानमत्यगादतिक्रान्तवान् । तृषितो जलार्थं यथा मार्गमधिगच्छति तथा मार्गमत्यगादिति ॥ २ ॥

धर्मस्थमिति । धर्मे तिष्ठतीति धर्मस्थः तथाभूतम् । रहः विजने रमण्या जनकजया वपुषि शरीरे रसानां सम्मर्दं सङ्घर्षं बिभ्रतं वहन्तं आत्मनः स्वस्य बिम्बत्वं दधतमिवेत्युत्प्रेक्षा । स्वसदृशमित्यर्थः । अनुजेनोपलक्षितं भवन्तं उन्मत्तः स्वधियं स्वबुद्धिमिवेत्युपमा । सं भरतः अध्यगात् अधिजगाम ॥ ३ ॥

आचारेति । आचाराणां राज्यरक्षादिकार्याणां अनुपदं पदे पदे। कुशलमिति शेषः । विचार्य संचिन्त्य पृष्टः असौ भरतः वाचा प्रमीतं मृतम् । 'मीञ् हिंसायाम्' इति प्रपूर्वाद्धातोः कर्तरि निष्ठा । पितरं त्वां अबूबुधत् बोधयामास । त्वं करुणरसे शोकरसे सति क्रोशार्धं गव्यूतिपादं देशं विलाप्य परिदेव्य क्लेशात् दुःखात् बहु विलपन् परिदेवनं कुर्वन् निवापं पितृदानं व्यधाः अकृथाः । 'निवापः पितृदानं स्यात्' इत्यमरः ॥ ४ ॥

नानेति । नानादिक्षु वितता व्याप्ता शुक् शोको यस्य स तथा तेन । स्वेनानुजेन प्रकृतिजनैः मन्त्रिजनैः पुरोहितैः वसिष्ठादिभिः अर्थितः त्वं स्त्रियै हितः स्त्रैणः स्त्रीजित इत्यर्थः । 'स्त्रीपुंसाभ्याम्' इत्यादिना नञ् प्रत्ययः । दशरथादित्यर्थः । अपहृतमपि अनाथं नृपपदमाप्तुं प्राप्तुं आचतुर्दशाब्दं चतुर्दशवत्सरपर्यन्तं नैहथाः नैच्छः ॥ ५ ॥

प्रत्येयमिति । प्रत्येयं प्रतियातुं शक्यं प्रियं ज्येष्ठमित्यर्थः । प्रणम्य उचितं यथा तथा याचन् प्रार्थयन् सुरर्षिसङ्घैः प्रत्येकं बहुमतधीः स भरतः एकं त्वां चलयितुं नालं न पर्याप्तः । आत्मनः स्वस्य उद्योगं मोघं निष्फलं निरचिनुत निश्चितवान् । भवन्निति सम्बुद्धिद्योतकम् ॥ ६ ॥

पाटीरमिति । निजयशसा स्वकीयकीर्त्या दिशां पाटीरं चन्दनं विलिम्पन् प्रदिहन् कोटीरे शिरसि कृतभवदीयपादुकः निक्षिप्तभवदुपानत् एकं त्वां प्रणम्य व्रतनिपुणः समर्थः नन्दिग्रामे अवनिं भूमिं अवन्निव रक्षन्नेव उवास ॥ ७ ॥

मातॄणामिति । ऋणस्य अनुबन्धात् सम्बन्धात् यातॄणां माण्डवी-प्रभृतीनाम् ।

'भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् ।'

इत्यमरः । परिचरणात् शुश्रूषणात् अनातुराणां अदीनानां तिसृणां मातॄणामपि अपथ्यं अहितं सा शुक् शोकः कथासु अशिष्यत । कथन-मात्रमेवापथ्यशोकयोरिति भावः । अहो इत्याश्चर्ये । तथाहि — भिषजि वैद्ये नृपे राजनि च सति पुरे अन्तःपुरे अन्तश्च बहिर्वा पथ्यं क्व । सर्वत्र पथ्यमेवेति भावः ॥ ८ ॥

गण्यन्त इति । याता गता निमिषकलादयः निमिषः निमेषः कला त्रिंशत्काष्ठारूपा ते आदौ येषां ते ।

'अष्टादशनिमेषास्तु काष्ठाः त्रिंशत्तु ताः कलाः ।'

इत्यमरः । आदिशब्देन त्रुट्यादयो गृह्यन्ते । गण्यन्ते सङ्ख्यायन्ते स्म । भरतेनेत्यर्थः । सचिववराः मन्त्रिश्रेष्ठाः हितं कार्यं भण्यन्ते उच्यन्ते स्म । स्वमनसि निर्णीतिः निश्चयः पादुकाप्रणामे पादुकानमस्कारे । बभूवेति शेषः । अत्र भूतधात्र्यां भरत इति वर्ण्यः स्तुत्यः अभूत् ॥ ९ ॥

निर्निद्रानिति । तादृक् तादृशं भरतवपुः यस्य स तथा त्वं विधिषु सत्कर्मानुष्ठानेषु निर्निद्रान् निद्रारहितान् । तत्परानित्यर्थः । भवद्रतान् त्वत्परान् नन्दिग्रामात् इह अस्मिन् केरलभूमौ भार्गवेण भृगुपतिना रामेण उपहृतान् आनीतानित्यर्थः । द्विजेन्द्रान् ब्राह्मणश्रेष्ठान् धिनोषि प्रीणयसि । स त्वं अस्मत्सन्तापं व्यपनय नाशय ॥ १० ॥

(१४)

तोषितेऽपीति । शरभङ्गेन प्रेषितेन शुभेन पादुकाया आकृतिं आकारं धरतीति पादुकाकृतिधरं तादृशेन तपसेव शुभेक्षा । पादुकायुग्मेनेति शेषः । भरते तोषिते अति त्वं ततः तस्मात् प्रदेशात् परतः अन्यत्र यातुं गन्तुं मतिं आधाः अकृथाः ॥ १ ॥

दीक्षित इति । अवलिप्तान् गर्विष्ठान् राक्षसान् निशमयन् आकर्णयन् । मुनीनां साकाशादित्यर्थः । अत एव मुनिजनस्य अवनकृत्ये रक्षाकार्ये सञ्जाता दीक्षा व्रतं यस्य स तथा । 'तदस्य सञ्जातं तारकादिभ्य इतच्' इति इतच् प्रत्ययः । त्वं भगवन्तं अत्रिं ईक्षितुमना द्रष्टुमनाः सन् चित्रकूटनितम्बात् अयासीः अगमः ॥ २ ॥

तमिति । त्र्यवयवो लोकः त्रिलोकः तस्य पत्युः तातस्य ममाख्यया नाम्ना आमन्त्रितं अभिवादितमित्यर्थः । मुनिवर्यं मुनिश्रेष्ठम् । अत्रिमित्यर्थः । परिचरन् शुश्रूषयन् त्वं सत्यकृत्ययोः समासक्तिर्यस्य तत्तथा । तादृशं मनः यस्य स तथा सन् पितृविपत्तिजं जनकमरणजातं आधिं दुःखं अत्यजः ॥ ३ ॥

जानतीति। जानती विदुषीत्यर्थः। जानकी बहुतपोभिः अमेयां अपरिगण्यां अनसूयां अत्रिपत्नीं परिचरन्ती शुश्रूषयन्ती अत्र कानने तत्र घ्राणनेत्रसुभगां नासानयनरुचिराम्। कामप्यानिर्वचनीयामित्यर्थः। आभां शोभां अभृत बिभर्ति स्म॥ ४॥

हिण्डमानामिति। ऋषिषण्डस्य मुनिसङ्घस्य शरण्यं शरणार्हं पुण्यं दण्डकाख्यमरण्यं वनं हिण्डमानं गच्छन्तम्। 'हिडि गत्यनादरयोः' इति धातोर्लटः शानजादेशः। मुण्डं राहुं खण्डयतीति मुण्डखण्डनम्। 'मुण्डो दैत्यान्तरे राहौ' इति नानार्थरत्नमाला। त्वामवाप्तुं चण्डं शूलं बिभर्तीति चण्डशूलभृत् विराधः इत्युवाच॥ ५॥

काविति। नरौ चामू युवानौ चेति नृयुवानौ युवां कौ कथयतम्। मयेदं काननं अगातं अगमतम्। कस्मादित्यर्थः। हेमतामरसं सुवर्णपद्ममिव कोमलः मनोज्ञः कायः शरीरं यस्याः सा तथोक्ता इयं कामिनी युवयोः नोचिता॥ ६॥

इतीति। इत्युक्तप्रकारेण कटुरवं श्रोत्रदुस्सहशब्दं यथा तथा कथयन् ब्रुवाणः असौ विराधः वां मध्यतः हृता सीता येन तथा तादृशः सन् दिवं आकाशमगात् गतवान्। सद्यः तत्क्षण एव तव बाणैः शरैः दलितो विदारितः जनकजां उत्सृजन् त्यजन् वां अहरत् हृतवान्॥ ७॥

स्कन्धेति। वां स्कन्धं अंसम्। 'स्कन्धो भुजाशिरोंसोऽस्त्री' इत्यमरः। अधिरोप्य चरन् सञ्चरन् वन्ध्यं निष्फलं चक्षुर्नेत्रं तस्य तादृशः अहिः सर्पः हारधिया मुक्ताबुद्ध्या। उपलभिति शेषः। इवेत्युपमा। छिन्नौ विटपौ शाखे इव बाहू करौ यस्य स तथा। तादृशः सन् भिन्नभाण्डवत् भिन्नो विदारितः, नष्ट इत्यर्थः, भाण्डं वणिङ्मूलधनं यस्य स तथा। तद्वत् निपपात पतितवान्। 'भाण्डन्तु मार्जने वणिङ्मूलधनेऽमत्रे' इति नानार्थरत्नमाला। तद्वन्ननाशेत्यर्थः। नष्टमूलधनो वणिक् यथा ननाश तथा छिन्नबाहुर्विराधः ननाशेति भाव॥ ८॥

तत्रेति। तत्र तस्मिन् प्रदेशे शस्त्राणां आयुधानां शतेन दुष्करः दुःखेन कर्तुं शक्यो घातो वधो यस्य स तथा तं गतजीवं मृतमित्यर्थः। गर्ते अवटे पातितम्। 'गर्तावटौ भुवः श्वभ्रे' इत्यमरः। कृत्वेति शेषः।

सम्प्रमार्जितः प्रमथितः । त्यक्त इत्यर्थः । **धनाधिपशापो** वैश्रवणशापो येन स तथा तं **तुम्बुरुं त्रिदशलोकं** स्वर्गं **अनैषीः** प्रापयः ॥ ९ ॥

त्वामिति । **शरभङ्गे निकटे** समीपे **यातुसिंहानां** राक्षसश्रेष्ठानां शरभो नाम हिंस्रो मृगविशेषः तम् । 'नैऋतो यातुरक्षसी' इत्यमरः ।

'सिंहो मृगेन्द्रे राशौ च श्रेष्ठे राजादिकात् परे ।'

इति । 'अथ शरभोऽष्टापदे च मृगान्तरे' इति च नानार्थरत्नमाला । **त्वां निरीक्ष्य अग्नौ हुतं अङ्गं** शरीरं येन स तथा तस्मिन् सति **अरण्ये** वने **प्रीतैः** सन्तुष्टैः **तापसैः** तपस्विभिः **नुतः** स्तुतः त्वं **चिरं अव्याः** रक्षेः ॥ १० ॥

(१५)

कृतीति । **कृती** कुशलः त्वं **प्रतीक्षितां आत्मनः** स्वस्य **आगमनं** येन स तथा तं **सौम्यं मुनीन्द्रं सुतीक्ष्णं समुपेत्य तं आश्रितः अन्यान् मुनींश्च** निषेव्य **क्रमात् दश हायनानि** वर्षान् **अनैषीः** प्रापयः ॥ १ ॥

व्रतेति । **व्रतादिषु निष्णातया** निपुणया **मुनीन्द्रपत्न्या** सुतीक्ष्णभार्यया **प्रसाद्यमाना** सन्तोष्यमाणा अत एव शोभनं मनो यस्याः सा सुमनाः, सेवाचरन्तीति **सुमनायमाना** । वनवासात् श्वशुरमरणाच्च दुर्मना अपीत्यर्थः । 'कर्तुः क्यङ् सलोपश्च' इति क्यङि 'ओजसोऽप्सरसो नित्यमितरेषां विभाषया' इति सलोपे लटः शानजादेशे 'आने मुक्' इति मुगागमे च सुमनायमानेति रूपम् । **सीता तु तथा अतियातं** अतिक्रान्तं **समयं** कालं **कथान्तरे** त्वद्वचनात् त्वद्वाक्याद् **अजानात्** वेत्ति स्म ॥ २ ॥

अजस्रेति । **अजस्रं** नित्यं **निर्धूते** नितरां कम्पिते त्यक्त इत्यर्थः, **रजस्तमसी** येन तत्तथा तादृशम् । 'शेषाद्विभाषा' इति कप् । **विशुद्धे** मायानिर्मुक्ते **सत्त्वे** ज्ञानरूपे **अद्वये** ब्रह्मणि या **धूः** अग्रं तद्वहतीति **विशुद्धसत्त्वाद्वयधुर्या** तादृशा **चर्या** अनुष्ठानं यस्मिन् तत्तथा तत् ब्रह्मनिष्ठानुष्ठानमित्यर्थः । **अकृत्रिमेण** स्वतः सिद्धेन **स्वादिम्ना** माधुर्येण **हृद्यरूपं** हृदयप्रीतिकरात्मकम् । 'पृथ्वादिभ्य इमनिच्' इति इमनिच्प्रत्ययः । वने तिष्ठतीति **वनस्थः** वानप्रस्थ इत्यर्थः, तस्य **धर्मं** बहु यथा तथा **पर्यचैषीः** परिचिनोषि स्म ॥ ३ ॥

स्वशीलेति । स्वशीलेन निजस्वभावेन विस्मापिताः विस्मयं प्रापिताः तापसौघाः तपस्विसङ्घाः येन स तथा । नितान्तं अत्यन्तं वशी निस्तन्द्रा निष्प्रमीला मतिर्यस्य स तथा । स लक्ष्मणोऽपि ते वरिवस्यया शुश्रूषया। 'वरिवस्या तु शुश्रूषा ' इत्यमरः । दिनानि दिवसान् क्षणोपमेयानि क्षणसदृशानीत्यर्थः । निनाय नीतवान् ॥ ४ ॥

इहत्येति । त्वं इह अस्मिन् देशे विद्यमानं इहत्यम् । 'अव्ययात्त्यप्, इति त्यप् । मुनीन्द्रवृन्दं आराध्य सम्पूज्य अगस्त्यस्य सोदर्यं सहजं सुतीक्ष्णमित्यर्थः । अभिप्रणम्य नमस्कृत्य शक्रः इन्द्रः बृहस्पतिं सुराचार्यमिवेत्युपमा । उग्रः रौद्रः तपःप्रभावो यस्य स तथा तं अगस्त्यमभ्ययासीः अभ्यगमः ॥ ५ ॥

प्रीतेति । वातापिर्नाम असुरः तस्य जेता मुनिः अगस्त्य इत्यर्थः । प्रीताशयः तुष्टाशयः सन् सविता सूर्यः पुत्रं मनुमिवेत्युपमा । सीतानुजोपेतं सीतालक्ष्मणसहितं त्वां अनुगृह्णन् । तवानुग्रहं कुर्वन्नित्यर्थः । पैतामहास्त्रं ब्रह्मास्त्रं अच्युतचापो वैष्णवं धनुः तूणी शरधिः ताः व्यतरत् दत्तवान् ॥ ६ ॥

रक्षांसीति । इक्ष्वाकूणां इक्ष्वाकुवंशोत्पन्नानां नाथः पतिः तस्य सम्बुद्धिः । बलेन यो दर्पोऽहङ्कारः तं भजन्तीति बलदर्पभाञ्जि रक्षांसि राक्षसान् हत्वा इह अस्मिन् वने मुनीनां रक्षां विधेहि कुरु इति ऋषिभिः उक्तः त्वं अमीभ्यः ऋषिभ्यः राक्षसवधं प्रत्यशृणोः प्रतिश्रुणोषि स्म॥ ७ ॥

भ्रातेति । पयोधेः समुद्रस्य पाता मुनिरगस्त्य इत्यर्थः । परिचरतीति परिचारकः कनीयान् कनिष्ठः भ्राता एषा सीता । चाकारश्चार्थे परीतापं दुःखम् । 'उपसर्गस्य' इत्यादिना दीर्घः । नोपैतु न प्राप्नोतु । गोदावरीमेत्य प्राप्य वसेति त्वां अन्वजानात् आज्ञां कृतवान् ॥ ८ ॥

स्वर्गमिति । सः शरभङ्गयोगी स्वर्गं यातः । अत्र अस्मिन् प्रदेशे स्वर्यः माण्डकर्णिर्नाम मुनेः वश्यः वशं गतः । मत्तपसां गोप्तृता रक्षकत्वं त्वयि । भवतीति शेषः । इत्यगस्त्यः त्वामुक्त्वा मौनं अगात् । तूष्णीमभवत् ॥ ९ ॥

तदुक्तीति । तस्यागस्त्यस्य उक्तिभिः वाग्भिः तृप्तः तृप्तिं गतः त्वं व्रतेषु स्थिरं दृढं व्यवसायः ज्ञानं बन्धुर्यस्य स तथा तं समभिप्रणम्य सम्यङ् नत्वा पञ्चवटीं प्रतस्थिषे निर्जगमिथ । हृदि स्थितः त्वं मां अव रक्ष ॥ १० ॥

(१६)

खलेति । खलानां दुष्टानां निशिचराणां घाताय वधाय बद्धा कक्ष्या प्रतिज्ञा येन स तथा ।

"कक्ष्या कच्छे वरत्रायां काञ्च्यां गेहप्रकोष्ठके ।
सन्ध्यासन्धौ पितृप्रस्वां प्रतिज्ञासीमयोरपि ॥"

इति नानार्थरत्नमाला । कलशभवस्य अगस्त्यस्य आश्रमतः आश्रमात् । 'पञ्चम्यास्तसिल्' इति तसिल् । निरेत्य निर्गम्य मार्गे कुलिशं पविं बिभर्तीति कुलिशभृत् इन्द्रः तेन अविलोकितस्य अदृष्टस्य अचलस्य पर्वतस्य आभेवाभा यस्य तादृशम् । सपक्षपर्वतसदृशमित्यर्थः । जनकस्य दशरथस्य प्रियं सखायं जटायुं ऐक्षथाः अपश्यः ॥ १ ॥

अरुणेति । अरुणकुलात् सूर्यवंशात् जायत इति तथोक्तौ तयोः भवतः पितुर्दशरथस्य ममापि तरुणासु तारुण्ययुक्तासु दशासु अवस्थासु सखित्वमभूत् ; इति परिणतं परिणामं गतं वयो यौवनं यस्य स तथा तेन वृद्धेनेत्यर्थः । नीतं प्रापितं तातस्य दशरथस्य स्मरणं यस्याः सा तथा । तादृशा मतिर्यस्य स तथा त्वं तेन जटायुना सख्यं तनुषे स्म चकर्थ ॥ २ ॥

विविधेति । विविधाभिः वनलताभिः उपगूढाः छन्नाः वृक्षाः यस्मिन् तत्तथा तस्मिन् । सविधे समीपे चरतीति सविधचरः तेन जटायुषा सरक्षे रक्षासहिते पञ्चवटीवने सहजजनकजान्वितः लक्ष्मणसीतान्वितः तपस्यन् तपः कुर्वन् त्वं समोदं यथा तथा उवासिथ वासमकरोः ॥३॥

अथेति । पत्युः पातालराजस्य निधनात् नाशात् प्रतिभुवनं भुवने भुवने परिभ्रमन्ती परितः भ्रमन्ती चरन्ती दशाननस्य रावणस्य भगिनी सोदरी शूर्पणखा शुनी सरमा सिंहमिवेत्युपमा । अनङ्गेन कामेन बाधिता पीडिता । रिपून् शत्रून् मथ्नातीति रिपुमथनं त्वां अभजत प्रापेत्यर्थः ॥ ४ ॥

मनसिजेति । मनसिजः कामः तेन समः तुल्यः मनसिजसम श्चासौ सानुजश्चेति तथोक्तः । सभार्यः अधुना मम वनं अवाप्तो भवान् क इति अचकितं अचलनं यथा तथा अतिधृष्टया निर्लज्जयेत्यर्थः । अभिपृष्टः कृतप्रश्नः त्वं अस्यै शूर्पणखायै अतिशुद्धं निजं आत्मीयं वृत्तं उवक्थ ऊचिषे ॥ ५ ॥

अहमिति । अपतिमती भर्तृरहितेत्यर्थः । पुलस्त्यस्य नप्त्री पौत्री । 'नप्त्री पौत्री सुतात्मजा' इत्यमरः । शूर्पणखा अहं इह स्वयं त्वां पतिं भर्तारं वृणे प्रार्थये । रघुतिलक रघुश्रेष्ठ अगतिं अनाथामित्यर्थः । मां पुनर्भ्वं द्विरूढाम् । 'पुनर्भूर्दिधिषूरूढा द्विः' इत्यमरः । अनुगृहाण इति सा शूर्पणखा त्वां निर्बबन्ध ॥ ६ ॥

ममेति । इयं जनकसुता मम अहेया अस्ति । मया हातुं न शक्या भवतीत्यर्थः । 'कृत्यानां कर्तरि वा' इति षष्ठी । हे सुभ्रु शोभने भ्रुवौ यस्याः सा तस्याः सम्बुद्धिः । सुभ्रूरिति प्रयोक्तव्ये सुभ्रु इति प्रयोगस्तु महाकविप्रयोगदर्शनात् साधुरिति मन्तव्यः । त्वं मन्मथस्य मदनस्याभेवाभा यस्य स तथा तं, अतिसौन्दर्यशालिनमित्यर्थः, मदनुजं लक्ष्मणमाश्रय भज इति तव वाग्भिः त्वं कनीयसी कनिष्ठा प्रिया पत्नी स्याः इति अस्य लक्ष्मणस्य वाग्भिश्च सा शूर्पणखा गहने वने अभ्रमत् राममुपगता सा लक्ष्मणं भजेति रामोक्त्या पुनर्लक्ष्मणमुपगता ज्येष्ठमेव भजेति लक्ष्मणोक्त्या च पुनरप्येवं बभ्रामेत्यर्थः ॥ ७ ॥

उपगतेति । उपगतस्य समीपप्राप्तस्य हितस्य इष्टस्य भङ्गेन नाशेन तुङ्ग उन्नतो यो रोषः तस्मात् प्रकटिते प्रकाशिते भीषणे घोरे वेषभावणे आकल्पवचने यया सा तथा । हठेन बलात् सीतां अभिजसितुं हन्तुं मनो यस्याः सा तथा । 'जसु हिंसायाम्' इति धातोस्तुमुनः 'तुं काममनसोः' इति मकारलोपः । सा शूर्पणखा लक्ष्मणेन कृत्तं छिन्नं कर्णनासं श्रोत्रनासिकं यस्याः सा तथोक्ता सती अजनिष्ट जज्ञे ॥ ८ ॥

नन्विति ॥ नन्विति वितर्के । अनुजाः खरत्रिशिरोविभीषणा यस्याः सा तथोक्ता । अहं दशमुखकुम्भकर्णाभ्यां लाल्या लालयितुं

शक्त्या **अस्मि** । **फणधरयुवतेः** नागस्त्रियाः वपुः शरीरम् । पञ्चनखस्य कमठस्य स्त्री पञ्चनखी । 'नागकूर्मौ पञ्चनखौ' इति **नानार्थरत्नमाला** । 'पुंयोगादाख्यायाम्' इति ङीप् । तया निमित्तेन **व्रणितं** सञ्जातव्रणम् । **अहो** इति खेदे । हिरवधारणे । रावणकुम्भकर्णलाख्यायाः खरादिपरिरक्ष्यमाणाया मे सीतानिमित्तं नासिकाश्रवणकृन्तनं कमठीनिमित्तं नागस्त्रीवपुर्व्रणजननमिवासीदिति भावः । इति मत्येत्यर्थः । असौ शूर्पणखा **तिरोभूत्** तिरोदधे । निदर्शनालङ्कारः ।

'वाक्यार्थयोः सदृशयोस्तुल्यारोपो निदर्शना ।'

इति लक्षणात् ॥ ९ ॥

तदिति । **तस्याः** शूर्पणखायाः **उदितेन** वचनेन **विदितस्य** ज्ञातस्य **चतुर्दशानामपि जगतां** लोकानां **भयदमनं** भीतिनाशनं **विधि-विधानं** यस्य स तथा तस्य **तव निग्रहार्थं** वधार्थं **खरेण नियुक्ताः** प्रेरिताः **निशाचराः** राक्षसाः **त्वयैव** न तु लक्ष्मणेनापीत्यर्थः । **पशुतां नीताः** प्रापिताः । भीरवः अक्रियन्त इत्यर्थः ॥ १० ॥

तदन्विति त्रयो मूर्धानः शिरांसि यस्य स त्रिमूर्धः । त्रिशिरा इत्यर्थः । 'द्वित्रिभ्यां च मूर्ध्नः' इति षच् । **खरदूषणत्रिमूर्धाः अननुरुषः** अनल्परोषाः सन्तः **द्विषं** शत्रुं **त्वां अभ्यषेणयत्** त्वां प्रति अभितः प्रेरयन्ति स्म । सेनयातिक्रामतीति 'प्रातिपदिकाद्धात्वर्थे' इति णिच् । 'प्राक् सितादड्व्यवायेऽपि' इत्यनेनाड्व्यवायेऽपि षत्वम् । **उच्चः** उन्नतः **ध्वजः** केतुः **नभसङ्गमः** पक्षी यस्य स तथा । गरुडध्वज इत्यर्थः । 'पितत्सन्तो नभसङ्गमाः' **इत्यमरः** । तस्य सम्बुद्धिः । त्वां **मम यमदूतेभ्यो भीतिं धुनु** अपनुद ॥ ११ ॥

(१७)

सरिदिति । **इदं** दृश्यमानं वस्तु । तीरमतिक्रान्तं **अतितीरं परितोऽभिताऽभियातं** आभिमुख्येन यातम् । **सरितां** नदीनामीशः नाथः । समुद्र इत्यर्थः । तस्य **तोयं** जलं **इति एवं धियं** बुद्धिम् । ददातीति **दायि** । **अतुलं** अनुपमं **खरदूषणत्रिशिरसां बलं** सैन्यं **तरसा**

वेगेन तत्र उटजं पर्णशालाम् । 'पर्णशालोटजोऽस्त्रियाम्' इत्यमरः । अत्राप प्राप ॥ १ ॥

कुहर इति । सुखे सुखकरे कुहरे पर्णशालान्तर्भागे जनकराजसुतां सीतां तामवितुं रक्षितुं सहजं लक्ष्मणं च आदिशता नियोजयता भवता तत् अरातिबलं शत्रुसैन्यं दिवसाधिपेन सूर्येण तिमिरं तमः यथा तथा न्यरोधि रुरुधे ॥ २ ॥

मुनीति । मुनीनां गुप्तये रक्षायै स्पृहयता स्पृहां कुर्वता 'स्पृहेरीप्सितः' इत्यनेन सम्प्रदानत्वाच्चतुर्थी । भवता अर्धयामसमयमित्यत्यन्तसंयोगे द्वितीया । शितानि तीक्ष्णानि शस्त्राणि वर्षयतीति शितशस्त्रवर्षी । तथाकृतं बलं सैन्यं यस्मिंस्तत्तथा । शरैरस्त्रैः कृत्ताः खण्डिताः हस्तिरथपत्तिहया गजरथपदातितुरगा यस्मिंस्तत्तथा समरं युद्धः अस्तमितं नष्टम् ॥ ३ ॥

शरेति । त्वं शरैः कृत्तेभ्यः खण्डितेभ्यः मस्तकेभ्यः शिरोभ्यः विनिर्यता विनिर्गच्छता असृजा रक्तेनैव मधुना मद्येन मत्तं मदोत्कटं चित्तं चेतो यस्य स तथा तं, खरमपविध्य शरैर्विभिद्य निजभृत्यगणैः सह वर्तनाय वृत्तये समवर्तिपत्तनं यमगृहं अगमयः अवधीरित्यर्थः ॥ ४ ॥

व्रणेति । व्रणानामेव कन्दराणां गुहानाम् ।

'दरी तु कन्दरो वा स्त्री देवखातबिले गुहा ।'

इत्यमरः । मुखेभ्यो विनिर्यतामसृक्कणानां रक्तबिन्दूनां वृन्दैः समूहैः भिन्नानि विदारितानि घनानि सान्द्राणि घर्मजलानि स्वेदाम्बूनि यस्य स तथा । क्षणभङ्गेन क्षणनाशेन कीर्णा मिश्राः सुरभयः सुगन्धयः श्वसिताः श्वासवायवो यस्य स तथा । त्वं रणरङ्गसीमनि युद्धनृत्यस्थानप्रदेशे इत्यर्थः विशश्रमिथ विश्रमं प्राप्तः ॥ ५ ॥

तवेति । सर्पराजः शेषः शयनीयं शय्या यस्य स तथा तस्य सम्बुद्धिः । अस्मदर्थे अस्मत् कृते भुवं भूमिं अवतीर्णवतः अवतरितवतः तव इष्टं सर्वेषामभिमतमित्यर्थः । एतत् खरदूषणत्रिशिरःप्रभृतिराक्षसवधरूपं फलं कार्यसिद्धिः अभिदृष्टं अभिदर्शितम् । अस्माभिरित्यर्थः । हि यस्माद

SANSKRIT IN MODERN INDIA

By

Dr. Louis Renou

Professor of Sanskrit, University of Paris.

If India is loved and adored throughout the world, it is chiefly because of her being the repository of a long and venerable tradition — intellectual, moral and spiritual — embodied in the treasure of Sanskrit literature. It is not my intention to underrate in any way the provincial languages and literatures either in the South or in the North. I am only too conscious of the fact that the Dravidian languages also possess a unique position on account of their literary fecundity. But if there is a form of expression which gives unity to India and makes Indian civilisation appeal to the entire world, it is Sanskrit and nothing else.

Let me draw a comparison. In France we have a Greco-Latin cultural background. Every cultured man there yearns to know Latin. Nobody thinks that Latin is opposed to French; on the contrary, every one believes that Latin is useful and many believe that it is indispensable for a better understanding of French. And we have in French a literature superior in quality and age to Latin literature, and Greco-Latin literature for us is something rather remote. Our religion, for instance, is Christianity which is entirely alien to classical antiquity.

In India Sanskrit is the basis of all the religious, philosophical and scientific tradition, and it is this that makes India a country incomparable with any other. There are Dravidian literatures as well as literatures of the new Indo-

Aryan languages. Nevertheless, all of them are invariably inspired by Sanskrit and they owe their present position to its enlivening influence. I sometimes hear the view that Sanskrit is the property of the Brāhmaṇas. Have the lyrics, the Arthaśāstra and Āyurveda and other technical subjects anything to do with one particular caste? Am I a Brāhmaṇa myself to have devoted my life to Sanskrit studies? Or if anybody thinks that material progress alone is beneficial to mankind, I must say that material progress has entangled the world in two ferocious wars and it may entangle it in a third one even more ferocious.

I do not wish to take part in the controversy regarding the national language for India, but I may say that Switzerland, a very small country, is getting on well with three or even four national languages which do exist in perfect harmony. I hear that there is a move in the Tamil country to oppose the introduction of Hindi as the national language. But those who wish to oppose Hindi must logically yearn for the strengthening of Sanskrit, because Sanskrit alone might be accepted, without hurting the susceptibility of anybody, as a cultural language from Kashmir to Cape Comorin. Sanskrit alone is both a national and international language. The Sanskrit civilisation has penetrated by the intervention of Buddhism into Afghanistan and Turkistan on the one side, and into China, Japan and the South-east of Asia on the other. As for those who are larger in number and will accept Hindi, what is Hindi if it is deprived of its natural connection with Sanskrit, if it is detached from Sanskrit background?

In the course of my short sojourns in different parts of India, I have come across thousands of Pandits and Sastris capable of speaking Sanskrit fluently and thoroughly mastering ancient texts. I have met a large number of students

devoted to that sort of study. I admire these men and I salute their disinterestedness and self-abnegation. They maintain the great tradition of India. I say with a particular sadness that the Indian Government does not do all its duty towards them. The number of professors in Indian universities has to be increased. Every one of them should be given adequate leisure and the material means of working. Facilities must be given for researches of manuscripts, excavations, editing of texts and publications of every kind. Teachers better trained and more encouraged may bring up better students more intellectually equipped, of whom many may be able to apply themselves to scientific research. There is no reason why teachers of Sanskrit should be less favourably treated than teachers of Latin in France or England. While Latin is only a small part of our heritage, Sanskrit is all in all in Indian culture. The small countries of Europe possess seminars where students of Orientalism gather to prepare works of interpretation and criticism. Why does India possess few of these research institutes? Why has she not, as France or U. S. A., besides the University, a School for Higher Studies exclusively devoted to prepare young research workers and to direct their work? What could succeed at Poona in the form of those undertakings of a national interest like the critical edition of the Mahābhārata or the Sanskrit Thesaurus, could as well succeed elsewhere.

The Occident during the last one hundred and fifty years has created little by little the Sanskrit philology. It has raised what we call Indology to the level of the major disciplines of humanity. The great Indianists came one after another and taught to Indians, we may say, the method and the criticism at the time when they gave them the trea-

sures of their living experience in the form of original texts. Nowadays most of the countries of Europe are weakened, reduced to silence. India herself has to pursue the task to take the first place in the peaceful competition. She can afford it, thanks to the immensity of her resources in men. She ought to do it, because she is the home of Sanskrit, the fountain of one of the foremost spiritual powers of mankind, because she has the privilege, unique in contemporary humanity, to be the repository of a living tradition which goes back to the origin of human knowledge.

MANUSCRIPTS NOTICES AND STUDIES

X

THE ANUṢṬHĀNASAMUCCAYA OF NĀRĀYAṆA.

BY

S. VENKITASUBRAMONIA IYER.

The *Anuṣṭhānasamuccaya* is a work on Tantra in nine chapters (*paṭalas*) dealing with the installation and worship of the idols of Viṣṇu, Śiva, Śaṅkaranārāyaṇa, Durgā, Subrahmaṇya, Gaṇapati and Śāstā in temples according to the practices current in Kerala.

There are four manuscripts of the work in this Library:

(1) No. 898 of the Curator's collection, a palm-leaf MS. in fairly good condition and legibly written in Malayalam script. It comprises about 7800 *granthas* and is the only complete MS. of the work available. It is dated 962 M. E. (1787 A. D.)

(2) No. 1313 of the same collection, a palm-leaf MS. in good condition legibly written in Malayalam script. It extends upto a portion of the fourth paṭala.

(3) No. L. 659 B of the University collection, a palm-leaf MS. in very good condition neatly written in Malayalam script. Contains paṭalas 4 to 8.

(4) No L. 660 A. of the same collection, a palm-leaf MS. in good condition very legibly written in Malayalam script. Contains paṭalas 8 and 9 only.

There are also two transcripts in the Library, Nos. 851 and 975, respectively transcribed from the first two MSS. mentioned above, namely, Nos. 893 and 1313 in the Curator's collection, and the present account of the work is mainly based on the first of these MSS.

The work begins :

विष्णुशम्भुहरिशम्भुशुम्भजि-
च्छक्तिधृग्गणपशास्तृमूर्तिभिः ।
यज्वनामभिमतार्थदायिने
नन्दजाय परमात्मने नमः ॥

भुक्तिमुक्तिफलकाङ्क्षिभिर्जनै-
र्भक्तिपूरहृदयादृताङ्घ्रिणे ।
मुक्तिगेहनियतासिने नमो
भक्तलोकमनसेऽस्तु तेजसे ॥

सुसमावृतधीनेत्रमज्ञानपटलं महत् ।
कृपया यः कृषति तं वन्दे कृष्णाभिधं गुरुम् ॥

श्रीमातृदत्ततनयं करुणाम्बुराशिं
निष्यन्दिधर्ममधुरम्यमुखारविन्दम् ।
नारायणं नलिनलाभपदारविन्द-
माध्वीमधुव्रतमहं शरणं व्रजामि ॥

श्रीपार्वतीनन्दन एष कश्चि-
न्नारायणाख्यो द्विजबालकोऽत्र
विष्ण्वादिदेवार्चनलोलचेता
लिखत्यशेषं वरणादिकर्म

The first six paṭalas describe in all detail the rites relating to the installation of the idol in the temple commencing from *guruvaraṇa*. The seventh paṭala describes the rites relating to the daily routine of the *pūja*, the eighth deals with the *prāyaścittakalaśas* or expiatory rites and the ninth gives the details of the rites relating to the ***mahotsavas*** or festivals.

The subject matter is, thus, the same as that of the major part of the ***Tantrasamuccaya*** of Cennās Nārāyaṇan Nampūtiri, the standard text on the subject in Kerala, but it is dealt with in an elaborate and explanatory manner. The *Tantrasamuccaya* and its two commentaries, ***Vivaraṇa*** and ***Vimarśinī*** are frequently quoted and their views are often endorsed but sometimes the author gives his own views also: as for instance:

दुर्गायामाचमनीयं समुच्चये तद्व्याख्याद्वये अनुष्ठानेषु च न दृष्टम् ।
.. .. अत्र वरणादिकर्मणि दुर्गायां विष्णौ आचमनीयमेवाचमनीयमिति मे प्रतिभाति । किञ्च —

'सद्रव्यकुम्भक्रममत्र क्लृप्तिः
स्याद्विष्णुभागाभिहिता कुमार्याः'

इति सप्तदशद्रव्यविधावुक्तत्वाद्धरेराचमनीयमेव दुर्गाया आचमनीयमित्यत्र न सन्देहः ।

(p. 36)

The work is written in simple prose and to suit the convenience of the Tantrins who use it, sometimes the names of substances are given in Malayalam. As instances may be given :

अथ विष्णवादीनां क्रमात् बीजानि मन्त्राश्चोच्यन्ते । तत्र विष्णुदुर्गाहरांशेषु [illegible], [illegible]

author mentions with very great regard a great *bhāgavata* by name Nārāyaṇa, son of Mātṛdatta. The reference is obviously to Melputtūr Nārāyaṇa Bhaṭṭatiri, the famous author of *Nārāyaṇīyam* and other works, who lived between 1560 and 1666 A. D.[2] From the terms in which Bhaṭṭatiri is referred to, it is clear that he was living at the time when the *Anuṣṭhānasamuccaya* was written. So Nārāyaṇa, the author of the present work can be taken to be a contemporary, in all probability a younger contemporary, of Bhaṭṭatiri, and he can be placed in the 17th century of the Christian Era.

Pandit E. V. Raman Namputiri observes[3] that there is a tradition to the effect that the author of *Anuṣṭhānasamuccaya* was a disciple of the author of the commentary *Vivaraṇa* on *Tantrasamuccaya*, who is known to be a Kṛṣṇa, and that, therefore, the Kṛṣṇa mentioned as the guru of Nārāyaṇa is likely to be identical with him. But these observations do not seem to be correct. Firstly, the *Vivaraṇa* does not menton the name of its author, and even if it is taken to be Kṛṣṇa, the guru of our author must have been a different person; for though the *Vivaraṇa* is referred to several times in our work, nowhere is it mentioned as the work of the author's guru. In one place our author observes that his guru taught him after a thorough examination of *Vivaraṇa* and several other works, thereby indicating that the author of the *Vivaraṇa* is different from him. Cf:

अत्र इन्दुप्रकृतिसमर्पणे 'भूयो नैवेद्यसार' इत्यादिश्लोकार्धव्याख्याने विवरणे बहवो मन्त्राः बहून्यनुष्ठानानि भावनानि च सन्ति । तत् सर्वं विभज्य ज्ञातुं वक्तुं च महान् प्रयासः । तस्मात्तद्विवरणं च बहूनागमांश्च सपर्यासप्तकोपहारप्रकाशकादींश्च परक्रोडानुष्ठानादि च पुनः पुनरवलोक्य

2. vide TSS 158, *Prakriyāsarvasva*, Part III, Introduction p. x.

3. vide TMS 66, *Tantrasamuccaya* with Malayalam commentary, Part III, Introduction, p. 115.

THE UNVEILING OF THE PORTRAIT OF MAHĀMAHOPĀDHYĀYA DR. T. GAṆAPATI ŚĀSTRI.

The Research Association of the Travancore University Oriental Manuscripts Library, Trivandrum, which was inaugurated on the 12th June 1948, unanimously resolved in its very first meeting to arrange for a portrait of the late Mahāmahopādhyāya T. Gaṇapati Śāstri, the first Curator of the Library and the scholar who brought international reputation for Travancore by the discovery and publication of the dramas attributed to Bhāsa, the *Āryamañjuśrīmūlakalpa* and several other works on a wide variety of subjects, being installed in the Library hall at the expense of the Association and to request Dr. S. Radhakrishnan to unveil the same. Accordingly the portrait was got ready and the consent of Dr. Radhakrishnan secured. The ceremony of unveiling the portrait was conducted at 6-30 P. M. on the 30th March 1949 in the premises of the Library in the presence of a very vast and distinguished audience which included the Hon. Ministers Mr. K. R. Elankath and Dr. E. K. Madhavan, Dr. J. J. Tigert of the Indian Universities Commission and Mrs. Tigert, Secretaries to Government, Heads of Government Departments, Members of the Syndicate and Deans of the Faculties of the University and a host of scholars and admirers of Dr. Sastri.

The function commenced with the singing of the National Anthem by the Parur sisters, Sry. Saradamani and Sry. Radhamani.

Dr. P. K. Narayana Pillai, the President of the Association, then welcomed Dr. Radhakrishnan and the audience. In the course of his speech he referred to the achievements of Dr. Gaṇapati Śāstri and the background of activities in

Dr. Radhakrishnan then unveiled the portrait of MM. Gaṇapati Śāstri. (The text of his speech unveiling the portrait is printed elsewhere in this Journal).

Mr. K. Venkateswara Sarma proposed a vote of thanks to Dr. Radhakrishnan and the guests.

With the singing of Vancheesamangalam the function came to a close at 7-30 P. M.

A Souvenir has been published in this connection and this contains besides the speeches of Dr. Radhakrishnan and Dr. Narayana Pillai and the Messages, an article on the life and activities of Dr. Gaṇapati Śāstri by Rao Bahadur K. V. Rangaswami Aiyangar, another on the Royal Patronage to Manuscripts Collection in Travancore by Mahākavi Ulloor S. Parameswara Iyer and an account of the Trivandrum Manuscripts Library.

ADDRESS BY Dr. S. RADHAKRISHNAN

FRIENDS,

I am happy to be here today and to take part in this function where you are honouring the services of one of the greatest scholars of our generation, though it may be at this late hour — twenty-three years after he passed away. Political leaders and popular administrators come in for such honours: scholars also sometimes, but mostly scholars in modern subjects; but it is very rare to find honour done to a scholar of outstanding eminence in Sanskrit or Malayalam. That you have chosen to honour one of your greatest Pandits shows that you are not carried away by popular fashions and that your standards are still wholesome.

So far as Gaṇapati Śāstri is concerned, he has had praise bestowed on him by many eminent scholars. He combined in himself profundity and accuracy of learning which are associated with our traditional pandits and also control over critical methods distinctive of our modern scholars. His work as a scholar, as an editor, as a critic, has received not only admiration from his colleagues in India but also respect and recognition from abroad. The fact shows the truth of the saying that learning is honoured everywhere whereas other distinctions are limited to parishes. There is such a thing as a World Republic of Letters where the gateways are open only to those who possess scholarship and critical acumen. Pandit Gaṇapati Śāstri by his discoveries, publications and critical commentaries, has added valuable data for the comprehensive cultural history of our country. He has published very many classics. A classic is defined as a contemporary of all ages, a thing which can be used by people of every generation. It is the task of the interpreter, the task of the commentator to point out how the truths of all times could be expressed

as the truths for our time. What is built for ever is for ever building. Our greatest *ācāryas* generally take their stand on ancient texts, but they interpret them in their generation so as to exhibit their relevance to contemporary tendencies of thought. Their work is not one of mere repetition. It is one of creative interpretation. Though they all take their stand on the same texts, they interpret them in different ways. We find any number of conflicting interpretations. Your great *ācārya* who comes from this part of the country, Śrī Śaṅkarācārya, said he was interpreting the truths of the *Upaniṣads*, the *Brahmasūtras* and the *Bhagavadgītā*. He never professed to say anything new or original, and yet his interpretations are distinctive and have added to the stock of our knowledge and have all the originality of the ultimate philosophical synthesis. You know, that in the *Śaṅkaradigvijaya*, it is said that there was a quarrel between Maṇḍanamiśra and Śaṅkarācārya. When Maṇḍanamiśra was performing a *yajña* he saw Śaṅkara there and dismissed him as one who is advocating not ritualism but renunciation of the world –

शङ्कराचार्यपादद्वयं मण्डलस्थं ददर्श । ततः सर्वाङ्गाणि वीक्ष्य संन्यासीति ज्ञात्वा कोपकोलाहलचित्तः कुतो मुण्डीत्यब्रवीत् ।

That is what we find in the *Śaṅkaradigvijaya*. It shows how two great thinkers can resort to the same texts and give different interpretations. Our civilisation became decadent when we started repeating texts without reinterpreting them to suit advancing thought and life. We have the phenomenon of arrested development. Thanks to the contact with the West an intellectual renaissance was started, a renaissance which does not mean a mere revival but a renewal of life. To that renaissance Gaṇapati Śāstri by his publications made an invaluable contribution. His name would always be associated with the publications of those dramas attributed to Bhāsa and with his edition of and commentary on Kauṭalya's *Arthaśāstra*.

There is a popular superstition that India concentrated on abstract meditation, dwelt in supralunar solitudes and cared more about the other world than this world. Drama, politics—these are not abstract speculations. They deal with the empirical world. They are instruments for conveying transcendental truths through empirical media. They try to relate this world to a world of abstracts or to a world of spirit. These are attempts made to give spirit concrete existence. When the *Rāmāyaṇa* opens the question is put: "Is there a man who concretely embodies all these supreme virtues?" And the story is given of Rāma who is विग्रहवान् धर्मः – the embodiment of all *Dharma*. About our drama the English critic Barriedale Keith says: "It was the only literary drama in the world for a thousand years between the decline of Greek drama and the rise of the Elezabethan drama. In that vast span of a thousand years, in the whole of the world's literature there was never any kind of drama of the same excellence and of the literary quality as the Indian drama." I am quoting from memory. If you turn to his book on the history of Sanskrit drama, you will find this statement there. When you talk again of politics, it is said that politics is not to be regarded as something Machiavellian or as something which has no relation to spiritual truths, but as politics, as the *Arthaśāstra* says, that deals with giving spiritual truths a political embodiment; the way in which, by means of social, ethical and political institutions, we could practice the life of spirit. That is the aim and purpose of true politics. So to suggest that Indian thinkers neglected the empirical and exclusively concentrated on the transcendental is not fair to the great achievements of India in sciences which relate to the world of experience. You know how this misinterpretation has actually come about.

The world is not non-existent; nor is it to be treated as a dream. Even though there is one ultimate metaphysical reality, its contents and its values are gradually exhibited, manifested more and more as we go higher and higher in

this cosmic process till at last when the cosmic process reaches its consummation, you will find an increased substantiation of those ethical values, spiritual values, which we regard as transcendental in quality.

एकस्यापि कूटस्थस्य चित्ततारतम्यात् ज्ञानैश्वर्याणामभिव्यक्तिः परेण परेण भूयसी भवति ।

So when we associate the name of Mahāmahopādhyāya Gaṇapati Śāstri with the dramas attributed to Bhāsa, with the ***Arthaśāstra***, that is a clear demonstration that we never lost ourselves in complete reverie, but we all the time had our feet planted on earth and tried to establish relationship, an intimate and close relationship, between the world here and the world of metaphysical truths. It is an increasing penetration of the absolute reality in this world of successiveness for which even Śaṅkara, popularly known as the upholder of the doctrine of *māyā*, actually stands and the work which he has done is work which shows to us that we are always aware that we have to pursue the truth not in a vacuum but through the means and through the apparatus which this concrete world presents to us.

I do hope that scholars who work here will follow the example of the great *ācārya* whose portrait I have the honour to unveil today, and remember that honest, unostentatious work done with a single-minded devotion to truth not only gives individual peace but is of immense value to posterity. I have pleasure in unveiling this portrait.

MAHĀMAHOPĀDHYĀYA DR. T. GAṆAPATI ŚĀSTRI

(1860—1926).

BY

DR. V. RAGHAVAN,
Department of Sanskrit, University of Madras.

In the renaissance of Sanskrit Studies in the Universities and Research Societies of modern times, the collection of manuscripts and publication of important works in a critical manner have necessarily occupied the highest place. When the pace of this publication work slackened at two of its earliest headquarters, Benares and Calcutta, which were producing the *Pandit* and the *Vizianagaram Series*, and the *Bibliotheca Indica* respectively, the work was vigorously taken up at other centres in the west and the south of the country by the Nirnayasagar Press and the Department of Public Instruction, Bombay, the Anandasrama, Poona, the Oriental Library, Mysore, as also at smaller centres of activity like Kumbhakonam (Advaitamañjarī Series). Starting some time later than all these, the Trivandrum Sanskrit Series came very soon to eclipse all these serial publications, and, by drawing the attention of scholars all over India and the outside world, put Trivandrum on the map of Oriental Research. If there is one great name to which Trivandrum owes this honoured place in the world of learning, it is beyond all doubt that of the first and founder Curator of the Trivandrum Manuscripts Library, Mahāmahopādhyāya Dr. T. Gaṇapati Śāstri.

To those who have been in active Oriental research, it need not be told that two subjects which virtually shook the entire world of scholars in India, Europe and America, were 'Bhāsa' and 'Kauṭalya', subjects whose hold on the research scholars and sway over scholarly periodicals are not yet at an end. There was a time when none felt

himself worth anything if he had not written something on Bhāsa or Kauṭalya, the literature that has grown over which would easily fill a fair portion of a research library. Again, the scholar who was responsible, solely in the case of Bhāsa and partially in the case of Kauṭalya, for all this important literary activity, was Dr. Gaṇapati Śāstri. This library and its research and publication activities had indeed the most auspicious start at the hands of one who is truly to be venerated by us as our "GANAPATI".

The late Gaṇapati Śāstri was born in 1860 in the village of Tarurai in Tirunelveli district, as the son of Ramasubbier, a scion of the family of the celebrated Appayya Dīkṣita. The young Śāstri migrated to Trivandrum at sixteen and studied under Subba Dīkṣitar of Kadayam and Dharmādhikāri Karamanai Subrahmaṇya Śāstri. While yet seventeen, he composed his first work, a Sanskrit play, *Mādhavavilāsa*, for which prince Viśākham Tirunāḷ presented him with a ring. Other productions of his teens were *Arthacitramaṇimālā*, *Setuyātrānuvarṇana* and a Sanskrit version of Shakespear's *Merchant of Venice*.

In 1879—84, Śrī Viśākham Tirunāḷ appointed him keeper of the Palace Sanskrit Library (Granthappura). Literary life was very keen and enjoyable now with such outstanding scholars like Kerala Varma Valiya Koil Tampuran, Elattūr Rāmasvāmi Śāstri and others.

In 1889 the Trivandrum Sanskrit College was founded and our Śāstriar, who was immediately appointed to its staff, was soon promoted Headmaster, and then Principal in 1899, and he continued to keep the charge of the Granthappura too. Taking a dominant part in Sanskrit activities, Śrī Gaṇapati Śāstri produced during this time not only many poems but also a number of text-books.

Now arose a laudable desire on the part of His Highness the Maharaja to re-vitalise Sanskrit studies by collect-

ing Sanskrit manuscripts and bringing to light new works. The series of publications, later to become the well-known *Trivandrum Sanskrit Series*, made an appropriate and auspicious start with the publication of the *Bhaktimañjarī*, the devotional hymn composed by the versatile royal author of Travancore, H. H. Svāti Tirunāḷ Mahārāja. Starting in 1908 the work of collecting manuscripts and publication of classics went on regularly. Nearly 1400 rare works were gathered and Gaṇapati Śāstri himself edited no less than 68 of them in the first 87 numbers of the Trivandrum Sanskrit Series, each volume carrying his Introductions as well.

By the variety of subjects covered, Veda, Śāstra, Kāvya, Alaṅkāra, Vyākaraṇa, Music and Architecture and even Buddhism and Jainism, the Trivandrum Series established itself as an indispensable adjunct of research.

To the study of *Arthaśāstra* whose discovery revolutionised the prevailing notion about ancient India in the minds of Oriental scholars, Śrī Gaṇapati Śāstri made substantial contribution in the form of his edition of that difficult text with his own commentary on it called the *Śrīmūlam*, for which he made a study of the valuable old Malayalam commentary on the work available in the Library.

More than this, it is his discovery of the so-called Bhāsa plays that made Śāstri world-famous: He discovered these thirteen plays, identified them as works of the Bhāsa praised by Kālidāsa published them with commentaries, and took the scholarly world by storm as it were; and, when opposition arose and gathered strength against his identification, he stoutly faced the criticism and answered them elaborately and was able to keep on his side able advocates like A. B. Keith.

Two other important works that he brought out deserve special mention: the Buddhistic Tantric work

Āryamañjuśrīmūlakalpa from which the late Dr. K. P. Jayaswal extracted so much interesting historical information, and the *Samarāṅgaṇasūtradhāra* of king Bhoja, edited by him for the Gaekwad Oriental Series, which is a storehouse of wonderful facts about ancient Indian arts, crafts and machines of domestic and military use.

Among Pandits who took to research, few attained the eminence of Gaṇapati Śāstri; and among research scholars themselves, few ever got that measure of recognition and honour that Śāstri received during the course of his career. In 1918, he was invited to preside over the All-India Sanskrit Conference at Allahabad. In the same year, the Government of India honoured him with the title of '*Mahāmahopādhyāya*'. In 1920 took place a rather rare function in his honour. Representative Oriental scholars from the American Oriental Society, Royal Asiatic Society of Great Britain and Ireland and the Societe Asiatique of France met in Paris and presented an address to Śāstri praising his contribution to research. Among the signatories to this address were veteran Orientalists like Macdonnel, Keith, Pargiter, Thomas, Grierson, Barnett, Rapson, Emile Senart, Sylvain Levi, Louis Finot, Jules Bloc, Bloomfield, Norman Brown and Lanman. Śāstri was also now elected Honorary Member of the Royal Asiatic Society of Great Britain and Ireland. In 1924, the Tubingen University honoured him with a Doctorate Degree.

In 1925 Dr. Śāstri retired from active service, and passed away on 3rd April 1926.

Of all Orientalists, Sylvain Levi, it is well known, entered into the Indian spirit and way of doing things. He had a special warmth of feeling for Gaṇapati Śāstri who was induced to write at that savant's instance the handbook of Indian culture in Sanskrit called *Bhāratānuvarṇanam*; and on the occasion of the Silver Jubilee of the Trivandrum

Manuscripts Library, Sylvain Levi sent a characteristic message to the memory of that great scholar than which there culd be no more appropriate finale to this account of the late MM. Dr. T. Gaṇapati Śāstri :

"नारायणं नमस्कृत्य लक्ष्मीं चैव नरप्रियाम् ।
सरस्वतीं चैव देवीं —

ततो गणपतिशास्त्रिनाम उदीर्यताम् । स हि यशःशेषोऽपि न विस्मरणीयः । तेनैव मार्गः प्रथमं दर्शित आज्ञातश्च । तेनैव अनन्तशयन-राज्यकीर्तिर्दिक्षु विदिक्षु विस्तीर्णा ॥"

Licence No. 644 dated 9-3-1949.

VOL. V, NOS. 3 & 4 JULY - OCTOBER 1949

JOURNAL


OF THE

TRAVANCORE UNIVERSITY

ORIENTAL MANUSCRIPTS

LIBRARY

TRIVANDRUM



[Annual Subscription Rs. 4]

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1949

CONTENTS

हिंस्रप्रकृत्या तमसा वृतोऽपि
प्रवृद्धतेजोभरदुःसहो यः ।
प्रकामधूमप्रकरानुविद्धो
वनाश्रयो वह्निरिवोद्दिदीपे ॥ ३ ॥

हिंस्रेति । यो हिरण्याक्षो हिंस्रया हिंसाशीलया प्रकृत्या स्वभावेन तमसा वृतस्तमोगुणान्वितोऽपि प्रवृद्धेन प्रकृष्टेन तेजोभरेण भुजप्रतापातिशयेन दुस्सहः सोढुमशक्यः । अत्र तमस्तेजसोरैकाधिकरण्यं विरोधाभासः । अत्रोपमामाह — प्रकाममत्यर्थं धूमप्रकरेणानुविद्धः सम्बद्धो वनाश्रयो वह्निर्दवदहन इवोद्दिदीपे उद्दीप्तवान् दुस्सहोऽभूत् ॥ ३ ॥

अचिन्तितानां विपदां प्रणेतुः
पापादिवापादितचित्ततापात् ।
यस्मादकस्मादभिपातशीला-
द्विश्वेऽपि लोका बिभयांबभूवुः ॥ ४ ॥

अचिन्तितानामिति । विश्वेऽपि लोकाः सर्वजना यस्माद्धिरण्याक्षात् सकाशाद् बिभयांबभूवुर्भीतवन्तः । पापाद्दुरितादिव । पातकाद्यथा बिभ्यति तथेत्यर्थः । उभयसाधारणं विशेषणत्रयमाह—अचिन्तितानामविचारितपूर्वाणां विपदामापदां रोगादीनां धनधान्यप्राणविनाशादीनां च प्रणेतुरुपपादयितुः । आपादितचित्ततापात् कृतमनःसन्तापात् । अकस्मादहेतुकमभिपात आपतनं शीलमस्येति तथाभूतादिति ॥ ४ ॥

स दानवेन्द्रो भुजदण्डकण्डूं
वीराभियोगेन विनेतुकामः ।
गदासहायो जगदार्तिहेतु-
श्चचार सर्वत्र वसुन्धरायाम् ॥ ५ ॥

स इति । स तथाभूतो दानवेन्द्रो हिरण्याक्षो वीरैरभियोगो युद्धसङ्घटनं तेन भुजदण्डयोः कण्डूं गात्रघर्षणव्याधिमिव दर्पातिशयं विनेतुकामोऽपनेतुमिच्छावान् जगतामार्तेरतिव्यथाया हेतुः सन् गदैव केवलं सहायो यस्य, न तु सैन्यम् । तादृशो वसुन्धरायां भूमौ सर्वत्र सर्वप्रदेशेष्वपि चचार सञ्चारं कृतवान् भूमौ भुजपराक्रमशालिनः पुरुषानन्वेष्य पर्यटितवानित्यर्थः ॥ ५ ॥

प्ररोहन्ति प्रादुर्भवन्ति अङ्कुरं दर्शयन्ति । हिरत्र प्रसिद्धौ । तामिमां क्षमामप्सु निमज्जयामि सलिलमग्नां करिष्यामि । वर्तमानसामीप्याद्वर्तमाननिर्देशः । आधारविनाशे सति तदाधेयभूतो धर्मः स्वयमेव नङ्क्ष्यतीति भावः । एवं निश्चितवानिति सम्बन्धः ॥ ८ ॥

अथो जवादञ्जनशैलवर्ष्मा
गदाहतिद्रावितदिग्गजेन्द्राम् ।
पादाभिघातश्लथसन्धिबन्धां
वसुन्धरां न्यञ्चयति स्म दैत्यः ॥ ९ ॥

अथो इति । अथो एवं निश्चयादनन्तरं दैत्यो जवाद्वसुन्धरां भूमिं न्यञ्चयति स्म अधो गमयामास । कीदृशः । अञ्जनशैल इव पृथुत्वादसितत्वाच्च वर्ष्मशरीरं यस्य । इदं च भूमिन्यञ्चनसामर्थ्यद्योतकम् । वसुन्धरां कीदृशीं कृत्वा । गदाहत्या गदाप्रहारेण द्राविता प्रधाविता दिग्गजेन्द्रा भूमिधरा महागजा यस्याः । पादाभिघातेन चरणप्रहारेण श्लथ. शिथिलो विश्लिष्टः सन्धिबन्धः समन्ततः शैलेषु ग्रथनं यस्याः । तथा कृत्वा न्यञ्चयति स्मेति सम्बन्धः ॥९॥

भारातिरेकावनमत्फणाग्र-
व्यामग्नरत्नेन फणीश्वरेण ।
समुज्झिता वारिनिधावमाङ्क्षी-
न्महीधरारण्यवती मही सा ॥ १० ॥

भारेति । सा तथा तेन न्यञ्चिता महीधरा बहवः पर्वता अरण्यानि वनानि च सन्ति यस्यामिति तद्वती । तैः सहेत्यर्थः । मही वारिनिधौ कारणजले अमाङ्क्षीन्मग्ना । कीदृशी सती । फणीश्वरेणानन्तेन तद्धर्त्रा समुज्झिता साधु परित्यक्ता । कीदृशेन । भारो दैत्यपदाभिघातजनितं घनत्वम् । तस्यातिरेकादाधिक्याद्धेतोरवनमत्सु फणाग्रेषु व्यामग्नानि नितरां लग्नानि रत्नानि फणामणयो यस्य । अनेन शिरोवेदनावशेन दुर्भरत्वादुज्झितेत्यर्थः ॥ १० ॥

तिमिङ्गिलग्रासनिगीर्यमाण-
मातङ्गसारङ्गवराहसिंहा ।
तेनोपनीता तरसा रसा सा
रसातलं बाहुबलोद्धतेन ॥ ११ ॥

---

१. 'पदाभिघात' इति पाठान्तरम् ।

तिमिङ्गलेति । तेन असुरेण सा तथाभूता रसा भूमिः । 'भूर्भूमिरचलानन्ता रसा विश्वंभरा' इत्यमरः । बाहुबलेन भुजस्थेम्ना उद्धतेनाहङ्कृतेन तरसा क्षिप्रं रसातलं पातालमुपनीता प्रापिता । कीदृशी । तिमिङ्गला मत्स्यविशेषाः । तिमिं गलन्तीति तिमिङ्गलाः । तथा बालरामायणे—

'अस्ति मत्स्यस्तिमिर्नाम तथा चास्ति तिमिङ्गलः ।
तिमिङ्गलगलोप्यस्ति तद्गिलोप्यस्ति लक्ष्मण!' ॥ इति ।

तेषां व्रातैः समूहैः निगीर्यमाणा ग्रस्यमाना मातङ्गा वनगजाः सारङ्गा मृगाः वराहाः सूकराः सिंहाश्च यस्याम् । इदमन्येषां श्वापदानामुपलक्षणम् ॥ ११ ॥

नियुज्य रक्षापुरुषानमुष्या
दिक्षु भ्रमन्नम्बुनिरन्तरासु ।
कदाचिदासाद्य जलाधिनाथं
मदान्धचेतास्तमुवाच दैत्यः ॥ १२ ॥

नियुज्येति । दैत्योऽसुरोऽमुष्या भूमेः, रक्षार्थं ये पुरुषास्ते रक्षापुरुषाः, तान् नियुज्य रक्षितुं तत्र स्थापयित्वा अम्बुनिरन्तरासु जलपूरितासु दिक्षु भ्रमन् सञ्चरन् कदाचिज्जलाधिनाथं वरुणमासाद्याभिगम्य मदान्धचेता गर्वमयतमसावृतमनाः सन् तं वरुणमुवाचोक्तवान् ॥ १२ ॥

उक्तिप्रकारमाह—

विचित्रसङ्ग्रामविशेषविज्ञा
गदेयमप्राप्तरिपोरहो मे ।
अलब्धभित्तेरिव चित्रकर्म-
प्रवीणता निष्फलतामुपैति ॥ १३ ॥

विचित्रेति । हे पाशिन् अहो कष्टम् । अप्राप्तरिपोः रिपुं कञ्चिदलभमानस्य ममेयं गदा निष्फलतामुपैति विफला भवति । कीदृशी चेच्छृणु । विचित्रस्य नानाप्रकारस्य सङ्ग्रामविशेषस्य विशिष्टयुद्धचर्याया विज्ञानं विदग्धता तद्विशेषं जानातीत्यर्थः । ईदृश्यपीदानीं निष्फला जाता । किमिव । अलब्धभित्तेः भित्तिमलभमानस्य पुरुषस्य चित्रकर्मणि चित्रलेखने प्रवीणता वैदग्ध्यमिव ।

'सैवेयं मम चित्रकर्मरचना भित्तिं विना वर्तते' ।

इति यावत् ॥ १३ ॥

तन्मया (किं) कर्तव्यमिति चेदत्राह —

करालहुङ्कारभयङ्कराया
निरङ्कुशं मूर्धनि ते पतन्त्याः ।
यद्यस्ति शक्तिर्विनिवारणे स्या-
त्तदेहि पाशिन्नशनेरिवाद्रेः ॥ १४ ॥

करालेति । हे पाशिन् ! अस्या गदाया विनिवारणे विषये अद्रेः पर्वतस्याशनेरिन्द्रवज्रस्य विनिवारण इव ते शक्तिः सामर्थ्यमस्ति यदि । उपमया सामर्थ्याभावोऽत्र प्रकाशितः । तत्तस्मादेहि इतस्तावत् । कीदृश्याः । करालेन उन्नतेन, उच्चैर्भूतेनेत्यर्थः ।

'करालो दन्तुरे तुङ्गे विशाले विकृतेऽपि च' ।

इति वैजयन्ती । हुङ्कारेण हुमितिशब्देन भयङ्करायाः । निरङ्कुशं निष्प्रतिबन्धं ते मूर्धनि पतन्त्याः शिरसि निपतन्त्याः । अस्या इति सम्बन्धः ॥ १४ ॥

कथमहमसमग्रपरिच्छदोऽस्मिन् कर्मणि प्रगल्भ इति मा शङ्किष्ठा इत्याह—

विरावविक्षोभितरोदसां किं
न यादसां त्वं पतिरद्वितीयः ।
उपेक्षसे हन्त ! किमिद्धसारं
योद्धारमभ्यागतमात्मतुल्यम् ॥ १५ ॥

विरावेति । विरावेणोच्चैःशब्देन विक्षोभितं सञ्चलितं भयविवशीकृतमित्यर्थः । रोदो गगनं अ(पि ? त्र) रोदःशब्देन तत्सञ्चारी जनो लक्ष्यते । तादृशानां यादसां जलसत्त्वानाम् अद्वितीयो द्वितीयरहितः प्रधानः पतिः स्वामी न किम् । त्वं पतिरेवेत्यर्थः । तत्कुतो निष्परिच्छदत्वमिति भावः । इद्धसारं प्रवृद्धबलं योद्धारं युद्धसमर्थमात्मतुल्यं स्वसदृशपराक्रमम् अभ्यागतमाभिमुख्येन प्राप्तम् । मामिति शेषः । किमुपेक्षसे युद्धसत्कारं विना किं परित्यजसि । हन्तेति खेदे । कष्टमसत्खेदावहेयमुपेक्षेति भावः ॥ १५ ॥

युद्धे मे मृत्युर्भविष्यतीति मा भैषीः, चेद्भविष्यति तद्भवतु काममित्याह —

यथा नियुद्धे निहतस्य कीर्ति-
स्तथोज्ज्वला न प्रथते निहन्तुः ।
जीवन् पुनः क्वापि कुतोऽपि भग्नः
कालेन तद्दोषकरोऽपि हि स्यात् ॥ १६ ॥

यथेति । यथा नियुद्धे द्वन्द्वयुद्धे निहतस्य मृत्युं प्रापितस्य जनस्योज्ज्वला निर्दोषा कीर्तिः प्रथते प्रसिद्धा भवति निहन्तुर्निहननकर्तुस्तथा न प्रथते । हन्तृहतयोर्मध्ये हतस्यैवोज्ज्वला कीर्तिर्भवति, न हन्तुः । तत् किमिति चेच्छृणु । जीवन् पुनः युद्धे शत्रुं निहत्य सजीवो वर्तमानस्तु कालेन कालगत्या क्वापि कस्मिंश्चित्प्रदेशे कुतोपि कस्माच्चित्पुरुषाद् भग्नः पराजितस्तद्दोषकरस्तस्याः कीर्तेः दोषकरः कलङ्ककारी अपि हि स्यात् । स्यादिति सम्भावनायां लिङ् । एवमपि सम्भावनीयमित्यर्थः । जीवतः पुरुषस्य दैववशात् पराभवजनितं दुर्यशः पूर्वजातं विजयप्रभवमपि यशो दूषयतीति वाक्यार्थः । अतो मृत्युरेव श्रेयसीति भावः ॥ १६ ॥

इह श्रिया वल्लभयापि पुंसः
कियच्चिरं संस्क्रियते शरीरम् ।
जयश्रिया त्व(स्य) परत्र साधो-
राचन्द्रतारं हि यशःशरीरम् ॥ १७ ॥

....कियच्चिरं संस्क्रियते कियन्तं कालं गुणाधानेन संरक्ष्यते । न तु चिरम् । किन्त्वल्पकालमेवेत्यर्थः । जयश्रिया तु जयश्रीरूपया श्रिया तु परत्र साधोः परलोकं प्राप्तस्य पुंसः यशःशरीरं यशोरूपं शरीरमाचन्द्रतारं चन्द्रतारसञ्चारमभिव्याप्य संस्क्रियते । अतः सामान्यश्रियाः शतगुणयुक्ता जयश्रीरिति भावः । हिरत्र हेतौ । तस्माद्धेतोरिदमभिहितमिति भावः ॥ १८ ॥

तदेहि सङ्गामय पाशपाणे!
मया सह क्रूरगदायुधेन ।
मम त्वदन्तःपुरबाष्पवर्षै-
रमर्षघर्मः प्रशमं प्रयातु ॥ १८ ॥

सहिष्यते यः समरे भवन्तं
तथाविधं कश्चन निर्दिशामि ।
निर्देक्ष्यमाणः स जितो यदि स्या-
त्त्वया हिरण्याक्ष ! जिता त्रिलोकी ॥ २१ ॥

सहिष्यत इति । यः समरे भवन्तं सहिष्यते भवता सह समरं कर्तुं समर्थो भविष्यति । तथाविधं तादृक्प्रकारपराक्रमशालिनं कञ्चन पुरुषमहं निर्दिशामीत्युपदिशामि । हे हिरण्याक्ष ! निर्देक्ष्यमाणः मया ते निर्देष्टुं सम्भावितः स पुरुषस्त्वया जितः पराभूतो यदि स्यात् तर्हि त्रिलोकी त्रैलोक्यं जिता त्वया पराभूता भविष्यति । तस्मिन् जिते लोकत्रयमपि जितमेव । तदितरो न जगति कश्चित् पुरुषोऽस्तीति भावः ॥ २१ ॥

मदम्भसि क्वापि महानुभावः
शेते पुमान् कश्चन शेषतल्पे ।
विश्वेश्वरो विष्णुरिति प्रतीत-
स्तदेनमासाद्य रणं वृणीथाः ॥ २२ ॥

मदम्भसीति । कश्चन ईदृश इति वक्तुमशक्यमहिमा महानुभावो महाप्रभावः पुमान् मदम्भसि मम जले शेषतल्पेऽनन्तशयने शेते निद्राति । स क इति चेच्छृणु। विश्वेषां समस्तचराचरप्रपञ्चानामीश्वरो नियन्ता विष्णुरिति प्रतीतः प्रसिद्धः । तत् तस्मात्कारणादेनं महा(पुरुषं) भगवन्तमासाद्य उपगम्य रणं वृणीथाः युद्धमभ्यर्थयेथाः ॥ २२ ॥

इदं शृण्वतोऽसुरस्य व्यवसितिमाह —

तथास्तु विश्वेश्वरशब्दमस्मा-
दाच्छिद्य सद्यो मयि योजयामि ।
जयामि चाक्ष्णोः पथि लब्धमेन-
मित्थं विकथ्य प्रचचाल दैत्यः ॥ २३ ॥

तथेति । यथा त्वमभिदधासि तथास्तु । 'विश्वेश्वरो विष्णुरिति प्रतीत' इति किल त्वयोक्तम् । तस्य विश्वेश्वर इति यः शब्दः (तं) तस्माद्विष्णोः

सकाशात्तदाच्छियापहृत्य सद्यः क्षिप्रमेव मयि योजयामि । तं शब्दं मयि समवेतं करिष्यामि । तत्कथम् । अक्ष्णोः पथि मम चक्षुर्गोचरे लब्धं प्राप्तमेनं विष्णुं जयामि च युद्धे परिभूतं करिष्यामि । उभयत्र वर्तमानसामीप्ये लट् । तस्मिन् जिते त्वहमेव विश्वेश्वर इति भावः । दैत्य इत्थं विकथ्य श्लाघापूर्वमुक्त्वा प्रचचाल ततः प्रास्थितवान् ॥ २३ ॥

एकार्णवीभूतजलैकशेषे
जगत्यटन्नुत्कटसिंहनादः ।
स्वजानुदघ्नीभवदम्बुपूरः
समन्ततो विष्णुमसौ विचिक्ये ॥ २४ ॥

एकेति । असौ दैत्यः एकार्णवीभूतं चत्वारोऽप्यर्णवा मध्ये व्यवधानाभावादैक्यमापन्ना इत्येकार्णवत्वम् । तथाभूतं जलमेकमेव शेषो यस्मिन् तादृशे जगति स्वजानुदघ्नः निजजानुप्रमाणस्तथाभवन्नम्बुपूरो जलप्रवाहो यस्य, तादृगगाधमपि जलं तस्य जानुयुगादुपरि नात्यक्रामदित्यहो तस्य शरीरदैर्घ्यमिति भावः । उत्कटो भयङ्करः सिंहनादो यस्य तथा सन् समन्ततश्चतुर्दिशं विष्णुं विचिक्ये मार्गितवान् ॥ २४ ॥

अथैवं गते सति मनोः प्रवृत्तिं प्रस्तौति —

स्वायम्भुवो नाम मनुस्तदानीं
प्रजासृडेकत्र वसन्नकाण्डे ।
मग्नां महीमप्सु विलोक्य खिन्नो
विरिञ्चमेत्य प्रणमन्नवादीत् ॥ २५ ॥

स्वायम्भुव इति । तदानीं तस्मिन् समये स्वायम्भुवः स्वयम्भुवोऽपत्यम् । ओरोदिति वक्तव्ये गुणवचनं संज्ञापूर्वको विधिरनित्य इति ज्ञापनार्थम् । तेनात्र गुणाभावः । मनुर्नाम प्रजासृट् । प्रजानां सृष्टिकर्ता एकत्र कुत्रचित् प्रदेशे वसन् विरिञ्चमेत्य ब्रह्माणमुपगम्य प्रणमन्नवादीदुक्तवान् ॥ २५ ॥

सृष्टा विसृष्टाश्च मया प्रजा या
नष्टाः क्षितेरप्सु निमज्जनात्ताः ।

भवत्विदानीं त्विह सृज्यमानाः
क्व स्रक्ष्यमाणाश्च विनिक्षिपेयम् ॥ २६ ॥

सृष्टा इति। मया सृष्टा नाशं गताः। भवतु एवमस्तु। गता(नु चेद्-शाचा ? नुशोच)नेन किं स्यादिति भावः। इदानीं तु अस्मिन् वर्तमानकाले तु सृज्यमाना निर्मीयमाणाः, तथेह स्रक्ष्यमाणा इत ऊर्ध्वकालं स्रष्टुमुपक्रान्ताश्च प्रजाः क्व कस्मिन् प्रदेशेऽहं विनिक्षिपे(यं) निदध्याम्। विना नाद्यदासां (?) निक्षेपस्थानमिति भावः ॥ २६ ॥

आधारनाशे सति नः फलं कि-
माधेयजातप्रतिपादनेन।
आकस्मिकोऽयं प्रलयं कुतस्त्यः
कष्टो हि नः स्रष्टरनिष्टपातः ॥ २७ ॥

आधारेति। आधारभूमेर्नाशे सति आधेयानां वस्तूनां जातस्य समूहस्य प्रतिपादनेन निर्माणेन नोऽस्माकं किं फलम्। किमपि न प्रयोजन-मित्यर्थः। अहमितः परं न स्रक्ष्यामीति भावः। हे स्रष्टः ब्रह्मन्। आक-स्मिकोऽसमयप्राप्तोऽयं प्रलयः कुतस्त्यः कस्मादुद्भूतः। नोऽस्माकमनिष्टपा-तोऽनिष्टप्राप्तिः कष्टः अत्याहितः। अत्यन्तशोचनीय इति यावत्। हीत्यवधारणे। कष्ट एवेत्यर्थः ॥ २७ ॥

इत्थं मनावूचुषि दिव्यदृष्ट्या
दृष्ट्वा हिरण्याक्षविचेष्टितं तत्।
प्रतीक्ष्यतां कश्चिदितोऽप्यनेहा
वत्सेति वाणीरमणोऽप्यवादीत् ॥ २८ ॥

इत्थमिति। ब्रह्मा दिव्यदृष्ट्या दिव्यचक्षुषा तं तादृशं हिर-ण्याक्षस्य विचेष्टितं व्यापारं दृष्ट्वा ज्ञात्वा हे वत्स इतोऽपीतः परस्मादपि कश्चिदनेहा कालः प्रतीक्ष्यतामनुपाल्यताम्। किञ्चित् क्षम्यताम्, सर्वं शोभनपरिणामं भविष्यति कालेनैवेति भावः। इत्येवमवादीदुक्तवान् ॥ २८ ॥

स तत्र साकं मुनिभिः समस्तैः
समाधिमास्थाय समालुलोके ।
तदक्षरं ब्रह्म तमोरजोभ्या-
मनाविलं किञ्चिदनाद्यनन्तम् ॥ २९ ॥

... ... तदक्षरं ब्रह्म । तमोरजोऽनीतमित्यर्थः । अनादि आदिरहितम् अनन्तमन्तरहितं च ब्रह्म परब्रह्मस्वरूपं समालुलोके प्रत्यक्षीकृतवान् ॥ २९ ॥

अनन्तरश्लोके वक्ष्यमाणं महो विशिनष्टि —

यत्रानुभूते सति जन्मभाजां
द्वैतभ्रमः शान्तिमुपैति सद्यः ।
स्वतोऽन्यतो वा परमार्थबोधे
स्रजि प्रसक्तेव भुजङ्गशङ्का ॥ ३० ॥

यत्रेति । यत्र यस्मिन् महसि ब्रह्मण्यनुभूते प्रत्यक्षीभूते सति जन्मभाजां शरीरिणां द्वैतभ्रमः जीवपरमात्मनोर्भेदबुद्धिः सद्यः तत्क्षणमेव शान्तिमुपैति प्रशाम्यति । अत्रोपमामाह — स्वतः स्वबुद्ध्यैव अन्यतोऽन्येनोपदिष्टत्वाद्वा परमार्थबोधे तत्त्वज्ञाने सति स्रजि प्रसक्ता भुजङ्गशङ्का स्रजं दृष्ट्वा भुजङ्गोऽयमिति शङ्का इव । तादृशी यथा प्रशाम्यति तथेत्यर्थः । तदुक्तम् —

'शुक्तौ (रजत ? रूप्य)मिव स्रजीव भुजगः स्वात्मावबोधे हरा-
वज्ञाते प्रभवत्यथास्तमयते तत्त्वप्रबोधोदयात् ।' इति । ३० ॥

यतः समुन्मीलति विश्वमेतत्
क्षयेषु यत्रैव विलीयते च ।
तदेतदानन्दरसैकरूपं
विभावयामास महो विधाता ॥ ३१ ॥

यत इति । एतद् दृश्यमानं विश्वं यतो यस्मात्समुन्मीलत्युदेति । प्रकाशीभूय दृश्यत इत्यर्थः । क्षयेषु प्रलयेषु यत्रैव यस्मिन्नेव विलीयते श्लिष्यति । विलयमधिगच्छति । तदेतत्तथाभूतमिदम् आनन्दरसं परमानन्दानुभव एक एव रूपं यस्य, तादृशं महो ब्राह्मं तेजो विधाता विभावयामास विलोकितवान् ॥ ३१ ॥

एवं समाधाय चिराय विष्णौ
धियं सभामावसतो विधातुः ।
घोणान्तरात् कश्चन घोणिपोतो
विनिष्पपात प्रथमानतेजाः ॥ ३२ ॥

एवम् इति । एवमुक्तप्रकारं चिराय दीर्घकालं धियं विष्णौ समाधाय समाध्यवस्थायां दृढमनुषज्येत्यर्थः । सभां मुनिपरिषदमावसतस्तत्र स्थितवतो विधातुर्घोणान्तरात् कश्चन प्रथमानतेजाः प्रवृद्धशरीरद्युतिर्घोणिपोतः सूकरशिशु-र्विनिष्पपात अधः पतितः ॥ ३२ ॥

समाधिबन्धाच्छ्लथितान्तरात्मा
पद्मासनः प्रेक्ष्य वराहमेनम् ।
मुकुन्दकारुण्यसुरद्रुमस्य
फलोद्गमोऽसाविति निश्चिकाय ॥ ३३ ॥

समाधीति । पद्मासनो ब्रह्मा समाधिबन्धाच्छ्लथितः शिथिलीकृतोऽन्त-रात्मा मनो येन स तथा एनं वराहं प्रेक्ष्य दृष्ट्वा असावत्र दृश्यमानो मुकुन्दस्य कारुण्यमेव सुरद्रुमः कल्पवृक्षस्तस्य फलोद्गमः फलप्राप्तिरिति निश्चिकाय निश्चितवान् । भगवतो दीनमनोविषया कृपैवेत्थं घोणिरूपेण दृष्टा इति मनसि दृढीकृतवानित्यर्थः ॥ ३३ ॥

क्षणेन पोत्री महिषप्रमाणः
सोऽभूदतो गन्धगजप्रमाणः ।
ततः परस्तादचलप्रमाण-
स्ततः परेणाभवदप्रमाणः ॥ ३४ ॥

क्षणेनेति । पोत्री वराहशिशुः क्षणेन क्षिप्रं महिषप्रमाणोऽभूत् । महिषतुल्यप्रथिमाभवत् । अतस्तदनन्तरं स पोत्री गन्धगजप्रमाणः महागज-तुल्योऽभूत् । ततः परस्तादुपरिकाले अचलप्रमाणः पर्वतसदृशः । ततः परेण तदुत्तरकालमप्रमाणः अनेन तुल्य इति प्रमातुमशक्योऽभूत् । अतिप्रवृद्धत्वा-दुपमानरहितोऽभूदित्यर्थः ॥ ३४ ॥

स सत्यलोकात् पृथुकण्ठरोम-
व्याविधनिर्दारितवारिवाहः ।
अधोमुखोऽवातरदुग्रदंष्ट्रा
सङ्घर्षणोद्यद्दहनस्फुलिङ्गः ॥ ३५ ॥

स इति । स आदिवराहः सत्यलोकात्सकाशादधोमुखोऽवातरदवततार । कीदृशः । पृथूनां स्थूलदीर्घाणां कण्ठरोम्णां व्याधेधेन ताडनेन निर्दारिता नितरां भेदिता वारिवाहा मेघा येन । उग्रयोः क्रूरयोः दंष्ट्रयोः सङ्घर्षणेन, तदधोदन्तेन निकर्षणे सति उद्यन्त उच्चैरुत्पतन्तो दहनस्फुलिङ्गा वह्निकणिका यस्य स तथाभूतः ॥ ३५ ॥

गलोद्गलद्घर्घरघोरनाद-
प्रस्फोटिताशाकरिकर्णरन्ध्रः ।
घोणान्तरोदित्वरगन्धवाह-
व्याघूर्णिताणोंधिपयःप्रवाहः ॥ ३६ ॥

गलेति । गलात् कण्ठविवरादुद्गलतोद्गच्छता घर्घरेण परुषतरेण घोरेण भयङ्करेण नादेन करणेन प्रस्फोटितानि आशाकरिणां दिग्गजानां कर्णरन्ध्राणि येन । घोणान्तरान्नासिकारन्ध्रादुदित्वरैरुद्गमनशीलैर्गन्धवाहैः श्वासपवनैर्व्याघूर्णितः संक्षोभितोऽर्णोधीनां समुद्राणां पयःप्रवाहो सलिलपूरो येन ॥ ३६ ॥

ह्रस्वस्थवीयस्तरबालदण्ड-
चण्डाभिघातत्रुटिताद्रिकूटः ।
प्रवालभङ्गारुणनेत्ररोचि-
र्वीचिच्छटाविच्छुरिताखिलाशः ॥ ३७ ॥

ह्रस्वेति । ह्रस्वेनाल्पदीर्घेण स्थवीयस्तरेण स्थूलतमेन बालदण्डेन दण्डाकारलाङ्गूलेन यश्चण्डाभिघातः क्रूरप्रहरणं तेन त्रुटितानि खण्डितान्यद्रिकूटानि पर्वतशृङ्गाणि येन । प्रवालभङ्ग इव विद्रुमच्छद इवारुणयोस्ताम्रयोर्नेत्रयो रोचिर्वीचीनां तरङ्गाकृतीनां दीप्तीनां छटाभिः समूहैर्विच्छुरिताः स्पृष्टा अखिलाशाः सर्वा दिशो यस्य ॥ ३७ ॥

आम्यत्तिमि त्रस्ततिमिङ्गलौघं
विक्षोभदुर्घट्टितनक्रचक्रम् ।

उत्कूलितोत्तुङ्गतरङ्गमालं
जवादवागाहत सागराम्भः ॥ ३८ ॥

भ्राम्यद् इति । स तादृशो हरिर्वराहो जवाच्छीघ्रं सागराम्भः समुद्रसलिलमवागाहत प्रविष्टवान् । कीदृशं सागराम्भः । भ्राम्यन्तश्चलन्तस्तिमयो मत्स्यविशेषा यस्मिन् । त्रस्तो भीतस्तिमिङ्गलौघो यत्र । विक्रोशदाक्रन्दद् उच्चैर्द्रुतमुपरिप्रभावितं नक्रचक्रं यस्मिन् । उत्कूलिताः कूलमतिक्रान्ता उत्तुङ्गा उन्नतास्तरङ्गमाला वीचिसमूहा यस्मिन् । सर्वमिदं तदवस्थाविशेषणं द्रष्टव्यम् ॥ ३८ ॥

दैत्येन या मूढतमेन गूढं
न्यधायि पातालतले खलेन ।
इतस्ततस्तत्र महीं महीया-
न्मायामृगस्तां मृगयाञ्चकार ॥ ३९ ॥

... ... मृगयाञ्चकारान्विष्टवान् । मृगधातुश्चौरादिकोऽदन्तः । (नो वृद्धित्वम् ? अतो न वृद्धिः) ॥ ३९ ॥

निगूहितामप्यसुरेण धात्रीं
पोत्रीश्वरः सत्वरमाललोके ।
प्रमेयपालिं प्रभवेत् कथं वा
निह्नोतुमह्नां प्रभवेऽन्धकारः ॥ ४० ॥

निगूहिताम् इति । पोत्रीश्वरोऽसुरेण निगूहितां कुत्रचित् गोपितामपि धात्रीं सत्वरं द्रुतमाललोके आलोकितवान् । अत्र दृष्टान्तमाह — अन्धकारस्तिमिरं प्रमेयपालिं नरतिर्यगादिपदार्थसार्थं अह्नां प्रभवे सूर्याय निह्नोतुमपलपितुं कथं वा प्रभवेत् शक्नुयात् । अनेन सर्वसाक्षिणे भगवते कथं तमसा मूढो महीं निह्नुवीतेति समर्थितम् ॥ ४० ॥

स तत्क्षणं रक्षिभटान् प्रमथ्नन्
पोत्राञ्चलेनावनिमाबभार ।
सा तत्र शेषाहिफणासहस्र-
विस्रब्धवासादधिकं ननन्द ॥ ४१ ॥

स इति । स पोत्रीश्वरस्तत्क्षणं क्षिप्रं रक्षिभटान् रक्षापुरुषान् दैत्यान् प्रमश्नन् सञ्चूर्णयन् पोत्राञ्चलेन दंष्ट्राग्रेणावनिं धात्रीमाबभार धृतवान । आबभारेति पोत्राञ्चलस्याभरणत्वेनावनिमुद्धृतवानित्यर्थः । सा अवनिस्तत्र पोत्राग्रे शेषाहेरनन्तस्य फणानां सहस्रे यो विस्रब्धवासः विश्वासेन सुखावस्थान-स्तस्मादधिकं ननन्द सुखितवती । शेषफणासहस्रादप्यधिकविस्तीर्णत्वात् पोत्राञ्चलस्यासम्बाधस्थितियोग्यत्वम् ॥ ४१ ॥

नदीनदग्रामनगाटवीनां
शतान्यसङ्ख्यान्यपि बिभ्रती सा ।
अलक्ष्यतानेन हि पोत्रशृङ्गे
न्यस्ता तु मुस्तालतिकेव लघ्वी ॥ ४२ ॥

नदीति । सा धात्री नदीनां नदानां ग्रामाणां नगानामटवीनां चा-सङ्ख्यानि सङ्ख्याविहीनानि । शतान् समूहान् बिभ्रती धारयन्ती सत्यपि अनेन हि पोत्रीश्वरेण पोत्रशृङ्गे दंष्ट्राशिखरे न्यस्ता निक्षिप्ता तु मुस्तालतिकेव तृणविशेष इव लघ्वी अल्पीयसी अलक्ष्यत दृष्टा । जनैरिति शेषः । आधे-यादप्याधारस्य वैपुल्यमत्र प्रदर्शितम् ॥ ४२ ॥

अत्रान्तरे योगिभिरप्यदृश्यं
विष्णुं विचिन्वानमपां निकाये ।
कलिप्रियः कामचरो मुनीन्द्रो
गत्वा हिरण्याक्षमिदं बभाषे ॥ ४३ ॥

अत्रेति । अत्रान्तरेऽस्मिन्नवसरे योगिभिस्तपोधनैरप्यदृश्यं द्रष्टुमलभ्यं विष्णुमपां निकाये जलप्रपञ्चे विचिन्वानं गवेषयन्तं हिरण्याक्षं कलिप्रियः कलहकुतुकी । नारद इत्यर्थः । कामचरः स्वच्छन्दसञ्चारी मुनीन्द्रो गत्वा समेत्येदं वक्ष्यमाणप्रकारं बभाषे भाषितवान् ॥ ४३ ॥

दिष्ट्यासि दृष्टो दितिजाधिनाथ !
वृथा परिक्रामसि वारिचक्रे ।
चक्रायुधस्तु प्रविचीयते चे-
दायाहि मायाविनमीक्षयामि ॥ ४४ ॥

दिष्टयेति। हे दितिजाधिनाथ दानवश्रेष्ठ दिष्टया दैवानुकूल्यादसि दृष्टो मयावलोकितः। असीति त्वमर्थमव्ययम्। वारिचक्रे जलप्रवाहे वृथा परिक्रामसि निष्फलमेव परितः सञ्चरसि। चक्रायुधो विष्णुस्तु प्रविचीयतेऽन्विष्यते चेत्तर्ह्यायाहि आगच्छ। मायाविनं मायाशालिनमेनमहमीक्षयामि तव दर्शयामि। तस्य मायावित्वादेवादर्शनमिति भावः॥ ४४॥

त्वया सनाथामपि भूतधात्रीं
पोत्रीभवन्नेष हरत्यशङ्कम्।
पञ्चाननेनेव जिघृक्ष्यमाणां
मृगीं निगूढप्रसरः सृगालः॥ ४५॥

त्वयेति। एष चक्रायुधः त्वया सनाथां नाथवतीमपि (भूतधात्रीम्) अशङ्कं शङ्कां विना पोत्रीभवन् मायावराहो भूत्वा हरति स्वीकरोति। न त्वहरदिति इदानीं हरणक्रिया प्रवर्तते इति भावः। कथमिव। पञ्चाननेन सिंहेन जिघृक्ष्यमाणां (हर्तुं? ग्रहीतु)मिष्यमाणां मृगीं निगूढप्रसरो निभृतसञ्चारः सृगाल इव क्रोष्टेव। उपमया च धात्रीहर्तुः साहसिक्यमुपन्यस्तम्॥ ४५॥

यदादिमध्यान्तदशात्रयेषु
कालेषु न भ्रश्यति दृश्यमानम्।
घटेत तत्रैव समीक्ष्यकारी
धर्म्येऽप्यधर्म्येऽपि हि कार्यजाते॥ ४६॥

यद् इति। यत्कार्यजातं कृत्यप्रचयः आदिर्मध्यमन्तश्च इति यद् दशात्रयं अवस्थात्रितयं तद्वत्सु कालेषु दृश्यमानं पर्यालोच्यमानं सत् न भ्रश्यति न परिच्युतं भवति। कार्यं पुनरुचितमनुचितं वेति न विचार इत्याह धर्म्येऽप्यधर्म्येऽपीति। धर्मादनपेते अपेते वा। तत्रैव तस्मिन्नेव कार्ये। आरम्भे मध्येऽवसाने च यन्निर्बाधं भवति तस्मिन्नेव कार्ये विचारवान् प्रयतेतेत्यर्थः। हि यस्मादर्थे। यदीदमीदृशं तस्मादहं ब्रवीमीति तात्पर्यम्। अतस्त्वयास्मिन् प्रस्तुते कार्ये नोदासितव्यमिति भावः॥ ४६॥

प्रवर्तमानः प्रथमं क्रियासु
प्रवर्द्धमानाभिनिवेशचेताः।

क्षतासु तासु क्वचिदप्रहृष्टो
निवर्तते यः स पुमानमान्यः ॥ ४७ ॥

प्रवर्तमान इति । यः प्रवर्धमानाभिनिवेशं प्रकर्षेण वर्धमानतात्पर्यं चेतो यस्य तादृशः पुमान् क्रियासु कार्येषु प्रथममादौ प्रवर्तमान उद्युक्तः सन् क्वचिद्विषये तासु स्वयमारब्धासु क्रियासु क्षतासु भग्नासु सतीषु अप्रहृष्टोऽसन्तुष्टः । निर्विण्णो भूत्वेत्यर्थः । निवर्तते ताभ्यः क्रियाभ्यो विरम्य तूष्णीं तिष्ठति । स तादृशः पुमानमान्यः निन्दनीयः । तादृशं पुरुषं न कोऽप्याद्रियत इत्यर्थः । त्वया तादृशेन न भवितव्यमिति प्रस्तुतमप्रस्तुतेन द्योत्यते । सामान्यतो विशेषावगतिरूपोऽयमप्रस्तुतप्रशंसा ॥ ४७ ॥

निजेच्छया वा परचोदनाद्वा
बलीयसा यद्विहितं बलेन ।
विवेकिने स्यादहितं हितं वा
पुनस्ततो न व्यपवर्तितव्यम् ॥ ४८ ॥

निजेति । बलीयसा बलवता पुरुषेण निजेच्छया स्वेच्छया परकर्तृकाच्चोदनात् प्रेरणाद्वा बलेन हठेन यद्विहितं कार्यमारब्धं तत् कार्यं तु विवेकिने विचारशालिने जनाय हितमनिष्टं वा स्यात् । यद्वा तद्वा भवतु तत्र विचारणीयमित्यर्थः । सर्वथा ततस्तस्मात्कार्यात् पुनर्न व्यपवर्तितव्यं न निवर्तितव्यम् । तत्रैव नितरामभियुक्तेन भाव्यमित्यर्थः । यदाहुः—

'प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैः पुनःपुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति' । इति ॥ ४८ ॥

पुनरपि प्रोत्साहयति —

सखे हिरण्याक्ष समाहृतायास्त्वया बलादेव वसुन्धरायाः ।
प्रत्याहृतिं कुर्वति सर्वदेव
प्रियङ्करे वैरिणि को विचारः ॥ ४९ ॥

सखे इति। हे सखे हिरण्याक्ष, त्वया सह सखित्वादेव ते हितं ब्रवीमीति भावः। त्वया बलादेव भुजबलेनैव समाहृतायाः वसुन्धरायाः भूमेः सर्वेषां देवानां प्रियङ्करे हितकारिणि वैरिणि विष्णौ प्रत्याहृतिं कुर्वति प्रत्याहरणं कुर्वाणे सति को विचारः तन्निग्रहः कर्तव्यो वेति विचारः कीदृशः स्यात्। स विचारो न कर्तव्य इत्यर्थः॥ ४९॥

क्षमेत गन्धद्विरदः प्रमादात्
कदाप्यनिच्छन्नपि शृङ्गभङ्गम्।
न त्वादृशः कोऽपि सहेत वीरः
शत्रोः सकाशादभिमानभङ्गम्॥ ५०॥

क्षमेतेति। गन्धद्विरदो मतङ्गजः कदापि समये प्रमादा(दन)वधानत्वाद्धेतोरनिच्छन्नपि शृङ्गभङ्गं निजदन्तकृन्तनमन्येन कृतं क्षमेत सहेतेत्यपि संभावनीयम्। शृङ्गभङ्गमिति दन्तस्य स्थौल्यदैर्घ्यविवक्षया शृङ्गत्वेनाध्यवसायादतिशयोक्तिः। तथापि (ता? त्वा)दृशः कोऽपि भवत्समानधर्मा वीरः कोऽपि शत्रोः सकाशादभिमानभङ्गं निजमानक्षयं न सहेत न क्षमेत। स्वहृतस्य वस्तुनोऽन्येन यत्प्रत्याहरणं ततोऽधिकः कोऽवमानस्तवास्तीति भावः॥ ५०॥

सर्वथा मानभङ्गो न पथ्य इत्याह—

अन्यस्य कामं द्रविणोत्करस्य
त्यागो यशः संप्रचिनोति पुंसः।
अमुष्य तु प्रत्युत मानना‌म्नो
ह्यत्याग एवातितरां यशस्यः॥ ५१॥

अन्यस्येति। अन्यस्य वक्ष्यमाणादितरस्य द्रविणोत्करस्य धनसञ्चयस्य त्यागो विनियोगः दानमिति यावत्। पुंसो यशः कीर्तिं संप्रचिनोति सम्यग्वर्धयति। कामं तथास्तु। अमुष्य माननाम्नोऽभिमानसंज्ञस्य द्रविणोत्करस्य प्रत्युत विपरीतमेव। अत्याग एवावर्जनमेवातितरां यशस्यः। यशसे भवतीति यशस्यः कीर्तिप्रदो भवति। हिरत्र प्रसिद्धौ॥ ५१॥

अखण्ड्यमानामियतोऽपि कालाद्
नन्यसाधारणभावबन्धाम्।
स्वयं गृहीतामभिमानवत्तां
मास्म त्यज त्वं महिषीमिव स्वाम्॥ ५२॥

अखण्ड्येति । इयतः कालानपि । अत्यन्तसंयोगे द्वितीया । एतावतीतेषु कालेषु सर्वत्रेत्यर्थः । अखण्ड्यमानामभज्यमानाम् अक्षतपूर्वाम् । अन्येष्वपि साधारणो न भवतीत्यनन्यसाधारणो भावबन्धः सर्वथा स्थिरत्वं यस्यास्तादृशीम् । स्वयं गृहीतामात्मनैवावलम्बितामभिमानवत्तामभिमानशालित्वं त्वं मा स्म त्यजः मा परित्याक्षीः । अत्रोपमानमाह—स्वां महिषीं प्रियतमामिवेति । महिषीपक्षे अखण्ड्यमानां 'खण्डितेर्ष्याकषायिना' खण्डनमप्रापितामित्यर्थः । भावबन्धोऽनुरागः । स्वयंगृहीतां परिणीतामिति व्याख्येयम् ॥ ५२ ॥

नारदवचनमुपसंहरति—

इति ब्रुवाणे कलहोपपाद-
क्रियाप्रवीणे करलग्नवीणे ।
मुनौ तदावेदितमार्गगामी
चचाल रोषज्वलितोऽसुरेन्द्रः ॥ ५३ ॥

इतीति । कलहस्य कलहस्योपपादक्रियायामुत्पादने प्रवीणे विशेषे करलग्नवीणे करधृतवल्लकीके मुनौ नारदे इत्येवं ब्रुवाणे प्रोत्साहनरूपां गिरमभिदधति सति रोषेण क्रुद्धविषयाभर्षेण ज्वलितो दीप्तोऽसुरेन्द्रस्तेन मुनिनावेदितेन ज्ञापितेन मार्गेण गन्तुं शीलमस्येति तथा सञ्चचाल प्रस्थितवान ॥ ५३ ॥

क्वासावहो विष्णुरनिष्टमेवं
कुर्वन्मम क्वैष गमिष्यतीति ।
जल्पन्मुहुर्मुक्तघनाट्टहासो
रुरोध तं दंष्ट्रिणमुज्जिहानम् ॥ ५४ ॥

क्वेति । असौ विष्णुः क्व । वर्तत इति शेषः । अहो कष्टम् । एष विष्णुरेवं धात्रीप्रत्याहरणरूपं ममानिष्टमप्रियं कुर्वन् क्व गमिष्यति । (त ! क)-स्मिन् प्रदेशे जीवितुकामः प्रयास्यति इति जल्पन् प्रलपन् मुहुरसकृन्मुक्तघनाट्टहास उच्चैःशब्दमुत्सृजन् । उज्जिहानं धरणीमादायोद्गच्छन्तं सलिलचक्रादुन्मज्जन्तं तं तथाभूतं दंष्ट्रिणमादिवराहरूपं भगवन्तं रुरोध निरुद्धवान् ॥ ५४ ॥

क्व यासि मिथ्यामृग! तिष्ठ तिष्ठ
प्राप्तो ममाक्ष्णोः पथि दैवयोगात् ।
न मोक्ष्यसे हन्त! कियच्चिरं त्वा-
मस्मिन् जगत्येष गवेषयामि ॥ ५५ ॥

क्वेति । मिथ्यामृग मायावराह क्व यासि कुत्र गच्छसि । तिष्ठ तिष्ठ । दैवयोगान्ममाक्ष्णोः पथि चक्षुर्मार्गे प्राप्तस्त्वं न मोक्ष्यसे मया नोपेक्ष्यसे । हन्त महत्कष्टमिदम् । एषोऽहं त्वामस्मिन् जगति कियच्चिरं कियन्तं कालम् । बहुकालमित्यर्थः । गवेषयाम्यन्विच्छामि ॥ ५५ ॥

गदाभिघातत्रुटितोत्तमाङ्गा-
द्विनिर्गलद्भिर्भवतः कबन्धात् ।
उद्घूर्णदर्णोनिधितोयमुच्चै-
रुत्कूलयामो रुधिरप्रवाहैः ॥ ५६ ॥

गदेति । अर्णोनिधितोयं समुद्रजलं रुधिरप्रवाहैर्लोहितप्रबन्धैर्वयमुत्कूलयामः उल्लङ्घितकूलं करिष्यामः । कीदृशैः । गदाभिघातेन त्रुटितोत्तमाङ्गात् खण्डितमस्तकाद् भवतः कबन्धादपमूर्धकलेबराद् विनिर्गलद्भिः निपतद्भिः । संभूय समुद्रं प्रविशद्भिरित्यर्थः । अर्णोनिधितोयं तु उच्चैरुद्घूर्णदुत्पतदुच्चलितं कृत्वोत्कूलयाम इति संबन्धः ॥ ५६ ॥

विश्वैकवीरेण वसुन्धरेयं
मया जिता मर्त्यकुलप्रतिष्ठा ।
प्रवीरहीरैकवशंवदाद्य
कथं नु भूदार तवास्तु दाराः ॥ ५७ ॥

विश्वेति । हे भूदार ! भुवं दारयतीति भूदारः । दुःस्वभावशालीति भावः । विश्वैकवीरेण वीरगणनायामद्वितीयेन मया जितेयं वसुन्धरा स्ववशीकृतेयं भूमिः । कीदृशी । मर्त्यकुलस्य ; इदमुपलक्षणं नगमृगाद्यचराचरभूतप्रपञ्चस्य । प्रतिष्ठा आस्पदम् । प्रवीराः प्रधानवीरास्तेषां मध्ये हीरस्य विशेषभूतस्य एकस्य केवलस्य वशंवदा अधीना । तादृशीयं तव दाराः कथमस्तु । कदापि दुर्बलस्य तवाधीना न भविष्यतीत्यर्थः । भूदारशब्द (स्तु ! स्य नु) भूर्दारा यस्येति नात्र व्युत्पत्तिः । भुवं दारयतीत्येव ॥ ५७ ॥

जिजीविषुश्चेदसि तर्हि पोत्रिन्!
धात्रीं जहन् गच्छ वनं विनीतः ।
वयं कृतागस्स्वपि सानुताप-
मासेवमानेषु न दण्डधाराः ॥ ५८ ॥

जिजीविषुरिति । हे पोत्रिन् वनमृग ! त्वं जिजीविषुः जीवितुमिच्छुरसि चेत्तर्हि धात्रीं जहन् भूमिमुत्सृजन् विनीतो विनयवान् वनं गच्छ स्वास्पदं विपिनगह्वरमेव प्रविश । वयं कृतागस्स्वपि कृतापराधेष्वपि जनेषु सानुतापं पश्चात्तापयुक्तं यथा भवति तथा सेवमानेषु आश्रयत्सु सत्सु न दण्डधाराः दण्डो निग्रहस्तं न कुर्म इत्यर्थः । इदमेकं तवागः सहिष्याम इति भावः ॥ ५८ ॥

पक्षान्तरमाह—

अथात्मवक्त्रोद्धृतपोत्रशस्त्रः
सत्रासि सङ्ग्रामयिषुर्मया चेत् ।
घटस्व योद्‌धुं मृगयाविनोदो
न हि प्रभूणामतिलाघवाय ॥ ५९ ॥

अथेति । मया सत्रा मया सह अथवासि सङ्ग्रामयिषुः सङ्ग्रामयितुमिच्छुश्चेत्तर्हि घटस्व योद्‌धुं चेष्टस्व । ननु निरायुधः कथमहं गदायुधेन त्वया सह सङ्ग्रामय इति चेदत्राह— आत्मवक्त्रेण स्वमुखेनैवोद्धृतं पोत्रमेव स्वदंष्ट्रैव शस्त्रमायुधं येन तथाभूतस्त्वम् । त्वद्वधोऽपि मम नातिलाघवाय भवेदित्याह—प्रभूणां प्रभवतां राज्ञां मृगयाविनोदो मृगरमणरूपः क्रीडामयः कालक्षेपोऽतिलाघवायातिक्षुद्रत्वाय (न) हि भवति । 'मारयन्ति मृ(गासु! गयासु) धन्विनो जन्तुजातमपि' इति वचनादिति भावः । हिरत्र हेतौ ॥ ५९ ॥

अङ्गानि ते मेदुरमांसभृन्ति
गदाप्रहारेण विदारितानि ।
ग्राहा अमी सम्प्रति सङ्ग्रसन्तः
सौहित्यदुःस्थां दधतामवस्थाम् ॥ ६० ॥

अङ्गानीति । सम्प्रतीदानीममी दृश्यमाना ग्राहा नक्रास्तेऽङ्गानि तव शरीरावयवान् सङ्ग्रसन्तो भक्षयन्तः सौहित्येनात्युदरपूरणेन दुःस्थामवस्थां दधतामनुभवन्तु । कीदृशान्यङ्गानि मेदुराणि । प्रवृद्धानि मांसानि बिभ्रतीति तद्भृन्ति ।

· गदाप्रहारेण विदारितानि विभिन्नानि । गदाप्रहृतिविच्छिन्नत्वाद् बहिर्निर्गलितमांसमेदोवसापरिप्लुतानीत्यर्थः ॥ ६० ॥

इत्युत्कटोड्डामरभूरिवाचं
मदाद्गदायोधिनमापतन्तम् ।
गदायुधस्तं निरुरोध पोत्री
यथापुरं स्थापितभूमिभागः ॥ ६१ ॥

इतीति । पोत्री भगवानादिसूकरः यथापुरं पूर्वं यथा तथैव स्थापितः स्थिरीकृतो भूमिभागो येन तथा सन् गदायुधस्तं हिरण्याक्षं निरुरोध निरुद्धवान् । कीदृशम् । इति एवंप्रकारम् उत्कटाः क्रूराः उड्डामरा भयङ्करा भूरयो बहुप्रकाराश्च वाचो यस्य । मदाद्गर्वाद्धेतोः गदायोधिनं गदया युध्यमानमापतन्तमाभिमुख्येनागच्छन्तम् ॥ ६१ ॥

विचित्रचक्रभ्रमणप्रवीणौ
मिथोऽधिमर्मं प्रणिजघ्निवांसौ ।
पदाभिघाताकुलिताङ्घ्रिशैला-
वयुध्यतां पोत्रिवरासुरेन्द्रौ ॥ ६२ ॥

विचित्रेति । पोत्रिवरोऽसुरेन्द्रश्च तौ । विचित्रे नानाप्रकारे चक्रभ्रमणे मण्डलसञ्चारे प्रवीणौ कुशलौ । मिथोऽन्योन्यमधिमर्मं मर्मणि । अनश्च इति (चे ? टच्) समासान्तः । प्रणिजघ्निवांसौ प्रहारं कृतवन्तौ । पदाभिघातेनाकुलिताश्चलिता अङ्घ्रयः शैला याभ्यां तथा सन्तौ । अयुध्यतां युद्धं कृतवन्तौ । अयुध्यतामित्यस्य परस्मैपदयुक्तिरुक्तैव ॥ ६२ ॥

परस्पराघातविशीर्णकोटी
गदे परित्यज्य गरिष्ठवीर्यौ ।
तलातलिप्रायमुपाक्रमेता-
मनीकमेतावतिघोरघोरम् ॥ ६३ ॥

परस्परेति । एतौ पोत्रिवरासुरेन्द्रौ गरिष्ठवीर्यौ गुरुतरपराक्रमौ परस्पराघातेनान्योन्यप्रहारेण विशीर्णकोटी जर्जरिताग्रे गदे परित्यज्य किमनयेत्युपेक्ष्य तलातलिप्रायं तलैः तलैः प्रहृत्य प्रवृत्तं युद्धं तलातलि । तत्प्रायं

बाहुल्येन तन्मयं अतिघोरघोरमत्यन्तभयङ्करमनीकं द्वन्द्वयुद्धमुपाक्रमेतां प्रारब्धवन्तौ ॥ ६३ ॥

हर्षप्रकर्षप्रविधूनितेन
बन्धश्लथाकीर्णजटेन मूर्ध्ना ।
सम्भावयामास तयोर्नियुद्धं
हिरण्यगर्भाङ्कभवो मुनीन्द्रः ॥ ६४ ॥

हर्षेति । हिरण्यगर्भस्य ब्रह्मणोऽङ्कात् भवो जननं यस्य स मुनीन्द्रो नारदस्तयोः पुण्डरीकाक्षहिरण्याक्षयोर्नियुद्धं द्वन्द्वयुद्धं हर्षप्रकर्षात् प्रीत्यतिशयात् प्रविधूनितेन प्रकम्पितेन । अत एव बन्धाद् बन्धनात् श्लथाभिः शिथिलाभिराकीर्णाभिर्व्याप्ताभिर्जटाभिरुपलक्षितेन मूर्ध्ना मस्तकेन सम्भावयामास श्लाघितवान् । स्वप्रोत्साहनं फलितमिति हर्षः ॥ ६४ ॥

भयोदितोत्कम्पघनस्तनीभि-
र्गाढोपगूढैर्मुहुरप्सरोभिः ।
समीकसन्दर्शनसाभिलाषै-
र्निरन्तरा द्यौरभवन्निलिम्पैः ॥ ६५ ॥

भयेति । समीकसन्दर्शने युद्धावलोकने साभिलाषैरिच्छाशालिभिर्निलिम्पैर्देवैर्द्यौरम्बरमार्गो निरन्तरा निबिडाभूत् । कीदृशैः । भयात्त्रासादुदित उद्भूत उत्कम्पो वेपथुर्ययोस्तौ च घनौ कठिनौ च स्तनौ यासां तादृशीभिरप्सरोभिर्देवीभिः मुहुरनेकवारं गाढोपगूढैर्दृढतरमाश्लिष्टैः । एतेन तेषां सौभाग्यातिशयो व्यज्यते ॥ ६५ ॥

अथासुरेन्द्रः समरे ससर्ज
प्रकारबाहुल्यदुरासदानि ।
मायामयान्यक्षतयक्षरक्ष-
स्तरक्षुपक्षीण्यसुहृच्छतानि ॥ ६६ ॥

अथेति । अथानन्तरं असुरेन्द्रो हिरण्याक्षः समरे द्वन्द्वयुद्धमध्ये मायामयानि मायया निर्मितान्यात्मस्वरूपाण्यसुहृदां शत्रूणां शतानि समूहान् ससर्ज सृष्टवान् । कीदृशानि । प्रकाराणां स्थूलत्वनीलत्वह्रस्वत्वदीर्घत्वकृशत्व-

ताम्रत्वधूम्रत्वादिस्वरूपाणां बाहुल्येन बहुत्वेन दुरासदानि दुरभिभवानि । अक्षता भङ्गरहिता यक्षादयो येषु । 'तरक्षुस्तु मृगादनः' इत्यमरः । व्याघ्रविशेषास्तरक्षवः ॥ ६६ ॥

स्मृतोपहूते हरिसूकरेण
स्फुरत्प्रभामण्डलदुर्निरीक्षे ।
सुदर्शने तानि जवादवापु-
र्भङ्गं पतङ्गा इव हव्यवाहे ॥ ६७ ॥

स्मृतेति । हरिसूकरेणादिवराहेण स्मृतोपहूते पूर्वं स्मृते पश्चादुपहूते । स्मरणेन सन्निधापित इत्यर्थः । स्फुरता प्रकाशमानेन प्रभामण्डलेन मण्डलाकारया प्रभया दुर्निरीक्षे द्रष्टुमशक्ये .... ॥ ६७ ॥

तरसैव शूलमसुरेण चोदितं
शकलीचकार युधि तेन सूकरः ।
ज्वलति प्रकाममहिमांशुमण्डले
क्व पुनश्चकास्ति कुलमन्यतेजसाम् ॥ ६८ ॥

..........सुदर्शनेन युधि तरसैव क्षिप्रं शकलीचकार चूर्णीकृतवान् । अत्र दृष्टान्तमाह — अहिमांशुमण्डले सूर्यबिम्बे प्रकाममत्यर्थं ज्वलति सति अन्यतेजसां नक्षत्रादीनां कुलं वृन्दं क्व चकास्ति । क्वापि न प्रकाशत इत्यर्थः । मञ्जुभाषिणी नाम वृत्तमिदम् ।

'सजौ सजौ गुरुश्चैको यत्र सा मञ्जुभाषिणी ।

इति ॥ ६८ ॥

पादाङ्गुष्ठेन विद्धो विधिवचनसमाकर्णनात्कर्णमूले
लीलाभूदारवीरेण स दनुजभटः पातितो भूतधात्र्याम् ।
वक्त्रप्रोद्वान्तभूरिक्षतजभरझरीचर्चितोत्तुङ्गगात्रः
सुत्राम्णा वज्रभिन्नः कुहरपरिगलद्धातुदिग्धो यथाद्रिः ॥ ६९ ॥

पादेति । लीलाभूदारवीरेण क्रीडावराहवपुषा भगवता विधेर्ब्रह्मणो वचनस्य कर्णमूले प्रहर्तव्यमित्युपदेशस्य समाकर्णनाद्धेतोः पादाङ्गुष्ठेन कर्णमूले

विद्धः प्रहृतः स दनुजभटो हिरण्याक्षो वक्त्रादास्यकुहरात् प्रोद्वान्ताभिरुद्गलिताभिर्भूरीभिर्बह्वीभिः क्षतजभरझरीभिरसृक्प्रवाहरूपैः निर्झरैश्चर्चितं लिप्तमुत्तुङ्गमुन्नतं गात्रं यस्य तथा सन् भूतधात्र्यां भूमौ पातितः क्षिप्तः । सुत्राम्णा वज्रिणा वज्रेण भिन्नः कृत्तपक्षः कुहरेभ्यः परिगलद्भिर्निपतद्भिर्धातुभिर्मनःशिलादिपङ्कैर्दिग्धोऽद्रिः शैलो यथा पात्यते तद्वदिति सम्बन्धः ॥ ६९ ॥

अवतारवृत्तमिदमुपसंहरति —

एवं भूवलयं जवादविलयं कृत्वा प्रतिष्ठापयन्
प्राज्ञैर्यज्ञतनुर्महामुनिवरैः संस्तूयमानो भृशम् ।
वैकुण्ठं विदुषामकुण्ठतपसामासाद्यमासेदिवा-
नव्याद्दिव्यवराह एष भवतो देवः स नारायणः ॥ ७० ॥

एवम् इति । एवमुक्तप्रकारं भूवलयं भूचक्रवालं जवात् क्षिप्रमविलयं नाशरहितं कृत्वा प्रतिष्ठापयन् शत्रून् निहत्य यथास्थानं दृढीकुर्वन् प्राज्ञैर्विद्वद्भिर्महामुनिवरैर्दिव्यैर्महर्षिभिर्यज्ञतनुरिति यज्ञरूपावयवो भगवान् वराह इति भृशमत्यर्थं संस्तूयमानः सम्यक् प्रशस्यमानः सन् अकुण्ठतपसामव्याहततपश्चर्यानिरतानां विदुषां ब्रह्मवादिनामासाद्यं प्राप्तुमर्हं वैकुण्ठं नाम स्वास्पदमासेदिवान् प्राप्तः । एष एवंभूतो देवो दिव्यवराह आदिवराहरूपो नारायणः भगवान् भवतः सामाजिकानव्याद्रक्षतु । सर्वेषामपि मङ्गलं सम्पादयत्वित्याशीर्वचनमिदम् ॥ ७० ॥

इति विष्णुविलासे वराहावतारो नाम
तृतीयः सर्गः ।

चतुर्थः सर्गः ।

क्रीडावराहवपुषा मधुसूदनेन
व्यापादितस्य दनुजस्य किलानुजन्मा ।
वीरो हिरण्यकशिपुः स हिरण्यगर्भ-
माराद्धुमारभत घोरतपोमहिम्ना ॥ १ ॥

क्रीडेति । अथ नरसिंहावतारं प्रस्तौति क्रीडावराहवपुषेत्यादिना । स वीरो हिरण्यकशिपुः हिरण्यगर्भं घोरतपोमहिम्ना आराद्धुमारभत इत्यन्वयः । सः प्रसिद्धः वीर उत्साहशाली हिरण्यगर्भं ब्रह्माणं घोरेण अत्युग्रेण तपोमहिम्ना तपःसम्पदा साधनेन आराद्धुं अर्चयित्वा प्रसादयितुमारभत प्रारब्धवान् । कीदृशः । क्रीडावराहवपुषा क्रीडया वराहरूपं दधता मधुसूदनेन व्यापादितस्य हिंसितस्य दनुजस्य हिरण्याक्षस्यानुजन्मा सहोदरः । किलेति प्रसिद्धिद्योतकम् । अग्रजघातिनो निग्रहार्थमुग्रतपसा वरग्रहणसमग्रोत्साहशालित्वमस्य वीरशब्देनोपन्यस्तम् ॥ १ ॥

गोकर्णनाम शुचि-मन्दिरमिन्दुमौले-
राकर्णनेऽपि हि तमोपहमङ्गभाजाम् ।
ब्रह्माच्युताद्यखिलदैवतसेवितं तद्
जिह्माशयोऽपि स शिवप्रवणोऽभिपेदे ॥ २ ॥

गोकर्णेति । गोकर्णनाम शुचि इन्दुमौलेः तन्मन्दिरमभिपेदे इत्यन्वयः । स हिरण्यकशिपुः शुचि शुद्धमिन्दुमौलेर्महाबलनाम्नो महादेवस्य मन्दिरं क्षेत्रं प्रपेदे प्राप्तवान् । तदिति प्रसिद्धतममित्यर्थः । कीदृशम् । हिरत्र यदित्यर्थे । यन्मन्दिरम् आकर्णनेऽपि श्रवणमात्रे सत्यपि अङ्गभाजां शरीरिणां तमोपहमज्ञाननिरासकम् । दुरितहरमित्यर्थः । किं पुनः दर्शनादिति भावः । 'अपे क्लेशतमसोः' इति साधुः । ब्रह्माच्युतादिभिर्वेधिविष्णुप्रमुखैरखिलदैवतैः सर्वसुरसमूहैः परितः स्थितैरुपाश्रितम् । सः कीदृशः । जिह्माशयः कुटिलहृदयः सन्नपि शिवे श्रीपरमेश्वरे भगवति प्रवणः प्रह्वः भक्तिविशेषशाली । अथवा शिवे शुभे तपोरूपे वस्तुनि प्रवणो निश्चितमना इत्यर्थः ॥ २ ॥

पञ्चाननप्रतिसमोऽपि शमोपशोभी
पञ्चापि बाह्यकरणानि विजित्य वीरः ।
पञ्चायुधारिभवनोपवनप्रदेशे
पञ्चाग्निमध्यवसतिः स तपश्चकार ॥ ३ ॥

पञ्चेति । सः वीरो हिरण्यकशिपुः पञ्चाननस्य सिंहस्य प्रतिसमः प्रतिनिधिः तुल्य इत्यर्थः । तथा सन्नपि शमेन प्रशान्त्या उपशोभितुं शीलम-स्येति शमोपशोभी । पञ्च बाह्यकरणानि चक्षुरादीनि बाह्येन्द्रियाणि पञ्चापि विजित्य विषयेभ्यः समाहृत्य वशीकुर्वन् पञ्चायुधारेः परमेश्वरस्य भवने क्षेत्रे यदुपवनं बाह्योद्यानं तस्मिन् प्रदेशे पञ्चानामग्नीनां मध्ये वसतिः स्थितिर्यस्य तथा स(न्) तपश्चकार तपः समारब्धवान् ॥ ३ ॥

स्रष्टारमिष्टवरलाभकृताभिलाष-
स्तुष्टाव दृष्टफलसन्ततिना स्तवेन ।
अष्टाङ्गयोगजयघोरवराकभेद-
स्पष्टाङ्गशोषणविशेषसमिद्धतेजाः ॥ ४ ॥

स्रष्टारम् इति । स हिरण्यकशिपुरिष्टस्याभिलषितस्य वरस्य लाभे विषये कृताभिलाषः कृतप्रार्थनः । दृष्टा परीक्ष्य ज्ञाता फलसन्ततिः फलप्राप्तिर्यस्मिंस्ता-दृशेन स्तवेन स्तोत्रेण स्रष्टारं ब्रह्माणं तुष्टाव स्तुतवान् । स कीदृशः । अष्टाङ्गानि यमनियमासनप्राणायामप्रत्याहृतिधारणाध्यानसमाधयः' तेषां जयेनाभ्यासवशाद्व-शीकरणेन घोरेणातिदुश्चरेण वराकभेदेन च । वराको नाम मासोपवाससंव-त्सरोपवासादिव्रतविशेषः । तस्य भेदेन प्रकारविशेषसमाचरणेन च स्पष्टेन प्रकाशेनाङ्गशोषणेन शरीरकर्शनेन विशेषसमिद्धमतिशयेन प्रदीप्तं तेजो यस्य स तथोक्तः ॥ ४ ॥

विष्वग्विसृत्वरजटापटलाधिरूढ-
वीरुत्कदम्बदृढकम्बलितोत्तमाङ्गः ।
वल्मीकमध्यमयमध्यवसद् भुजङ्ग-
निर्मोकपट्टपरिकल्पितयोगपट्टः ॥ ५ ॥

विष्वग् इति । अयं हिरण्यकशिपुर्वल्मीकमध्यमध्यवसत् । वल्मीकेन वलयितोऽभूदित्यर्थः । भुजङ्गानां निर्मोकपट्टेन पट्टाकारेण निर्मोकेन परिकल्पितो विरचितो योगपट्टो (यस्य) । भुजङ्गमुक्ता निर्मोकास्तस्य योगपट्टवदङ्गे प्रणद्धा बभूवुरित्यर्थः । विष्वक् समन्ताद्विसृत्वरं व्यापनशीलं जटापटलं जटाकदम्बकमधिरूढैर्वीरुत्कदम्बैर्लतानिकुरुम्बैर्दृढं कम्बलितं संजातकम्बलम् । आच्छादितमित्यर्थः । उत्तमाङ्गं शिरो यस्य स तथा ॥ ५ ॥

वर्षानिलातपहिमानि समाधिबन्धं
तस्य स्थिरं श्लथयितुं न वि(भुर्व? भूव)भूवुः ।
द्वन्द्वान्यमून्युपरतेन्द्रियजातमेनं
किं वा तुदन्ति परमिन्द्रियतोदकानि ॥ ६ ॥

वर्षेति । वर्षानिलातपहिमानि कर्तॄणि तस्य हिरण्यकशिपोः स्थिरं निश्चलं समाधिबन्धं श्लथयितुं शिथिलीकर्तुं न वि(भुर्व ? भूव)भूवुः प्रभवो न जाताः । अमूनि वर्षातपशीतोष्णानि द्वन्द्वानि उपरतेन्द्रियजातं प्रशान्तेन्द्रियसमूहमेनं हिरण्यकशिपुं किं वा तुदन्ति कथं व्यथयन्ति । तं व्यथयितुं न प्रभवन्तीत्यर्थः । अत्र हेतुमाह — परं केवलम् इन्द्रियतोदकानि इन्द्रियाणामेव व्यथकानि । तोद्यानामभावाद् भित्तेरभावाच्चित्रकर्माणीव निष्फलप्रवृत्तीन्येव जातानीत्यर्थः ॥ ६ ॥

यस्माद्विहङ्गमकुलाय कुलायभूमी-
कृत्यार्पयन्निजजटापटलानि दैत्यः ।
तस्माद्ध्रुवं त्रिभुवनं भवनीचकार
पश्चादसौ बहुफलं खलु दानमाहुः ॥ ७ ॥

यस्मादिति । दैत्यो हिरण्यकशिपुः निजान्यात्मीयानि जटापटलानि जटासमूहान् विहङ्गमकुलाय पक्षिवृन्दाय कुलायभूमीकृत्य नीडरचनास्थानं कृत्वार्पयन् दत्तवान् । भवनदानस्य फलमाह — यस्माद्धेतोरिदं तस्माद्धेतोर्ध्रुवं निश्चितम् । असौ हिरण्यकशिपुः पश्चादुपरि काले त्रिभुवनं भवनीचकार निजभवनमेव कृतवान् । इदं हि भूदानफलमिति भावः । समर्थयते दानं बहुफलमाहुरिति । खल्ववधारणे ॥ ७ ॥

तस्य स्थिरव्रतबलस्य तपोमयाना-
मत्याग्निसूर्यमहसां महसां प्रपञ्चैः।
उच्चैरदीप्यत यदा जगदण्डकुण्डं
तस्मै तदा वरमदित्सदजोऽगतिः सन् ॥ ८ ॥

... .

महसां प्रपञ्चैः प्रबन्धैः कर्तृभिर्यदा यस्मिन् काले जगदण्डकुण्डं ब्रह्माण्डकटाह उच्चैरत्यर्थमदीप्यत प्रज्वलितम्। तदा तस्मिन् काले अजो ब्रह्मा अगतिर्वरप्रदानादन्या गतिर्नास्तीति विदन्नित्यर्थः। तथा सन् तस्मै हिरण्यकशिपवे वरमनुग्रहमदित्सद् दातु(मग ? मै)च्छत् । (परस्मै ? वरमस्मै) प्रदास्यामीति निश्चितवानित्यर्थः॥ ८ ॥

गत्वा हिरण्यकशिपोः स रिपोरपि द्रा-
गाविर्बभूव पुरतः स्फुरदात्मकान्तिः।
वैरं न दर्शयति किञ्चन कैरवस्या-
प्यग्रे प्रकाशमुपयाति हि भानुमाली ॥ ९ ॥

... ... वैरं स्वाभाविकमपि न दर्शयति न प्रकाशयति। स्वपक्षस्य पद्माकरस्येव विपक्षस्य कुमुदाकरस्याप्यग्रे सप्रकाशो भवतीत्यर्थः। हिर्हेतौ। अनेनास्य ब्रह्मणो लोकोत्तरगाम्भीर्यातिशयो व्यज्यते ॥ ९ ॥

वल्मीकरन्ध्रमुखतः सुखमुत्थितोऽसौ
व्याकीर्णघूर्णितजटेन ननाम मूर्ध्ना।
वव्रे वरं च वरदोऽसि यदि प्रसीदन्
यद्यद् वृणोमि वितराशु विरिञ्च तत्तत् ॥ १० ॥

वल्मीकेति। असौ हिरण्यकशिपुः वल्मीकरन्ध्रस्य मुखात् सुखमप्रयासमुत्थितो व्याकीर्णा व्याप्ता घूर्णिताश्चलिता जटा यस्मिंस्तेन मूर्ध्ना ननाम नमस्कृतवान्। ब्रह्माणमिति शेषः। वरं वव्रे प्रार्थितवांश्च। किमिति। हे विरिञ्च! त्वं प्रसीदन् प्रसन्न(वा)न् वरदोऽसि यदि वरं प्रदातुमागतश्चेत्तर्हि यद्यदभिलषितं वस्तु वृणोमि प्रार्थयिष्ये। (वर्तमानसामीप्यात्) वर्तमाननिर्देशः। प्रार्थनीयानां बाहुल्याद् यत्तदोर्द्विरुक्तिः। तत्तद्वस्त्वखिलं आशु वितर प्रयच्छ। आश्वित्यनेन कियच्चिरं त्वदागमनमेव प्रतीक्ष्य वर्तामह इति द्योत्यते ॥ १० ॥

मर्त्यैरमर्त्यनिकरैरुरगैर्मृगैर्वा
नक्तं दिवा च विशिखादिभिरायुधैर्वा ।
पातालभूमिसुरवर्त्मसु वा न वध्यो
येनाहमेष भवितास्मि वरः स देयः ॥ ११ ॥

मर्त्यैरिति । मर्त्यैर्मनुष्यैरमर्त्यनिकरैर्देवसङ्घैरुरगैः सर्पैर्मृगैः सिंहादिसत्त्वैर्वा नक्तं रात्रौ दिवा दिवसे च विशिखादिभिः । आदिशब्देन खङ्गपरशुगदाशूलशक्त्यादयो गृह्यन्ते । एवमादिभिरायुधैः करणैर्वा पाताले भूमौ सुरवर्त्मनि चाधिकरणेषु वा येन वरेणाहं न वध्यो भवितास्मि । अनेन वधस्य करणाधिकरणदेशकालनिरासः कृतः । एषोऽहमित्यात्मनिर्देशः । स तादृशो वरो दातुमर्हः । यत्किञ्चिद्वरं दत्त्वा विसर्जनीयोऽयमिति न मन्तव्यमिति भावः ॥ ११ ॥

सर्वं तथा भवतु वत्स ! यथेच्छसि त्वं
किं वा न दापयति घोरतरं तपस्ते ।
तुष्टो न चेदहमिहापि पुनः क्व तुष्या-
म्येवं निगद्य विधिराशु तिरोबभूव ॥ १२ ॥

सर्वम् इति । हे वत्सेति मिथ्यास्नेहनाटितकेन सम्बुद्धिः । त्वं यथा येन प्रकारेणेच्छसि सर्वं तथा भवतु । तादृक्प्रकारमेवास्तु । घोरतरमत्युग्रं ते तपः किं वा न दापयति किं वस्तु वरदैरस्माभिः प्रयोज्यकर्तृभिः न प्रतिपादयति । सर्वं (यदाभव ? च दापय)तीत्यर्थः । अहमिहाप्येतादृशमहत्तरे तपसि विषयेऽपि न तुष्टश्चेत्तर्हि पुनः क्व तुष्यामि कस्मिन् विषये तुष्टो भविष्यामि । इतः परमन्यत्र तुष्टिस्थानमित्यर्थः । एवं निगद्योक्त्वा विधिर्ब्रह्मा तु तत्क्षणमेव तिरोबभूवान्तर्हितवान् ॥ १२ ॥

सर्वाभिभाविसहजोष्मदुरासदो यः
प्रागेव तादृशवराधिगमात्तु तावत् ।
उच्चण्डतोन्नतिवशादतिदुस्सहोऽसा-
वुच्चैरुदज्ज्वलदुदक्पथगो यथार्कः ॥ १३ ॥

सर्वेति । यो हिरण्यकशिपुः प्रागेव वरलाभात् पूर्वमेव सर्वाभिभाविना सर्वजनानधःकुर्वाणेन सहजेनोष्मणा प्रतापेन दुरासदो दुर्जयः । तावत्तदानीं

तु तादृशस्य सर्वतोऽप्यवध्यरूपस्य वरस्याधिगमाल्लाभाद्धेतोरुच्चण्डताया अति-क्रूरताया उन्नतिवशादुत्कर्षातिशयादतिदुःसहोऽत्यन्तदुर्जयो भवन्नसौ उच्चैरत्य-र्थमुदज्वलदुद्दीप्तभुजपराक्रमोऽभूत् । उदकूपथं गच्छतीत्युदकूपथग उत्तरायण स्थोऽर्को यथा । अत्यन्तदुःसहत्वं साधर्म्यम् । सर्वामिभावीति विशेषणमत्रापि योज्यम् । उच्चण्डतोन्नतिवशादिति च ॥ १३ ॥

रूपान्तरं धृतवता किल पूर्वजो मे
येन छलेन निहतस्तमहं निहन्मि ।
इत्थं प्रतिश्रुतवतात्मसुहृत्समाजे
तेन क्षणेन भुवनत्रितयं विजिग्ये ॥ १४ ॥

रूपेति । रूपान्तरं धृतवता वराहरूपमातिष्ठता येन विष्णुना मे पूर्व-जोऽग्रजः छलेन व्याजेन निहतः किल हिंसित इति प्रसिद्धोऽयमर्थ इत्यर्थः । तं विष्णुमहं निहन्मि निग्रहीष्यामि । इत्थमेवंप्रकारमात्मसुहृदामसुराणां समाजे सभायां प्रतिश्रुतवता प्रतिज्ञां कृतवता तेन हिरण्यकशिपुना क्षणेन क्षिप्रमेव भुवनत्रितयं त्रैलोक्यं विजिग्ये विजितमासीत् ॥ १४ ॥

निष्कासितो निजपदान्निरवग्रहेण
दैत्याधिपेन मघवानमरैः समेतः ।
लीनो निनाय दिवसान् गिरिकन्दरासु
ख्यातिं तदास्य किमविन्दत कौशिकाख्या ॥ १५ ॥

निष्कासित इति । निरवग्रहेण नितरामप्रतिबन्धप्रसरेण, क्रूरेणेत्यर्थः । दैत्याधिपेन हिरण्यकशिपुना निजपदादात्मीयस्थानात् स्वर्गात् निष्कासितो निराकृतो मघवानिन्द्रोऽमरैः समेतः सहितो. गिरिकन्दरासु लीनस्तिरोहितो दिवसान् निनाय । अस्य मघवतः कौशिक इत्याख्या संज्ञा तदा तस्मिन् काले ख्यातिमविन्दत प्रसिद्धिं लेभे । किमित्युत्प्रेक्षा । कौशिक उलूकपक्षी । सोऽपि पर्वतगुहासु लीनो दिवसान् गमयति । तदानीमिन्द्रस्यापि तत्साधर्म्या-त्तत्संज्ञालाभः किं स्यादिति । 'इन्द्रोलूकौ च कौशिकौ' इति निघण्टुः ॥ १५ ॥

क्वासौ स विष्णुरिति धृष्णुरमुं विचिन्वन्
वैकुण्ठलोकमजिहीत दितेस्तनूजः ।
प्राचीनजन्मसमनुस्मरणेन नूनं
तत्राप्यलम्भि स सुलम्भतमप्रचारम् ॥ १६ ॥

कीति । दितेस्तनूजो हिरण्यकशिपुः धृष्णुर्धृष्टः सोऽसौ तथा प्रसिद्धो मत्पूर्वजघाती विष्णुः क कुत्र वर्तेत इति अमुं (विचिन्वन्) विष्णुलोकमजिहीत प्राप्तवान् । तस्य योगिभिरपि दुरासदे वैकुण्ठलोके प्रवेशस्य उपपत्तिमुत्प्रेक्षते प्राचीनेति । सोऽसुरस्तत्रापि वैकुण्ठलोकेऽपि सुलम्भतममतिशयेन सुलम्भं प्रचारं सञ्चारं प्राचीनजन्मनः पूर्वजननस्य समनुस्मरणेन सम्यगनुध्यानेन कर्त्रा अलम्भि लम्भितः प्रापितः । कर्मणि चिण् । 'विभाषा चिण्णमुलोः' इति । नूनमहं तर्कयामीति कवेरुत्प्रेक्षा ॥ १६ ॥

स्वस्यान्तरेव स निलीनवता तदानीं
शून्यं विलोक्य हरिणा फणिराजतल्पम् ।
मत्तो भयात् खलु पलायितवानितोऽसा-
वद्धाय विष्णुरिति निश्चिनुते स्म दैत्यः ॥ १७ ॥

स्वस्येति । स दैत्यो हिरण्यकशिपुरिति एवंप्रकारं निश्चितवान् । किम्प्रकारम् । असौ विष्णुरत्र शयनशीलो हरिः मत्तो मम सकाशाद् भिया त्रासेन हेतुना इतोऽस्माद् भोगिपर्यङ्कात् पलायितवान् । अद्धाय द्रुतं गतवान् । खलु निश्चितमिति । एवंनिश्चये हेतुमाह — फणिराजतल्पं हरिणा शून्यं तद्रहितं विलोक्येति । कीदृशेन । तदानीं तदागमनसमय एव स्वस्यान्तरेव हिरण्यकशिपोर्मनस्येव निलीनवता निगूढं प्रविश्य स्थितवता । सर्वान्तरात्मभूतस्य किं दुष्करमिति भावः ॥ १७ ॥

सङ्ग्रामसीमनि हतोऽथ पलायितो वा
सम्यग् जितो ह्युभयथापि जिगीषुणारिः ।
आत्मानमित्थमसुरो जितचक्रपाणिं
मत्वा ततो निववृते महता मदेन ॥ १८ ॥

सङ्ग्रामेति । अरिः शत्रुः सङ्ग्रामसीमनि युद्धाङ्गणे हतो हिंसितोऽथवा पलायितो भयाद्विद्रुतो वा । उभयथापि प्रकारद्वयेनापि जिगीषुणा जेतुमिच्छुना पुरुषेण सम्यग् जितः साधु परिभूत एव । हि प्रसिद्धोऽयमर्थः । अतोऽत्र पलायितोऽपि हरिरस्माभिर्जित एवेति भावः । असुरो हिरण्यकशिपुरित्थम् उक्तप्रकारेणात्मानं स्वं जितश्चक्रपाणिर्येन तथाभूतं मत्वा ततस्तस्मात् प्रदेशान्महता मदेन विष्णुरपि जितः इति गर्वातिशयेनोपलक्षितो निववृते निवृत्तवान् ॥ १८ ॥

अतः अस्मात् **अवशिष्टमंशं** कार्यांशमित्यर्थः । **अपि वयं विश्वसिमः** । तमुद्दिश्य विश्वासं कुर्म इत्यर्थः ॥ ६ ॥

इतीति । **इति** उक्तप्रकारेण **ते** तव **चटूनि** श्लाघाः **पठतां** कथयतां **नटतां** नृत्यतां **नमतां** नमस्कुर्वतां च **नाकसदां** देवानां **संसत्** सभा । समूह इत्यर्थः । **मुदा** मोदेन । रञ्जयतीति रागः । तन्त्रीकण्ठान्यतरोत्थित-निषादादिस्वरोत्पन्नः श्रोतृचित्तरञ्जकः ध्वनिविशेष इत्यर्थः । मुखोत्पन्नो रागः मुखरागः । शाकपार्थिवादित्वात् समासः । सोऽस्या अस्तीति **मुखरागिणी** । **स्तुतिगिरा** स्तुतिवाक्येन **मुखरा** शब्दायमाना सती **नवानि** नूतनानि **कुसुमानि** पुष्पाणि **मुमुचे** मुक्तवती । पुष्पवृष्टिं चकारेत्यर्थः ॥ ७ ॥

भरतेति । **भवतः** ते **भरतस्य प्रस्वाः** मातुः, कैकेय्या इत्यर्थः, **हृदयस्य मन्थं** मथनं राति ददातीति तथोक्ता । तथा **मन्थरया** आदरेण सम्प्रयुक्तं सम्यक् कृतं **इदं विपिनप्रवासनं** वनदूरस्थितिः **इदं विबुधप्रमोदनं** देवप्रहर्षणं च **भवतः** स्तः ॥ ८ ॥

इतीति । **इति** इत्थं **लक्ष्मणेन जनकात्मजया** अपि **उदितः** उक्तः **मुदितः** तुष्टः **उटजं गतः** त्वं **जय** । ते **नाम जपतः मे जनिमृत्युभयं** जननमरणभयं **जहि** नाशयेत्यर्थः ॥ ९ ॥

(१८)

निहतादिति । भवता **निहतात् निशाचरौघात्** राक्षससमूहात् **गलितः** । त्वया राक्षसौघेषु हन्यमानेषु भयादन्यत्र गत इत्यर्थः । **अकम्पनाभिधानः** अकम्पननामा कश्चित् **भयेन कम्पिता धीः** बुद्धिर्यस्य स तथा सन् **दशकण्ठाय** रावणाय **भवत्प्रभावं** त्वन्माहात्म्यं **निवेदयाम्बभूव** ज्ञापितवान् ॥ १ ॥

वरेति । **वरदानात्** शिववरदानादित्यर्थः । यत् **बलं** तस्मात् यः **अवलेपो** गर्वः तस्य **योगात् परदाराणां** अन्यकलत्रस्य **अपहरः** अपहरणं तदादिपापे **शीलं** यस्य स तथा । **सुरान्** देवान् **दानवान्** दैत्यांश्च **जयतीति** तथा । **दशास्यो** रावणः **तदा** तत्क्षणं **अतिसिन्धुं** सिन्धुं समुद्रं अतिक्रान्तम् । **ज्वरदाहः** ज्वरात् कामज्वराद् यः दाहः सर्वाङ्गीणः तीव्र-

सन्तापः । सीतासौन्दर्यश्रवणादिति भावः । स एवौर्वः बाडवः तं अगाहत प्रापत् ॥ २ ॥

करवायिति । अहं **खरवैरिणो** रामस्य **दारैः** पत्न्या **स्मरवैवश्यं** कामपारवश्यं **अपास्य** निरस्य त्यक्त्वेत्यर्थः । **तस्य** रामस्य **निकारं** तिरस्कारम् । 'धान्योत्क्षेपतिरस्कारौ निकारौ' इति **नानार्थरत्नमाला** । **करवै** तन्वै । **इति** विचार्येत्यर्थः । **क्षुभितं** सञ्चलितं **तं** रावणं **निरोद्धुं** निवारयितुम् । **ताटकायाः** अपत्यं ताटकेयः मारीच इत्यर्थः । **अग्रे** पुरः । रावणस्येत्यर्थः । **तत्र वीर्याणि पपाठ** प्रोवाच ॥ ३ ॥

उपदीकृतेति । **उग्रं** रौद्रं **रुदती** रोदनं कुर्वाणा **शूर्पणखा नभस्तलादवतीर्य** **अग्रजस्य** रावणस्य **अग्रे त्वां स्तुवती उपदीकृतः** उपहारीकृतः **लूनः** छिन्नः **विग्रहः** शरीरं यया **सा** तथोक्ता सती **अपसत्** पपात । 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः ॥ ४ ॥

प्रशमेति । प्रकृष्टः शमः दुःखशम इत्यर्थः, यस्मिन् कर्मणि तत् **प्रशमं** यथा तथा **अभ्युदितां** उक्तां **प्रशान्तः वेगः**, दुःखवेग इत्यर्थः यस्याः सा तथोक्ता । **प्रथमानां** प्रसिद्धिं गच्छन्तीं **पुरः** अग्रे **पतिं** भर्तारं **प्रकाशयतीति** तथा । वाग्भिरित्यर्थः । शूर्पणखामिति शेषः । **पुनश्च वचनैः** वाग्भिः **प्रशमं** **नेष्यन्** नेतुमिच्छन् **मारीचः राक्षसेन्द्रं** रावणं **उवाच** ॥ ५ ॥

अभयमिति । **सुरासुरौघात्** देवदानवसङ्घात् **अभयं** अभीतिं **ददतः** दिशतः । अस्मभ्यमित्यर्थः । **ते पुण्यनाम्ने** सति **नृभयं** नरात् भयं **निरपायि** नाशरहितं इति वरान् ददातीति **वरदः** तेन **विधात्रा** ब्रह्मणा गिरिशेनापि **पुरा विचारणे बभूवे** । 'भू सत्तायाम्' इति धातोर्भावे लिट् । मानुषादन्यैरवध्यत्वं प्रार्थयति त्वयि ब्रह्मणा शिवेनापि एवं विचारितमिति भावः ॥ ६ ॥

तवेति । **अशास्यः** शासितुमशक्यः । त्वयेत्यर्थः । **अहं तव दास्यं** दासभावं **गतोऽस्मि** । त्रयाणां जगतां समाहारः **त्रिजगत्** । तस्मिन् **द्वौ** परिहास्यौ परिहसितुं शक्यौ । तौ कौ इत्यत आह— **एकः मरुदेकहिते** मरुतां मुख्याहितकारिणि 'मरुतौ पवनामरौ' इत्यमरः । **रामे** सरुट् सकोपः

भवान्, अन्यः गरुडे सरुट् पन्नगः सर्पश्च । पन्नगस्य गरुडविषयकरोषात् स्वनाशं विना किमपि न सम्भवति । तद्वद्रामविषयकरोषात् तवापीति भावः ॥ ७ ॥

इतीति । दशकण्ठो रावणः इति विप्रियं अनिष्टं भाषमाणं कथयन्तं तं मारीचं प्रतिनिर्भर्त्स्य निरस्य विधूतः वधार्थं विशेषेण धूतः कम्पितश्चन्द्रहासो येन स तथा । वशयन् अधीनं कुर्वन् स्वं रथं अधिरोप्य दण्डकाख्यं वनं आप प्रापत् ॥ ८ ॥

उपरीति । उपरि रथोपरीत्यर्थः स्थितः स रावणः त्वां वीक्ष्यैव आवधि आमर्यादं सीतालाभावधीत्यर्थः । कार्यमार्गं कर्तव्यरीतिं अस्मै मारीचाय उपदिश्य ताटकेयं सपदि सद्यः व्यसृजत् त्यक्तवान् । सः मारीचः हेममृगः भवन् भूमौ चचार ॥ ९ ॥

नवेति । नवानां रत्नसुवर्णरूप्याणां मणिहेमरजतानां रूपं वर्ण इव रूपं यस्य स तथा सः मृगः रोदसोः द्यावाभूम्योः 'द्यावाभूमी च रोदसी' इत्यमरः । विवरं अन्तरं द्योतयति स प्रकाशयति स । रविः सूर्यः अस्य मृगस्य रुचा शोभया दिनप्रदीपस्य छविरिव छविर्यस्य स तथा सन् आसीत् बभूव । त्वं जय ॥ १० ॥

(१९)

वनेति । प्रणयस्य स्नेहस्य वशंवदा अधीनेत्यर्थः । त्वाद्विषयकस्नेहाधीनेति यावत् । जनकजा सीता वनगह्वरोदरेषु अरण्यदुर्गमप्रदेशान्तरालेषु अन्यमृगैः अनुगतं अनुयातं च उज्झितं च त्यक्तं च अनुगतोज्झितं तृणकबलानां तृणग्रासानां ग्रहं ग्रहणं आदधानं आदधानं कनकमणीमयं मृगं समवेक्ष्य प्रियं भर्तारं भवन्तं इदं उवाच ॥ १ ॥

प्रियेति । हे प्रियतम! त्वयेति शेषः । दृश्यताम् । प्रचुररत्नसुवर्णमयः प्रभूतमणिहेममयः वनहरिणार्भकः अरण्यमृगपोतः कामपि मोहनतां अत्यन्तमोहनत्वं वहति बिभर्ति । चकिता कम्पिता मतिर्यस्य स तथा । चरति अत्ति । 'चर गतिभक्षणयोः' इति धातोर्लट् । धावति पलायते । संविशति शेते । भ्रमति भ्रमणं करोति । मम कृत्रिमपुत्रैः

दारुवस्त्रादिकृतैः क्रीडासाधनैः मृगैः तत्सदृशैरित्यर्थः । अयं उपद्रवं न कुर्यादिति विश्वासादतिमोदेन हस्तप्राप्यतां गच्छद्भिरिति यावत् । मिलति मेलनं करोति । अहो इत्याश्चर्ये ॥ २ ॥

दृढेति । अद्रिजया पार्वत्या स्वयं दृढपरिरम्भणे गाढालिङ्गने यः व्यतिकर व्यतिषङ्गः तस्मिन् । 'व्यतिकरो व्यसनव्यतिषङ्गयोः' इति नानार्थरत्नमाला । विभीषितो वित्रासितः पतिकरपङ्कजात् पत्युः शिवस्य करपङ्कजात् करारविन्दात् । आगतः आयातः किमु । उतेति पक्षान्तरे । उडुगणैः नक्षत्रसमूहैः दृढपरिरम्भणव्यतिकरे विभीषितः विधुमण्डलात् चन्द्रमण्डलात् आगतवान् किमु । निपुणः भवान् इमं मृगं गृह्यकं गृहीतुं शक्यम् । स्वार्थे कः । करोति यदि तदा मया जितम् । 'जि जये' इति धातोः भावे निष्ठा ॥ ३ ॥

इतीति । इति जनकात्मजां इह मृगे कुतूहलिनीं विलोक्य अवरजे लक्ष्मणे अयं पिशिताशनः राक्षसः ननु इति रुन्धति निवारयति सति त्वं धनुर्धरः चापधरः तं मृगमनुसर्तुं अनुगन्तुं उपाक्रमथा आरभथाः । अपरं अन्यत् किमुच्यते । जनयतीति जननी, सर्वकारणमित्यर्थः , नियतिः विधिः, 'स्त्री नियतिर्विधिः' इत्यमरः, बलवती भवतीति शेषः ॥ ४ ॥

इहेति । युवां इह वसतम् । अहमुपेत्य समीपं गत्वा एषः वनमृगः मृगवपुः नराशः राक्षसः न किमिति निश्चिनुवे । इत्युक्त्वेत्यर्थः। भवता रसात् रसं प्राप्येत्यर्थः । ल्यब्लोपे पञ्चमी । अनुगतः अयं मृगः अधावत् पलायते स्म । अथ अनन्तरं निकटं समीपं अयात् प्रापत् । अटवीषु वनेषु अत इतः आत्तभयं यथा तथा आप्लवत चचारेत्यर्थः ॥ ५ ॥

अलसेति । क्षुधा अलसः निरुत्साह इवेत्युपमा । एष मृगः सस्पृहं यथा तथा तृणं अतृणुत खादति स्म । परिचितः परिचयं गतः अन्यः मृगार्भकः मृगपोत इव परिसरं समीपं आव्रजत् प्रापत् । त्वयि प्रसृतं ग्रहणार्थं प्रसारितं कराम्बुजं येन स तथा तस्मिन् सति विह्वलवत्

आतुरवत् पलायति , स्मेति शेषः त्वयि धनुः चापं कर्षति अक्षिपथे नयनमार्गे न अलक्ष्यत न अदृश्यत ॥ ६ ॥

अथेति । अथ धनुःकर्षणानन्तरं भवान् बहुदूरं गच्छतीति बहुदूरगम् । तमिति शेषः । शिततरेण तीक्ष्णतरेण शरेण अभिताडितवान् अभिहतवान् । खलः पापः स मारीचः अयि अनुज, लक्ष्मण शत्रुगणैः हतं अभिहतं मां पाहि इति विलपन् विलापं कुर्वन् स्वस्य आत्मनः तनुं शरीरम् । राक्षसशरीरमित्यर्थः । आर प्राप । 'ऋ गतौ' इति धातोर्लिट् । ममार च मृतवांश्च ॥ ७ ॥

किम्विति । गुरोः ज्येष्ठस्य मुखात् च्युतं गलितं आर्तवचः दीनवाक्यं न निशम्यते किमु न श्रूयते किम् । त्वयेति शेषः । बतेति खेदे । किं कस्मात् इह अस्मिन प्रदेशे आस्यते स्थीयते इत्यर्थः । हे पशो, विवेकशून्येत्यर्थः । आशु शीघ्रम् । तस्य ज्येष्ठस्य अन्तिकं समीपं व्रज इति इत्थं ब्रुवतीं कथयन्तीं विवशाशयां परवशचित्तां विदेहसुतां लक्ष्मणः ईदृक् ईदृशः मे अग्रजः ज्येष्ठः न । भवतीति शेषः । खलु एव इति अवदत उवाच ॥ ८ ॥

भरतेति । अये भवान् भरतस्य गिरा वाचा मम पतिं भर्तारं मारयितुं सतीं मां अपथि दुर्मार्गे पातयितुमपि भजति आश्रयति । आवामिति शेषः । विदितं ज्ञातं इदं पूर्वोक्तम् । तव विचार इत्यर्थः । विफलं निष्फलमेव भवेत् । रामं ऋते विना अपरः पतिः बभूव किम् भविष्यति किम् ॥ ९ ॥

इतीति । इति जनकात्मजायाः सीतायाः वचनैः एव सूचिभिः हते भिन्ने श्रवसी श्रोत्रे पिदधाति पिधानं कुर्वति लक्ष्मणे भवतः पदवीं अनुगते सति चकिता कम्पिता मतिः यस्याः सा तथा । जनकजा स्वयं उटजं पर्णशालां अध्यवसत् । उटजे उवासेत्यर्थ. । 'उपान्वध्याङ्वसः' इति कर्मत्वम् । हे अजित मम सङ्कटानि दुःखानि जहि नाशय ॥ १० ॥

(२०)

विघटय्येति । दशाननो रावणः **स्वकपटैः** निजव्याजैः **वः** युष्मान् **विघटय्य** प्रत्येकं देशान्तरे कृत्वा **वल्कपटेन रक्तता** रक्तवर्णतां अनुरक्ततां **च प्रकटय्य** प्रकाश्य **नियतेः** दैवस्य वेगेन शक्त्या **चोदितः** प्रेरितः । **यतिनः** संन्यासिनः **वेषं बिभर्ति** इति **यतिवेषभृत्** । **अनघां** निर्दोषां **जनकात्मजां** सीतां **अवाप** प्राप ॥ ५ ॥

यतिनमिति । **सा** सीता **कृतिनं** कुशलं **यतिनं** संन्यासिनं **निरीक्ष्य** दृष्ट्वा **द्युत्या निन्दितः** तिरस्कृतः **इन्दुः** चन्द्रो येन तत्तथा तं **आननं** मुखं **नत्या** नमस्कारेण **नम्रं** नमनशीलं **ततान** चकार । **मम सुदिनमिति** मृदु मञ्जु च यथा तथा भाषत इति **मृदुमञ्जुभाषिणीं** सीतामित्यर्थः । **प्रतिनन्द्य** सन्तोष्य **सत्यमिति स** रावणः **निर्णिनाय** निर्णयं चकार । मानुष्या अस्या राक्षससार्वभौमस्य मम दर्शनात् सुदिनं ममेत्येतद्वचनं सत्यमेवेत्यर्थः । 'उपसर्गादसमासेऽपि णोपदेशस्य' इत्यनेन णत्वम् ॥ ५ ॥

करभोर्विति । करभो नाम मणिबन्धादारभ्य कनिष्ठिकापर्यन्तं करबहिर्भागः ।'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' **इत्यमरः** । स इवोरू यस्याः सा तथोक्ता । तस्याः सम्बुद्धिः । इहाकृत्यैव सादृश्यम् । 'ऊरूत्तरपदादौपम्ये' इत्यूङो 'अम्बार्थनद्योर्ह्रस्वः' इति ह्रस्वः । **पांसुः** रजः **दवधूमः** वनाग्निधूमः ताभ्यां **धूमला** धूम्रा । 'धूम्रधूमलौ कृष्णलोहिते' **इत्यमरः** । त्वं **अर्हे** योग्यं **अपि वरभोगं** भर्तृसुखं **अवधूय** त्यक्त्वा **भासि** प्रकाशसे । **व्यथया** दुःखेन **अलम्** । गम्यमानक्रियाया अपि कारकविभक्तौ प्रयोजकत्वेन तृतीया । **एहि** समीपमागच्छेत्यर्थः । अयं संन्यासीति समीपप्राप्तौ शङ्कां मा कृथा इति यावत् ।**आत्मनः तत्त्वं** परमार्थं **कथय** वद इति उक्तप्रकारेण **उदिता** उक्ता । यतिनेति शेषः । **सा** सीता **मुदिता** तुष्टा सती **तं** यतिनं **अब्रवीत्** अवदत् ॥ ३ ॥

अमरेति । **अमरारिवीराणां** दैत्येन्द्राणां **समरे** युद्धे । देवासुरयुद्धे इत्यर्थः । रघोर्गोत्रापत्यं **राघवः** । राम इत्यर्थः । **मम पतिः** भर्ता **अस्ति** ।

वशिनो जितेन्द्रियस्य भूमिशशिनो भूचन्द्रस्य अस्य रामस्य रोहिणी । यथा चन्द्रस्यानुरूपा रोहिणी तथा रामस्यानुरूपा अहमित्यर्थः । महिता पूजिता । 'मह पूजायाम्' इति धातोः कर्मणि निष्ठा । विदेहस्य जनकस्य सुता । योनेर्जायत इति योनिजा सा न भवतीत्ययोनिजा । अयोनिजाप्यहं जनकपुत्रीति जनैर्व्यवह्रियत इत्यर्थः । अस्मि भवामि ॥ ४ ॥

हरेति । हरस्य शिवस्य कार्मुकं धनुः तत् छिनत्तीति हरकार्मुकच्छित उरगस्य सर्पस्य आभेवाभा ययोस्तावुरगाभौ । अत एव सन्तौ समीचीनौ भुजौ बाहू यस्य स तथा । स्मरस्य कामस्य कान्तिरिव कान्तिर्यस्य स तथा स रामः श्वशुरस्य दशरथस्य आज्ञया निजराज्यमुत्सृजन् त्यजन् निजात् पुरात् निरगात् निर्गतवान् । अहं च प्रभा मिहिरं सूर्यमिवेत्युपमा । तं रामं अन्वगां अन्वगमम् ॥ ५ ॥

ममेति । मदसहितः इभः मदेभः तस्य सौभगं सौभाग्यमिव सौभगं यस्य स तथा । मम देवरः भर्तृभ्राता । 'स्यालाः स्युः भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ' इत्यमरः । अस्ति । ममतावशः स्नेहाधीनः । आवयोः स्नेहवानित्यर्थः । सः देवरः स्वमतात् हि स्वाभिप्रायादेव नौ आवां अन्वगात् अनुगतवान् । ततो निर्गमनानन्तरं मुनिजनाश्च नः अस्माकं स्वजनाः बन्धवः अभवन् । ततः तदनन्तरं त्रिशिराः खरः निशाचराः राक्षसाः दूषणादयः तदन्या इत्यर्थः । हताः निहताः । मुनिजनहितार्थं रामेणेत्यर्थः ॥ ६ ॥

नहीति । अहिमांशुवंशजः सूर्यवंशोत्पन्नः स रामः कदाचित् जात्वपि मां न जहाति त्यजति । ईदृशं एतत्तुल्यं तस्य रामस्य कार्यं न, अस्तीति शेषः । त्वादृशानां यतिनां पूजनमिवान्यत् कार्यं तस्य नास्तीत्यर्थः । धृतिमान् धैर्यशाली अनेकयतिनां मानने प्रियः मतिमान् । राम इत्यर्थः । भवन्तं अतिमानयिष्यति । अत्यन्तं मानयिष्यति । रामः शीघ्रमागमिष्यति, त्वया किञ्चिद्विलम्ब्यतामिति भावः ॥ ७ ॥

शिवेति । शिवं करोतीति शिवतातिः तेन । 'शिवशमरिष्टस्य करः' इति तातिल् । तस्य रामस्य ईक्षणे स्पृहयालुना स्पृहान्वितेन । स्पृहाशब्दादालुच् । भवता अत्र पर्णशालायां इह अस्यां वृस्यां आस्यतां उपविश्यताम् ।

स तथा । प्रथितं ओजः पराक्रमो यस्य स तथा । अहं पङ्क्तिग्रीवः रावणः अस्मि । त्वं मर्त्यं हित्वा वीरं मां कमितारं वृणु वरय ॥ २ ॥

पश्येति । धृतेः धैर्यस्य शक्त्या स्तम्भिता निश्चला भीतिः भीः यस्या सा तथोक्ता सती । निर्भर्त्स्य निराकृत्य ॥ ३ ॥

अस्मानिति । कस्मात् कारणात् । वने वृत्तिः वर्तनं येषां ते तथा तान् । धर्मः आलम्बः आश्रयो येषां ते तथा तान् । अस्मान् नो धर्षयितुं प्रेत्य मृत्वा नरकेषु मध्ये प्रत्येकमेकमेकं विवित्सुः वेत्तुमिच्छुः ॥ ४ ॥

राम इति । एषा तद्द्युतिः तस्य सूर्यस्य द्युतिः प्रभेत्यवधार्य बुद्ध्वा दास्ये विषये ॥ ५ ॥

चौर्य इति । आर्यः श्रेष्ठः स न भवतीत्यनार्यः त्वं नार्यां स्त्रियः विषये वीर्यं न्याय्यं न्यायादनपेतम् । 'धर्मपथ्यर्थन्यायादनपेते' इति यत् । वेत्सि जानासि यदि तर्हि ते तव चौर्ये चोरकर्मणि रुच्या तात्पर्येणेत्यर्थः । अनुक्तमपि शौर्यं विदितं ज्ञातं, मयेति शेषः । इत्थं उच्चैः व्याहृता वाक् यया सा तथा तां रुदतीं रोदनं कुर्वतीम् सीतामित्यर्थः । सः रावणः द्वाभ्यां दोर्भ्यां कराभ्यां प्रतिगृह्य गृहीत्वा, तच्छायां गृहीत्वेत्यर्थः । छायाग्राहिणो राक्षसा इति प्रसिद्धिः । द्यां आकाशं विजगाहे प्राप ॥ ६ ॥

मूर्खेति । मूर्खेन मूढेन रावणेनेत्यर्थः । आकृष्टा बलादाहृता मूर्छितं सञ्जातमूर्छं चित्तं यस्याः सा तथा । सा सीता क्षणमात्रात् क्षणमात्रमतीत्येत्यर्थः । संज्ञां लब्ध्वा रामलक्ष्मणेत्यरुदत् । आशरराट् रावणस्तु तां सीतां आकाशस्थं आत्मरथमारोप्य याम्यां यमसम्बन्धिनीं आशां दिशम् । दक्षिणां दिशमित्यर्थः । गन्तुं ऐहत ऐच्छत् ॥ ७ ॥

सीतेति । जितः वायुः येन स तथा । जटायुः एणीं मृगीं हृत्वा यान्तं सिंहमिवेत्युपमा । रुदतीं सीतां हृत्वा यान्तं गच्छन्तं तं रावणं वीक्ष्य उपहूय आहूय तिष्ठेत्युच्चैः द्विः त्रिः । 'द्वित्रिचतुर्भ्यः सुच्' इति सुच् ।

अवादीत् अवोचत् । पृष्ठादमं प्राप्तः । अभिभूय परिभूय । अरौत्सीत् रुरोध ॥ ८ ॥

पापमिति । खल पाप, त्वं पापं कृत्वा मृत्युं प्रार्थयसे किम् ? अरण्ये वने प्रायं अनशनम् ।

'प्रायो वयोमृत्युतुल्यबाहुल्यानशनेषु च ।'

इति नानार्थरत्नमाला । व्रतमित्यर्थः । उपविश्य प्राप्य अपि नाकः स्वर्गः प्राप्यः । त्वयेति शेषः । धर्मे उक्तेऽपि । मयेत्यर्थः । एनां देवीं सीतामित्यर्थः । न उज्झसि न त्यजसि यदि तर्हि ते दर्पः गर्वः कः कीदृशः । त्वं खड्गं असिं धनुः चापं वा उपादत्स्व । युद्धायेत्यर्थः ॥ ९ ॥

हस्तीति । ह्रदतोये अगाधजलाशये ग्राहवरेण नक्रश्रेष्ठेन हस्ती गजः जिग्ये जितः । ग्राहवरस्य जलाशये बलाधिक्यादिति भावः । मे मम विजयाय मत्कर्तृकविजयायेत्यर्थः । विस्तीर्णः अयं व्योमपथः आकाशमार्गः । भवतीति शेषः । व्योमपथे मे बलाधिक्यमस्तीति भावः । विषेण हन्तुं शक्यो विष्यः तस्य सम्बुद्धिः । 'विष्यो विषेण यो वध्यः' इत्यमरः । त्वामिति शेषः । वीक्ष्य दृष्ट्वा आविष्यन् आवेष्टुं गन्तुमिच्छन् अहं सहिष्ये । वक्षसो भेत्र्यौ । तवेत्यर्थः । न वज्रकठोरे मे चञ्चू त्रोटी । 'चञ्चुस्त्रोटिरुभे स्त्रियौ' इत्यमरः । न सहेते ॥ १० ॥

रुध्वेति । रूक्षजवः दुस्सहशक्तिरित्यर्थः । जटायुः रुध्वा निरुध्य युध्वा युद्धं कृत्वा विगतं अपगतं धनुः चापं यस्मात् स तथा तम् । 'शेषाद्विभाषा' इति कप् । विगता अश्वा यस्मात् स तथा तं नश्यत्सूतं नष्टप्रायसारथिमित्यर्थः । क्षितिपृष्ठं अवाप्तं प्राप्तं भ्रश्यद्वीर्यं लुप्ताटोपं नष्टगर्वम् । लूनाः छिन्नाः विरोहन्तः पुनरुत्पन्ना दश बाहवो यस्य स तथा तम् । एकभागे दशबाहूनां छेदने अन्यभागे दशबाहूनां विरोहणमित्यवगन्तव्यम् । तं रावणं अकार्षीत् कर्षितवान् ॥ ११ ॥

क्षोण्यामिति । जटायोः कुठारः परशुरिव त्रोटिः चञ्चुः तया त्रुट्यत् विदीर्यत् चर्म कृत्तिः यस्य स तथा । धूसरितं सञ्जातधूसरं आस्यं यस्य स तथा । दशास्यः रावणः क्षोणीतनुजां सीतां क्षोण्यामेव मुक्त्वा स्वासिं आत्मखड्गं धूत्वा कम्पयित्वा कुटरणार्थी व्याजयुद्धार्थी ।

'कैतवानृतराशिषु
अयोघने शैलशृङ्गे सीराङ्गे कूटम् ।'

इत्यमरः । व्यवतस्थे ॥ १२ ॥

वक्ष इति । वक्षः उरः भिन्दन् विदारयन् युधि युद्धे विक्षतौ छिन्नौ पक्षौ यस्य स तथा । प्रक्षीणायुः नष्टप्रायजीवित इत्यर्थः । स जटायुः क्षोणिं भुवं अविक्षत् विवेश । भूमौ पपातेत्यर्थः । रक्षितं मर्म येन स तथा रुधिराक्तः रक्तसिक्तः कानननुल्मे वनस्तम्बे प्रान्ते प्रान्तभागे विललम्बे विलम्बितवान् ॥ १३ ॥

मृष्ट्वेति । सीता दोर्भ्यां कराभ्यां मृत्युमुखस्थम् आसन्नमरणमित्यर्थः । पत्युः भर्तुः मित्रं सुहृदं गृध्रं जटायुं मृष्ट्वा यावत् यत् किमपि ध्यायति दध्यावित्यर्थः । 'यावत् पुरा निपातयोर्लट्' इति भूते लट् । तावत् पापः प्राभवेन प्रभुत्वेन चण्डः अत्यन्तकोपनः । 'चण्डस्त्वत्यन्तकोपने' इत्यमरः । दशकण्ठः रावण तां सीतां अपहृत्य त्वरमाणः लङ्कां प्रापत् ॥ १४ ॥

उद्यान इति । नीचः रावणः इत्यर्थः । उत्कलिकाप्त्यै उत्कण्ठाप्राप्त्यै । 'उत्कण्ठोत्कलिके समे' इत्यमरः । तां सीतां उद्याने विनिधाय निधाय गोप्तुं रक्षितुं अदूरे समीपे नैर्ऋतनारीः राक्षसस्त्रीः अपि न्यस्य संस्थाप्य अरेः शत्रोः नीतिं नयमिवेत्युपमा । अनुवारं वारे वारे बभ्रे बभार । अहं सेवार्हं सेव्यं त्वां आप्तुं प्राप्तुं उपासे सेवे त्वामित्यर्थः ॥ १५ ॥

(२२)

मारीचेति । मारीचस्य मायास्वरेण वञ्चितं आशयं यस्याः सा तथा मे नारी सीता साहसात् हृता । अथ अथवा मृता नु । इह अस्मिन् वने । माया अस्यास्तीति मायी तेन राक्षसेनेत्यर्थः । अहं मृषा मिथ्या न दूरीकृतः । अस्मीति शेषः । सीताधर्षणार्थमित्यर्थः । इति उक्तप्रकारेण ऊरीकृता अङ्गीकृता आशङ्का यया सा तथा । तथाभूता धीर्यस्य स तथा । तेन त्वया ययै । भावे लिट् ॥ १ ॥

आयान्तमिति । मायया वदान्यं अन्धत्वं तस्मात् जायत इति मायान्ध्यजः । तस्मात् दूरात् भयात् आयान्तं सहोदरं लक्ष्मणं आहूय पथि मार्गे वीक्षितवान् दृष्टवान् । त्वं कायानां शरीराणां अन्तं नाशं कुर्वन्तीति कायान्तकृतः । राक्षसा इत्यर्थः । तेषां साहसशङ्कया । प्रियायाः अजां मायां ददातीति तथा । तं राक्षसमित्यर्थः । आचिक्षिषुः क्षेप्तुं इच्छुः । 'क्षि हिंसायां' इति धातोः सन्नन्तादुप्रत्ययः । सन् अपथा आपिथ प्रापिथ ॥ २ ॥

शून्यामिति । त्वं तु निजां पर्णकुटीं पर्णशालां सुसैकतं सुसिकतामयमिव श्रोणिः जघनं यस्याः सा तथा । तया सीतया शून्यां रहितां शर्वरीं रात्रिं चन्द्रिकया ज्योत्स्नया शून्यामिवेत्युपमा । अपश्यः । अन्यत् नापश्यः । हे मान्य, प्रतिपत् गच्छन् । 'पद्लृ गतौ' इति धातोः प्रतिपूर्वात् क्विप् । क्षयात् निलयात् । 'निलयापचयौ क्षयौ' इत्यमरः । पर्णशालाया इत्यर्थः । परं द्वितीयां सीतां चिरं अगवेषयः मृगयसि स्म ॥ ३ ॥

हैममिति । इह अस्मिन् क्षणे हैमं मृगं सुवर्णमयहरिणं न आहृतवान् । अहमिति शेषः । मृगेक्षणे हरिणेक्षणे! त्वया श्यामं तृणं बलं लूनं छिन्नम् । करस्थश्यामतृणभक्षणार्थं स्वयमेवायं समीपमागमिष्यतीति विचार्येति भावः । इति सामन्त्रणं सानुनयं च यथा तथा वदन् त्वं क्षामं कृशम्, दुःखादित्यर्थः, निजं अनुजं लक्ष्मणं न अन्वबुध्यथाः न पश्चाद्वेत्सि स्म । सीताविरहदुःखात् लक्ष्मणः स्वानुयायीति ज्ञानं न जातमिति भावः ॥ ४ ॥

आदाविति । आधिना सीताविरहजन्येनेत्यर्थः । कृशः त्वं फलैः बीजैः ।

> 'फलमिष्वग्रे सस्ये फलके जातिफले धने ।
> फाले भोगे बीजे ॥'

इति नानार्थरत्नमाला । आदौ ऋषीणां उटजं गोदावर्याः सैकतवेदिकादिकां पुलिनपरिष्कृतभूम्यादिकाम् । स्वार्थे कन् । स्थलीं अकृत्रिमभ-

देशम् । स्फीता वर्धिता दरीश्च उरीकृत्य अभ्युपगम्य । कृशं उदरं यस्याः सा तथा । सुन्दरीमित्यर्थः । सतीं साध्वीं सीतां अमार्गयः अगवेषयः ॥ ५ ॥

सद्य इति । त्वं सद्यः इताम् हयान् अश्वान् वनेशयान् वीक्ष्य उद्योतमानं प्रकाशमानं रथं च वीक्ष्येत्यर्थः । अथ उद्योगतः उत्साहतः विचित्य अन्विष्य मृत्योः मुखस्थं जटायुषं दृष्टवान् असि । स्मेति शेषः ॥ ६ ॥

जल्पैरिति । अदर्पैः अगर्वैः जल्पैः वाक्यैः अमितानि अरूंषि व्रणानि यस्मिंस्तत्तथा तेन । 'व्रणः स्त्रियामीर्मिमरुः इत्यमरः । वपुषा शरीरेण तेन जटायुषा बोधिताः रावणस्य नीतिरीतयः प्रकारमर्यादाः रणाजिरे युद्धभूमौ दर्पोद्धतानां गर्वोद्धतानां दमनं शमनं त्वां स्वरूपं वितेनिरे चक्रुः ॥ ७ ॥

तदिति । एषोऽहं तत् तस्मात् कारणात् गमिष्यामि । ते पिता दशरथः स्वर्भोगसौख्येऽपि स्वर्गानुभवसुखेऽपि सहायमीप्सति यत् त्वं जल्पाकं बहुगर्ह्यवाचम् ।

'स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाग्' ।

इत्यमरः । रावणं रणे युद्धे जहि मारय । अथ मेदिनीं शाधि रक्ष ॥ ८ ॥

इतीति । इति सवेदनं ऊचुषे उक्तवते खद्योतस्य सूर्यस्य सूतस्य अरुणस्येत्यर्थः । अङ्कं चिह्नं जुषति सेवत इति तथा जटायुषे अन्तिमेष्टिं परमपूजां कृत्वा विचरन् त्वं विकृतां विरूपां अयोमुखीं अयः इव मुखं यस्याः सा ताम् । केवलं संज्ञायां 'नखमुखात् संज्ञायाम्' इति ङीपो निषेधः । राक्षसीमित्यर्थः । व्यद्रावयः अधावयः ॥ ९ ॥

यात्वेति । ततः त्वं यात्वा गत्वा आहवे युद्धे योजनबाहुं योजनपरिमितकरं कबन्धं लूत्वा छित्वा शबरीं अवैक्षथाः अपश्यः । सा शबरी हि त्वं नुत्वा स्तुत्वा दिवं स्वर्गं आप प्राप । तादृशीं गतिं ऊर्ध्वलोकप्राप्तिं मे दिश देहि ॥ १० ॥

(१३)

कृत्वेति । **शबर्या वर्यां** श्रेष्ठां त्वत्सपर्यां त्वत्पूजां **कृत्वा इध्मैः** इन्धनैः **इद्धे** वर्धिते **हव्यवड्ढव्यवाहे** सहविर्वह्नौ **कायं** शरीरं **हुत्वा अमायं** अकपटं **स्वर्गतायां** स्वर्गं प्राप्तायां **बद्धः** आमोदो येन स तथा। **तुष्ट** इत्यर्थः । **त्वं ततः** तस्मात् प्रदेशात् **अगाः** अगच्छः ॥ १ ॥

शुम्भदिति । **अम्भोजाक्ष्याः** सीताया इत्यर्थः । **विप्रलम्भात्** वञ्चनात् विरहादित्यर्थः । **सकम्पः** सवेपथुः त्वं **शुम्भत्** भास्वत् **साम्भोजं** सपद्मं **अम्भो** जलं यस्यां सा तथा । तां **पम्पां प्राप्य सम्यक् भृतान्** भृतान् **स्तम्भः** स्तम्भनं **स्वेदः रोमाञ्चः मूर्छा जृम्भा एते आरम्भा येषां** एतदादीन् कामविकारानित्यर्थः । **अन्वभूः** अनुबभूविथ ॥ २ ॥

गुञ्जेति । (कुञ्ज?गुञ्जं) ध्वंसयतीति (कुञ्ज?गुञ्जा)ध्वंसी । **गुञ्जा** मदिरागृहम् । 'गुञ्जा तु मदिरागृहम्' इत्यमरः । **कुञ्जात् निकुञ्जात्** ।

'निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे'

इत्यमरः । **कुञ्जात् मञ्जुः** मनोज्ञः **नादप्रतिश्रुतोः** ध्वनिप्रतिध्वन्योः **पुञ्जः** समूहो यस्मिन् तत्तथा । **कुञ्जं अञ्जसा आप्तः** प्राप्तः । **अञ्चन्त्योः** चलन्त्योः **सीतायाः मञ्जुमञ्जीरकाञ्च्योः** मनोज्ञनूपुररशनयोः **शिञ्जायाः शङ्का अस्यास्तीति** तथा । त्वं **वञ्चुलैः** अशोकैः । 'वकुलो वञ्चुलोऽशोकः' इत्यमरः । **वञ्चितः** । रावणेन स्वमूले स्थापितां सीतां आच्छाद्य अशोकाः त्वां वञ्चितवन्त इति भावः ॥ ३ ॥

किञ्चेति । **किञ्च** अपि च **अस्याः** सीतायाः **अक्ष्णः** नेत्रस्य **अञ्चले** अग्रे **चञ्चले** सति पञ्चानां आशुगानां शराणां समाहारः **पञ्चाशुगी तयैव फणिन्या** सर्पस्त्रिया इति व्यस्तरूपकम् । 'ऋन्नेभ्यो ङीप्' इति ङीप् । **दष्टः** । **सञ्चारी हृदि सञ्चितः** सम्पादितः **आर्तिप्रपञ्चः** पीडासमूहो येन स तथा । त्वं **स्वं चापं लक्ष्मणं च व्यस्मरः** ॥ ४ ॥

अस्मिन्निति । **अस्मिन् काले मत्तानां मातङ्गमल्लानां** गजश्रेष्ठानां **प्रेप्सया** प्रकर्षेण प्राप्तुमिच्छया **अकुण्ठा** अधिका या **उत्कण्ठा**

उत्कलिका ययोः तथाभूतयोः कण्ठीरवयोः सिंहयोः आभेवाभा ययोः तौ तथा । तादृशौ वां उभौ दृष्ट्वा त्रस्तः भीतः भानुसूनुः सुग्रीवः तत्त्वज्ञप्त्यै परमार्थज्ञानाय वायुसूनुं हनूमन्तं प्राहिणोत् प्रेषयामास ॥ ५ ॥

स इति । नेदिष्ठः आन्तिकतमः । अतिशयेन समीपस्थ इत्यर्थः । 'नेदिष्ठमन्तिकतमम्' इत्यमरः । पूतात्मानौ शुद्धमनसौ भूरिभूतानुकम्पौ प्रभूतप्राणिदयौ युवां कौ ब्रूतं कथयतम् । इतीति शेषः । वां युवां बभाषे ॥ ६ ॥

व्यग्रीभूत इति । विग्रहत्राणमात्रे शरीररक्षामात्रे व्यग्रीभूतः आकुलीभूतः । 'व्यग्रो व्यापृत आकुलः' इति नानार्थरत्नमाला । वां युवयोः । तत्त्वस्य जिज्ञासया ज्ञातुमिच्छया । मित्रीकर्तुं च उत्सुकः ॥ ७ ॥

सीम्नामिति । सीम्नां मर्यादानाम् ।

'सीमसीमे इमे क्षेत्रे कूलमर्यादयोरपि ।'

इति नानार्थरत्नमाला । त्राता रक्षितः कीर्तीनामेव दाम्नां मालानां निबन्धा बन्धनकृत् । निपूर्वात् बधिधातोः 'ण्वुल्तृचौ' इति तृचि 'इदितो नुं धातोः' इति नुमि 'एकाच उपदेशेऽनुदात्ताद्' इतीण्निषेधे 'झषस्तथोर्धोऽधः' इति धत्वे निबन्धेति रूपम् । स्थेम्ना स्थैर्यातिशयेन लोहः अयः शौर्य-भूम्ना शौर्यातिशयेन मृगेन्द्रः सिंहः धाम्नां पत्युः सूर्यात् आम्नातविद्यः अधीतवेदवेदाङ्गादिः साम्ना वश्यः वशीकर्तुं शक्यः अहं नाम्ना हनूमान् अस्मि ॥ ८ ॥

वाच इति । भूजा सीता जाया यस्य स तथा भूजाजानिः । 'जायाया निङ्' इति निङ् । तस्य सम्बुद्धिः । अनेन हनुमता व्याहृता उक्ता वाचः सूनृताः प्रियाः । 'सुश्लीलं सूनृतं प्रिये' इत्यमरः । आजानानः आविदन् सानुजः त्वं अनुजानन् अनुज्ञां कुर्वन् । व्याज ऊनः यस्य स तथा । तेन निर्व्याजेनेत्यर्थः । अनुजेन सुग्रीवेण पूजितः सन् तेन सख्यं व्यातनोः अकरोः ॥ ९ ॥

अलातवदिति । युधि युद्धे भवान् अलातवत् अङ्गारवत् । 'अङ्गारोलातमुल्मुकम्' इत्यमरः । अतिज्वलतोरित्यर्थः । भ्रमिः भ्रमणं तस्मिन् परयोः उत्सुकयोः । बालिसुग्रीवयोरित्यर्थः । अभेदतः अविशेषात् छलाशुगं व्याजशरं न मुमुचे न प्रयुक्तवान् । रवेः सूर्यस्य सुतः पुत्रः सुग्रीवः तपोभिः अतुलया प्रथनधुरा युद्धसामर्थ्येन । वालिना इत्यर्थः । अलसः पराजितः सन् द्रुतं पलायत ॥ ६ ॥

हरीश्वर इति । हननपरे हरीश्वरे बालिनि स्वपुरं गते सति हे हरे, त्वया चिरं सान्त्वितः सखा सुग्रीवः स्ववपुषि बद्धं लाञ्छनं चिह्नं येन स तथा । तथाभूतः सन् स्वं अग्रजं बालिनं समाह्वत । युद्धायेत्यर्थः । पुनः स बाली तारया अरोधि रुद्धः ॥ ७ ॥

तृणीकृतेति । त्वया तृणीकृता निस्सारीकृतेत्यर्थः । प्रियजनस्य भार्याया इत्यर्थः । वाक् येन स तथा । वासवस्य इन्द्रस्यापत्यं पुमान् वासविः । 'अत इञ्' इति इञ् । पदा पादेन हतः ताडितः फणी सर्प इव कनीयसः सुग्रीवस्य निधने समुद्यतः सम्यक् उद्युक्तः सन् तत्सविधं सुग्रीवसमीपं अवाप्य प्राप्य जवात् (शक्त्या?) क्षणात् इषुणा शरेण क्षितिं भूमिं अनीयत नीतः ॥ ८ ॥

श्वसन्निति । प्रसृमरा व्याप्ता मर्मवेदना यस्य स तथा । स बाली सुमुखे त्वयि पुरःस्थिते सति सहजाय सुग्रीवाय बहु वदन् सन् निजं सुतं अङ्गदं अनघां निर्मलां काञ्चनीं स्रजं मालां च अदात् दत्तवान् ॥ ९ ॥

पदमिति । त्वं मे पदं स्थानं निजसुहृदे स्वबन्धवे । सुग्रीवायेत्यर्थः । दत्तवान् असि । हे ईश स्वामिन् याचते मे निजपदं वैकुण्ठं प्रदेहि । इतीरिणे इत्थं वादिने बालिने च स्वपदं अदाः । स त्वं मे ज्वरं तापं व्यपहर ॥ १० ॥

(२५)

अथेति । अथ वायुसुतादिभिः हनुमतादिभिः अन्वितः सः कपियुवा सुग्रीवः युवां अनुमानयन् अस्य बालिनः पितृक्रियां विधिवत्

विधाय कृत्वा । मनसो जायत इति मनोजम् । निजमनोजमनोरथं स्वकीयसकलमनोरथमित्यर्थः । यद्वा, मनोजात् कामात् यो मनोरथः तम् । तारोपभोगमित्यर्थः । आप्तवान् ॥ १ ॥

अधिगत इति । अकण्टकं शत्रुरहितं कपिराज्यं अधिगतः प्राप्तः असुसमासु भार्यासु समाहिता संन्यस्ता धीर्यस्य स तथापि सः सुग्रीवः अयि ते विरहज्वरं अशमयन् अविनाशयन् सन् जलमये समयेऽपि वर्षास्वपीत्यर्थः । विव्यथे व्यथां प्राप ॥ २ ॥

पुरीति । अथो भवान् सखायं सुग्रीवं पुरि निवेश्य जलदागमे वर्षाकाले आधिं दुःखं गतः । 'द्वितीया श्रित' इयादिना समासः । मतङ्गस्य मुनेः वनं अधिगतः आवसन् । 'उपान्वध्याङ्वसः' इति कर्मत्वम् । गतं ऋतुयुगं युगं मतवान् । विरहवशात् ऋतुयुगं युगप्रायमभूदित्यर्थः ॥ ३ ॥

अवरजेनेति । नगस्य शैलस्य दरी गुहा अम्बरे आकाशे लसदम्बुधरे स्फुरन्मेघे सति अवरजेन लक्ष्मणेन कृते उटजे अपि स्थितं विले गुहायां सीदति तिष्ठतीति विलसदं भवन्तं अनारतं गदरीतिवशंवदं आमयमार्गाधीनं अकृत अकरोत् ॥ ४ ॥

द्युविजयायेति । द्युविजयाय दिवः स्वर्गस्य विजयाय समार्जिता सम्यक् सम्पादिता तस्याः सीतायाः वपुः शरीरं एव नवसुधा नूतनामृतं यया सा तथा । तस्याः सम्बुद्धिः । वसुधे, सा सीता क्व नु स्थिता । खलवशः खलाधीनः । खलापहृत इत्यर्थः । तावकः त्वत्सम्बन्धी सुकृतशेवधिः सुकृतनिधिः लवशः कणशः अनुविभुज्यते अनुभूयते । त्वयेति शेषः ॥ ५ ॥

बह्विति । तव तनुभुवः पुत्र्याः विकचा विकसिता आश्रिता मल्लिकाः पुष्पविशेषाः येषु ते तथा । कचाः केशाः दिवि आकाशे बहवः बलाकाः पक्षिविशेषाः बलाहकाः मेघाः यस्यां सा तथा । तस्या भावः बहुबलाकबलाहकता । तां गताः प्राप्ताः । 'बलाका विसकण्ठिका' इत्यमरः । 'स्त्रियाः पुंवद्' इति पुंवद्भावः । तनुविभा शरीरशोभा । केतकस्य कैतवात् वनस्थले विभाति ॥ ६ ॥

सरसीति । कमलं कमलरूपमित्यर्थः । तन्मुखं सीतामुखम् । अत्र अस्मिन् सरसि निमज्जितं मग्नम् । अत्र असमासे परिणामालङ्कारः । सीता-मुखस्य कमलात्मना परिणतिं विना वर्षागमे सरसि मज्जनासम्भवात् ।

'परिणामः क्रियार्थश्चेद्विषयी विषयात्मना'

इति तल्लक्षणात् । विधिः दैवं नः अस्मान् अलङ्घत लङ्घितवान् । सीतामुखदर्शनाभावेऽपि तत्सदृशकमलानां इदानीं सरसि मज्जनात् तद्दर्शनेऽपि विधिर्मम नानुकूल इति भावः । व्यतिरेकेण तत् समर्थयति — विधिः कं नालङ्घत । सर्वानप्यलङ्घतेत्यर्थः । अर्थान्तरन्यासालङ्कारः ।

'उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः'

इति तल्लक्षणात् । सितं धवलं हसितं हासः । सीताया इत्यर्थः । भावे निष्ठा । कुटचैः पुष्पविशेषैः हृतं अपहृतम् । तस्मात्तेष्वतिधावल्यं दृश्यत इति भावः ॥ ७ ॥

अलभतेति । एषः करिकरः हस्तिहस्तः अरिकरोपगृहीततः शत्रु-हस्तगृहीतात् ऊरुतः ऊरोः । सीताया इत्यर्थः । परां उत्कृष्टां रुचिं अलभत प्रापत् । वियत् आकाशः तस्य उदरस्य अरात्योः शत्र्वोः अभिमर्शनात् अतिपीडनात् हेतोः । कुचसङ्घर्षादित्यर्थः । धृतः दरो येन तत् तथा । तस्मात् तस्याः सीताया उदरात् कृशतां कार्श्यं आहरत् ॥ ८ ॥

अहृतेति । चन्द्रकः मेचकोऽस्यास्तीति चन्द्रकवान् । 'शिखण्डः समौ चन्द्रकमेचकौ' इत्यमरः । सुदृशः सीतायाः अलसे दलसेकात् छदसेचनात् दरं ईषत् अरुणे । दुःखाश्रुभिरीषदरुणे इत्यर्थः । दृशौ नेत्रे अहृत हृतवान् । यत् यस्मात् मम नयनाशवशात् हे महि , सुनयना तव सुता बहुधा कृता । बतेति खेदे ॥ ९ ॥

इतीति । इति उक्तप्रकारेण अतनु यथा तथा तापिताः चेतनाः प्राणिनो येन स तथा । भवान् अवनिं भूमिमपि वेपितां कम्पितां अतनुत । सोदरं लक्ष्मणं आधिजानां वेदनानां व्रजेन समूहेन हतं ताडितं अतनुतेति

किमुत । किं वक्तव्यमित्यर्थः । युवां सहजां धृतिं धारणम् । संसार-वासनामित्यर्थः । 'धृतिर्धारणधैर्ययोः' इत्यमरः । जहतं अपाकुरुतम् ॥ १० ॥

(२६)

अथेति । तापं कुर्वन् अंशुमान् सूर्यो यस्मिंस्तत्तथा तपदंशुमत् अम्बरं आकाशं यस्यां सा तथा । अम्बु जलं कमलानां कोमलकोरकैः मनोज्ञकलिकाभिः सङ्कुलं सम्मिश्रं वितन्वती शरत् ऋषिप्रवरस्य गौतमस्य आश्रमे कृतपदं कृतवासं भवन्तं उपागमत् ॥ १ ॥

अतीति । त्वं अनेहसि काले अतिगते अतिक्रान्ते सति वार्मुचां मेघानाम् । वार्मुक्सम्बन्धिनीत्यर्थः । सम्बन्धत्वं षष्ठ्यर्थः । नभसि आकाशे अम्भसि जले च अन्वहं प्रत्यहं निर्मले सति च मुदं अगाः प्रापः । ते अक्षिसाधितं सायकवर्षणं येन तत्तथा । तस्मिन् धनुषि स्थितिं व्यधित अकरोत् ॥ २ ॥

अथेति । विदेहसुतायाः सीतायाः स्थितिमार्गणे वासस्थानान्वेषणे त्वरितं यथा तथा मानितं माघवतं ऐन्द्रं च तद्धनुश्च । मघवा इन्द्रः मघवत्स-म्बन्धि माघवतं; त्वरितं यथा तथा मानितं च तन्माघवतं च त्वरितमा-नितमाघवतं धनुः चापं कर्तृ । हृद्भुवा कामेन प्रहितं प्रेरितमपि उपरतं उत्साहरहितमित्यर्थः । परतन्त्रं पराधीनं तव मनः अतत्वरत् त्वरां प्रापयत् । शरत्काले वियति मघवच्चापं दृष्टवतः भवतः काममहिते अपि कालान्तरेण उपरते मनसि सीतान्वेषणत्वरा जातेति भावः ॥ ३ ॥

अनुजेति । ईदृशः सुग्रीवसदृशः सखेत्यर्थः । विमतः शत्रुः न । भवतीति शेषः । यदि तदा भुवि भूमौ मतः सम्मतः । सुग्रीवस्तु कापट्येन बन्धुः । वस्तुतः शत्रुरेवेति भावः ॥ ४ ॥

त्वदिति । इषुधौ तूणीरे । शोभनं यथा तथा कुर्वन्तीति सुकृतः । पुण्यवन्त इत्यर्थः । 'कृञ् करणे' इति धातोः सुपूर्वात् क्विपि 'ह्रस्वस्य पिति' इत्यनेन तुकि सुकृदिति रूपम् । दलिताः विनाशिताः पालिता रक्षिताः पापाः सुकृतो येन स तथा । अत्र च यथाक्रमं योज्यम् । रजसा मलिनीकृतः दूषितः । तत्कार्यविषयासक्त इत्यर्थः ॥ ५ ॥

इतीति । **अभीषयत्** भीतिं प्रापयत् । **विभवेन** वैभवेन **उपचितैः** आर्जितैः **बलैः** उपलक्षितः ॥ ६ ॥

बलिनीति । **बलिनि** महाबले **बाह्यरिपौ बालिनि गते** नष्टे सति **मदमयो** गर्वाधिकः **दमः** बाह्येन्द्रियनिग्रहः **योगः** ध्यानं **तौ भिनत्तीति** तथा । **पुराणां होता** महेश्वर इत्यर्थः । **तस्मादपरः** अन्यः **आन्तरः रिपुः** शत्रुः । काम इत्यर्थः । **मां अतनु** अनल्पं यथा तथा **तान्ता** म्लाना **धीर्बुद्धिर्यस्य स तथा तादृशं व्यतनुत** अकृत ॥ ७ ॥

सहेति । **भवान्** इति उक्तप्रकारेण **निजैः सचिवैः सह सन्नतं** सम्यक् प्रणतं **रवेः सुतं** सुग्रीवं **सरसस्य** मनोहरस्य **सारसस्य** पद्मस्य **सार** इव सारो यस्याः सा तथा । तया तत्सदृशयेत्यर्थः । **दृशा** दृष्ट्या **सविधसीम्नि** समीपप्रदेशे **उपहूय** आहूय । दृग्विक्षेपेण समीपं प्रापयित्वेत्यर्थः । **गदितवान्** उक्तवान् । **भियं** भीतिं **दितवान्** दत्तवान् **च** । बभूवेति शेषः ॥ ८ ॥

दिनकरेति । **कृशं मनो** यस्य स तथा । **अहं ते** तव **गुरोः** बालिनः **शमनात्** नाशनात् । वधादित्यर्थः । **चकितः** कम्पितः **आसि** । अद्य **मया इषुरेव विषाणः** तं जुषति सेवत इति तथा । तद्वत इत्यर्थः । **स्मर** एव **दन्ती** तस्मात् **असूनां** प्राणानां **भरः** भारः । सुखेन भरितुं शक्यः सुभरः तथा न भवतीत्यसुभरः । भवतीति शेषः । अहं निरपराधिनं बालिनं किमर्थं हतवानिति चिन्तयामि । त्वं सीतामन्विष्यानीय दास्यसीति चेदिदानीमपि सीतान्वेषणे यत्नं न करोषि । मम प्राणा अपि स्मरात् भारायमाणा भवन्तीति भावः ॥ ९ ॥

वशगमिति । **अजस्य तनूजः** गोत्रापत्यम् । दशरथपुत्र इत्यर्थः । तस्य सम्बुद्धिः । **अङ्गदनीलहनूमतां वशगं** अधीनं **तनूकृता** अल्पीकृता **दुर्दमा** दुष्टा येन तत्तथा । तव **हिते अवहितेन** । कृतनिश्चयेनेत्यर्थः **मया हृतं बलं परिपश्य** ॥ १० ॥

नेति । **तस्करः** चोरः, रावण इत्यर्थः । **तव दयितां** सीतां **न जरयेत्** न नाशयेदित्यर्थः । **मया इदं अनुमया** अनुमानेन **विदितं** ज्ञातम् । **मे अग्रजः** बाली एव त्वदरिं रावणं **पृतनया** सेनया **तनयादिभिः अपि अमा** पुत्रादिभिरपि सह **जिघत्सति** हन्तुं इच्छति । 'वर्तमानसामीप्ये वर्तमानवद्वा' इति वर्तमानप्रत्ययः ॥ ११ ॥

इतीति । **इति सुहृदा** सुग्रीवेण **समं मिथः** अन्योन्यं **कथितैः** वाक्यैः **विरहामयं** **दमयन्** नाशयन् **मुदं** प्रीतिं **अयन्** गच्छन् **त्वं सर्वदा मां पालय** ॥ १२ ॥

(२७)

अनिश्चयादिति । **अथ** अनन्तरं **हरिराट्** सुग्रीवः **अनिश्चयात्** निश्चयाभावात् **अपहृता** स्वीकृता **हारकस्य** हर्तुः, सीताहर्तुरित्यर्थः, रावणस्येति यावत् । **स्थितिः** येन स तथा तस्य । **तवानुज्ञया पितृदिनतः निवर्तनं विनिर्दिशन्** सन्दिशन् **बलोद्भटान्** बलोद्रिक्तान् **प्लवगभटान्** वानरयोधान् । चतसृणां दिशां समाहारः **चतुर्दिशम्** । 'स नपुंसकम्' इति नपुंसकत्वम् । **अहिनोत्** प्रेरितवान् ॥ १ ॥

पृथगिति । **निजे पदे** स्वचरणे **विहितनतीन्** कृतप्रणामान् **कपीन्** वानरान् **अपाङ्गयन्** कटाक्षान् कुर्वन् त्वं **जिगमिषुं** गन्तुमिच्छुं **मरुत्सुतं** हनूमन्तं **मिथः** विजने **आह्वयन्** **अमुं** हनूमन्तं **श्रवसि** कर्णे **हृदिस्थं** हृदयगतं किमपि **ऊचिथ** अवदः ॥ २ ॥

अभिज्ञयेति । **उद्यमी** उत्साही **स** हनुमान् **हृदि अभिज्ञया** अभिज्ञाजनकयेत्यर्थः । सीताया हृदि ममेयं भर्तुरेवेत्यभिज्ञाजनकयेति यावत् । **शिरसि अभिख्यया** अभिख्याजनकयेत्यर्थः । रामेण हनूमते दत्तायां अत्यादरेण शिरसि कृतायां, हनूमतः शिरसि शोभाजनकयेति यावत् । यद्वा हनूमता सीतायै दत्तायां सीतयाप्यादरणे शिरसिकृतायां सीतायाः शिरसि शोभाजनकयेति यावत् । **दिशि वाचि गुप्तया** दिशि पतनभिया अत्यन्तं रक्षितयेत्यर्थः । **वाचि निगूढया** । स्वामिना रहसि दत्तत्वादित्यर्थः । **मणिमुद्रया** रत्नाङ्गुलीयेन सह **दक्षिणां** अगमत् ॥ ३ ॥

विचिन्वतामिति । दिशि दिशि जवात् जानकीं सीतां विचिन्वतां गवेषयतां उदन्वतां समुद्राणां तटनिकटात् तीरसमीपात् निवर्तिनां प्रतिगच्छतां अवधिदिनस्य व्यतिक्रमं व्यतिक्रमं अतन्वतां अकुर्वतां वनौकसां वानराणां मुखं अमन्दतां अवदत् । तेषामकृतार्थता मुखदर्शनेनैव स्पष्टा बभूवेत्यर्थः ॥ ४ ॥

अवागिति । अवाग्दिशि दक्षिणदिशि अङ्गदः अञ्जनाभवो हनूमान् अग्निजः सुषेणः द्रुहिणसुतो जाम्बवान् एते आद्यो येषां ते । अचकितं यथा तथा गताः । विशसिता हताः दुष्टराक्षसाः यैस्ते तथा जलार्थिनः सन्तः विभूतिमत् पुष्पफलादिसमृद्धिमत् विलं गुहां अविशन् प्रापुः ॥ ५ ॥

स्वयमिति । सतृट्क्षुधां सपिपासाबुभुक्षाणां स्वयं प्रपां पानीयशालाम् । 'प्रपा पानीयशालिका' इत्यमरः । विशतां गच्छतामिवेत्युपमा । तृट्क्षुद्भ्यां सह वर्तत इति सतृट्क्षुधः । स्वं आत्मानं सम्यक् बिभर्तीति स्वसम्भृतः तेषाम् । वानराणामित्यर्थः । मयदयितायाः सखी स्वयंप्रभा अपचितिं पूजां व्यधात् अकृत । उज्झितः त्यक्तः क्लमो यैस्ते तथा विलम्बिताः ते अङ्गदादयः कथमपि कृच्छ्रात् बहिः गताः ॥ ६ ॥

कपीति । अमी अङ्गदादयः कपीश्वरेण प्रगदितस्य प्रोक्तस्य कालस्य लङ्घनात् अतिक्रमात् पुनः तदुपगतौ सुग्रीवस्य समीपप्राप्तौ अनीश्वराः असमर्थाः बभूवुरिति शेषः । वनीक्षितौ वनभुवि अनशनं अभक्षणं प्रायोपवेशनं वरं श्रेष्ठमेव मेनिरे ॥ ७ ॥

अवाङ्मुखेति । अवाङ्मुखाः अधोमुखाः । प्रणिहितेषु भूमौ निक्षिप्तेषु दर्भेषु तृणविशेषेषु शेरत इति प्रणिहितदर्भशायिनः । अवाङ्मुखाश्च ते प्रणिहितदर्भशायिनश्च । अङ्गदादयः इत्यर्थः । असून् प्राणान् जिहासवः हातुमिच्छवः सन्तः । 'ओहाक् त्यागे' इति धातोः सन्नन्तादुप्रत्ययः । भवार्णवस्य संसारसमुद्रस्य प्रशमं नाशं करोतीति तथा ताम् । भवत्कथां त्वच्चरितम् । शिवं मङ्गलं आवहतीति शिवावहं तव नामधेयं च सरसं सरागं यथा तथा अवादिषुः अवोचन् ॥ ८ ॥

अथ चतुर्थोल्लासः ।

अन्तर्वाणिवरीणवन्द्यचरणं प्रज्ञाधनाग्रेसरं
श्रीमद्रङ्गधुरीणरम्यनगरीमाचार्यमभ्यागतम् ।
आलोक्यागममौलिसाररसिकाः केचित्कलावल्लभाः
प्रत्युज्जग्मुरिमे मुदा दिविषदः कान्तं रमाया यथा ॥ १ ॥

तदनु सोऽयं निजनैष्ठिकानुष्ठानबद्धशुद्धान्तःकरणः विशुद्धधरासुरेन्द्राराधितनलिनचरणः अपारकरुणाभरणान्तःकरणः अस्मदाचार्यो निजजनसंरक्षणानुरागशरीरीमिव रङ्गराजः, कूलोल्लसमानतिलककुरवकबकुलसरलचन्दनमन्दारकुन्दसहकारसरसकेसरबदरकदम्बजम्बीरजम्बूदारपादपविमलकुसुमलसन्मकरन्दास्वादनसम्भ्रमसम्पतदभ्रभ्रमरनिकुरुम्बभासमानोभयतीरतया कलिन्दनन्दिनीविलसत्पार्श्वोभयसरस्वतीरीतिमनुकुर्वन्तीं, करुणाभरणनारायणनवरत्नमालिकायमानां, समाश्रिताशोकवनिकावनिकन्यकामिव सुदारुणां, दोषाकुललोककलुषकान्ताराशुशुक्षणिक्षेपणजातां सद्यजातां,समज्जनदुरितहरामपि नमज्जनदुरितहरां कावेरीमवगाह्य महानदीं हिमकिरणपुष्करिणीमपि समाराध्य तमिक्ष्वाकुकुलाध्यक्षं रक्षितरक्षोध्यक्षानुजं निजजनसंरक्षणबद्धदीक्षं पङ्कजाक्षमृश्यमूकाचलमिव सप्तसालसमुल्लासितं सुधर्मसमान्तरमिव हरिणोद्भासितमवलोक्य रङ्गराजनगरं शन्तनुमण्डपपरिमण्डितमाससाद मन्दिरमिन्दिरारमणस्य ॥

विचित्रनानाविधशिल्पभासुरं
सरस्वतीकान्तसमग्रनैपुणम् ।
सवेगवाराशिकृशोदरीकर-
प्रकीर्णसामोदहिमाम्बुशीतलम् ॥ २ ॥

रङ्गेशभुक्तामयवारवाण-
निर्माणवैदुष्यतरङ्गिणीशम् ।
निरन्तरं निर्जरवारकान्ता-
तन्तन्यमानातिविचित्रलास्यम् ॥ ३ ॥

दिने दिने पल्लवतोरणावली-
प्रसादनैकोत्सुकतारकाभिकम् ।
विरिञ्चशुद्धान्तवधूविपञ्चिका-
निनादविश्राणितकर्णकौतुकम् ॥ ४ ॥

राजीवजाजीमुखपुष्पमालिका-
निर्माणसाकाङ्क्षवसन्तसंयुतम् ।
सेवासमायातसुपर्वपुङ्गव-
प्रोद्भासिदन्तीन्द्रमदौघपङ्किलम् ॥ ५ ॥

विनीतपाकाहितपक्ष्मलेक्षणा-
प्रसार्यमाणागरुधूपवासितम् ।
समासदद्रङ्गधुरीणसन्निधिं
सदासवर्गः स ममैष देशिकः ॥ ६ ॥

करुणावरुणालयस्तदा
गुरुणा परिणूतसद्गुणः ।
शरणागतरक्षणक्षमो
ददृशे करुणार्णवेन सः ॥ ७ ॥

वरुणालयजातसुन्दरी-
रमणं नयनारुणाम्बुजम् ।
शरणं प्रणनाम देशिको
जगतां स हि रङ्गनायकम् ॥ ८ ॥

तदनु देशिकोऽयं वाताशनेशशय्याधिशायिनं कल्याणगुणगण-सर्वातिशायिनमगणितनिजमणिगणकिरणविद्रावितनिबिडतरातिमिरफणीन्द्रफणाततिसम्पादितासितातपत्रशोभं अम्भःप्रदसप्रभं भगवन्तं रङ्गनायकमभिष्टूय विविधैः स्तवैः शिष्टवर्गतुष्टिप्रदैरिष्टवर्गसहितः, तत्सेवाव्यपनीतबहुवासरः समधिगत्य सत्तमसमाधिष्ठितं गोष्ठीपुरं निजजनमानसमानसनित्रासनिवासायमानपदसारसं सरीसृपपतिपर्यङ्कशयनं सारसनयनं सम्प्रणम्य सौम्यनारायणं संस्तूय सुतरां समगादगवरमृषभाद्रिम् ॥

तदनु सैष गुरुगुणवारिधि-
स्तमधिरुह्य धराधरमद्भुतम् ।
समवगाह्य च नूपुरपूर्विकां
सुरनदीमकरोन्निजनैष्ठिकम् ॥ ९ ॥

इन्दिरारमणमन्दिरमेष
छायया मदनसुन्दरमूर्तिः ।
सेवितुं स किल सुन्दरराजं
राजमाननिजलोकविनोदम् ॥ १० ॥

तदनु सुन्दरराजविलोकनो-
ल्लसितमानस एष समार्यः ।
समभिवन्द्य स तं भगवन्तं
बहुतरं प्रशशंस च भक्त्या ॥ ११ ॥

समधिगत्य ततः स पुरीं मधुरां मधुराधिपसिसेविषया सेवक-जननिरन्तरप्रमोददायिनं मन्देतुरसौन्दर्यशालिनं निखिलभुवनराजं सुन्दरराजं तं भगवन्तमभिवन्द्य भार्गवीरमणं निटिललोचनदावानल-ज्वालायितचटुललीलावलोकनतूलायमानमदनं कृतनिजजननिखिल-रिपुमदनं निजतनयसितांशुसमुपलालनकौतूहलादिव समागतसुरसरि-त्समुद्भासमानमौलिं शशाङ्कमौलिं बृन्दारकसन्दोहसंवन्द्यमानवन्दारु-बृन्दवाञ्छितप्रदानमन्दारपादपायितपादारविन्दममन्दपरमानन्दं तं सुरे-श्वरं वीक्षणमात्रनिर्वर्तितभुवनत्रयरक्षां शिक्षितसुम्भनिसुम्भप्रभृतिदान-वाध्यक्षान्निजजनपरिरक्षणबद्धदीक्षां समीक्ष्य च मीनाक्षीमाजगाम नवग्रहग्रावसागरम् ॥

तदा तु किल —

तदीयवाचानिचयप्रचारं
समीक्ष्य नूनं त्रपयाम्बुराशिः ।
तिरोहितं वीचिचयं चकार
प्रकाशयन् सज्जनरीतिमेषः ॥ १२ ॥

अथ खलु समवगाह्य तत्र विचित्रतरे पारावारेऽभिवीक्ष्येक्ष्वाकुकुलक्षीरोदधिरङ्कलक्ष्मलक्ष्मणाग्रजविनिर्मितक्षारोदधिसंलक्ष्यमाणसेतुं तद्दर्शनानन्दितमानस एवमाचचक्षे —

वन्दे सेतुं सेवकाशेषदोषान्
निःशेषं तं नाशयन्तं महान्तम् ।
सीतानाथं निर्मितं राघवेण
प्राप्तुं कीर्तिं क्षिक्षितुं राक्षसांश्च ॥ १३ ॥

पुनः सविनोदम्—

रघुवंशभवा धराधिनाथाः
स्वपदाक्रम्य विपक्षभूभृतस्तान् ।
विलसन्ति महानयं स सेतु-
र्बत संराजति सूचयन्निवेति ॥ १४ ॥

पुनः सविमर्शम्—

पदा क्रमितुमक्रमः किमिति सोऽब्धिकन्याप्रियः
निजश्वशुरसागरं समकरोत्ससेतुं तदा ।
निजान्वयजनोत्तमैरिति कृतः समुद्रो ह्ययं
समुद्रयितुमुत्सुकः किमिह सेतुमुद्रां व्यधात् ॥ १५ ॥

अनन्तरमनन्तरविसम्भ्रमो निगमान्तगुरुकुञ्जरः रञ्जितनिखिललोकः सञ्जितसकलवादिजनो भञ्जितकुसुमेषुपृषत्को वञ्चितकामाद्यमित्रषट्कः सञ्चितपञ्चजनपञ्चाननपादारविन्दपरमाद्भुतभक्तिरस्मदार्यवर्यः समाजगाम काण्डासनकोटिम् ॥

तत्र हि —

ननर्त रत्नाकर उद्धृतोर्मि-
प्रबाहुरारादिव वीक्ष्य हृष्टः ।
गुरुं भवाम्यद्य विमुक्तदोषो
गुणाम्बुधेः स्पर्शनतोऽद्य नेति ॥ १६ ॥

कल्लोलकोलाहलकैतवादयं
संराजते पातकिनोऽपि वारिधिः ।
रक्षाम्यहं स्नातृजनान्वदन्निति
श्रीरामगाथाश्च पठन्निहानिशम् ॥ १७ ॥

स खल्वायोधनधरणीतलमिव नृत्यत्कबन्धं कुमुमतीपालयितार मिव वाहिनीशतनेतारमवगाह्य मुहुर्मुहुरम्भोनिधिमकरोत् सप्तदिनसप्ततन्तुम् ॥

प्रस्थाय बाणासनकोटितो गुरु-
र्भक्तेष्टविश्राणनबद्धकङ्कणम् ।
श्रीरामनाथं समगात् सिसेविषु-
स्तन्मन्दिरं तीर्थवरैर्विराजितम् ॥ १८ ॥

समभिषिच्य गुरुर्गुणवारिधिः
सुरनदीसलिलेन सदाशिवम् ।
प्रकटितार्थसुधारसनद्धीर्विका-
धरवराभिधमेनमथाकरोत् ॥ १९ ॥

तदनु देशिकोऽयं प्रस्थाय ततः तीर्थनायकस्थलात् नृपवरपुरमिव सदारामोल्लसमानं गण्डकीसिन्धुवत् सचक्रतीर्थं तारकागणमिव कलानिधिकान्तं प्रकटितस्ववाच्यार्थैः चन्द्रशालार्थैः समुद्भासमानैर्द्विजवरभवनैः परिराजमानमधिगत्य पट्टणं कुशशयनाभिधानं सम्प्रणम्य रघुनाथं निजनाथमस्तावीत् ॥

लोष्टीकृतनिष्टप्ता-
ष्टापद एषोऽस्मदाचार्यः ।
जातस्ताम्रासेवा-
चिरकामी चित्रमेतद्धि ॥ २० ॥

तदन्वधिगत्य ताम्रातटिनीं तटिनीशसङ्गममिव मुक्ताफलाश्रयतानुबन्धत इत्थमकथयत् ॥

करणीकरवाणि मे शिरः
प्रणतौ हि तरङ्गिणीपतेः ।
रमणीरमणीयवारिणां
शरणीकृततीरसाधुनाम् ॥ २१ ॥

इत्थमुदन्वन्तमवादीच —

जडाशयोऽप्येष तरङ्गिणीपतिः
सुतां सुतं च प्रददौ महात्मने ।
सरोजनाभाय मृडाय नो मतिः
प्रशस्यते दैवबलं बुधैस्ततः ॥ २२ ॥

सविनोदम् —

स्रोतस्विनीकमन एष जडाशयोऽपि
रत्नानि शङ्खनिचयानि च मौक्तिकानि ।
आस्ते पिधाय कृपणां निजवृत्तिमेव
सन्दर्शयन् लवणजीवन इत्यहोऽहम् ॥ २३ ॥

पुनः सकुतूहलम् —

गम्भीरोऽप्यम्बुनिधिः
प्रवृद्धसत्त्वो दिने दिने सोऽयम् ।
समभून्मलयौरस्यां
संसक्तात्मा स्थिरं शीलम् ॥ २४ ॥

मलयजासरिदीशसमागमे
तदनु सैष निमज्य मुहुर्मुहुः ।
सुमतिभिः समवाप्तसमेप्सितः
समगमत् स हि तां कुरुकापुरीम् ॥ २५ ॥

तत्र स मुहुर्मुहुरवगाह्य जलजाततीर्थे निगममौलिसारसरसमुल्ला-स्यमानस्वान्तसरोजः अनुगतसज्जनजातः परिपूज्य तं जानकीजानिं जलजातादिभिः सुमजातैः सुजनसन्दर्शनसञ्जातमन्देतरप्रमोदं, कल-

श्रीसुतमिव कृपोपेतं, सुग्रीवमिव साङ्गदं इळावृतखण्डमिव वररत्नकटकोज्ज्वलं, यादवसमुदायमिव गदोद्भासितं, यदुमिव दरवरकरराजमानं, रविमिव रथाङ्गनन्दककरं, गोधनमिव श्रीवत्ससंशोभमानं, प्रावृडभ्रमिव नीलाभ्रभासमानं, वाजिराजमिव श्रीवाराजितदेवमणिं, सायन्तनसमयमिव पीताम्बरं, मानससर इव शिञ्जद्धाटकहंसकं, मत्तमातङ्गमिव पराङ्कुशपरिष्कृतं सम्प्रणम्य तमादिनाथं निजविरचितदिव्यप्रबन्धराद्धान्तबद्धमुद्रान्तःकरणैर्धरणीगीर्वाणगणैः पुनः पुनरनुवर्ण्यमानगाथाशतं तं शठकोपमुनीन्द्रं सम्प्रणम्य च सानन्दमवादीदेवम् —

विश्वातरुतलनिलयं
  कलये चेतसि पराङ्कुशाख्यं तम् ।
यत्सूक्तश्रुतिजलजे
  बुधभृङ्गा अनुदिनं रमन्ते हि ॥ २६ ॥

तदनु देशिकोऽयं चिरन्तनसूक्त्यन्तमकरन्दसमास्वादनमिळिन्दायमानमानसः सानुगः समासेवमानो मलयानिलसोदरीकूलयुगळसमुल्लसमानकमलाकमननिलयात् स्वसमागमसकुतूहलसकलपौरलोककोलाहलैः निषादिविषादितमत्तदन्तावळफीत्कारैः अगृहीतप्रग्रहहयहीङ्कारैः परितः प्रहण्यमानमङ्गलभेरीतूर्यानकपटहपणवघणघणायमानघनततानद्धसमुद्भूतध्वनिभिश्च कोलाहलिते निखिलहरिदन्तराळे सम्पूर्णकुम्भमेव समासेवनीयः सम्पूर्णसर्वार्थोऽस्मद्गुरुरेष इति करसन्धृतदुग्धपूर्णस्वर्णकुम्भैः अभ्यागतोऽयं किमेतत्पत्तनोपान्तमितिदिदृक्षयेव समधिरूढवरीणवरणतोरणैः पट्टणधरणीविबुधगणैरिव सालभञ्जिकापुञ्जैः समुद्भासमानां, प्रासादप्रकरपुञ्जीभवदब्जोपलसालभञ्जिकानिकरायमाणनिर्जराधिराजराजिभिरधिराजमानां, प्रतिक्षणं विस्फुरत्स्फटिकभित्तिगभस्तिधारामालाळीकात् दलितकुवलयदलवलदमननीलमणिसौधदीधितिव्रातैललसितशिलीमुखकलितलेखेश्वरालयविजयजायमानार्जुनयशोराशिनेव समुल्लसन्तीं प्रतिसद्मप्रासादप्रबध्यमाननवरत्नतोरणगणमयूखरेखां लेखेशशरशरासमधिमन्य नानटद्भिरा-

राममयूरकुडुम्बकदम्बकैरभ्युल्लसन्तीं, सुधाधवळमन्दराचलकूटकूटाय-मानचन्द्रशालावलिसमुल्लसितां, करतलकलितपद्मरागगारुत्मतविद्रुमव-ज्रत्रिनीलमयूखकोरकावलिमत्तया करयुगलनिरर्गलनिर्गळन्नलिनोत्प-लविमलहसन्तीजातीपारिजातजाजीत्रुटुखसुमसमुदायसमारूढशिरोगृह-विग्रगृहिणीभिरिव प्रासादाग्रप्रकलितकल्याणसालभञ्जिकाभिरस्युल्ल-सद्भिः भवनवरैः परिशोभमानामुपचारितः पुरतः पुरतः समायात-सज्जनैः सह सम्पूर्णकुम्भं समगत्य पुरीं पयःप्रदराभिधानां तत्र तत्र च परिपृष्टः सादरमुदारः सूरिजनैर्भावुकमतितरामानीतत्रिदशसरित्सलिलः मङ्गलेश्वरकरुणालोकनकलशकलितकौतुकाभिषेकः सम्परिक्रम्य तं मङ्ग-लेशं पचेळिमपूगपुन्नागनागकेसरसारसरसालपल्लववितानसमुद्भासितं द्विजगणपरिपठ्यमानमङ्गलपुराणवाणीरणितमुखरितदिगन्तराळमाससाद सदनं पित्रोः पदसारससेवनलालसः ।

ननाम पितरावयं प्रणतलोकसम्प्रार्थित-
प्रदानविलसन्मतिर्विमितपद्मिनीचन्द्रमाः ।
अनन्तगुणसिन्धुना समभवत्सुराजन्वती
स येन धरणीभवापतिपदाब्जभक्तिक्षितिः ॥ २७ ॥

तदनु देशिकोऽयं सुचिरसमागतस्वसन्दर्शनसमुदितसम्मोद-मेदुरदेहां करुणामकरन्दानन्दमानसारविन्दामभियातं कथमेतावता भवता, वर्तितं च वृत्त्या कयेति पृष्टवतीं शिष्टमतिं तां निजजननीं प्रमोदोदन्वदुदरनिमग्नमानसः समभिदधावेवं गाथास्तास्ताः पुरा निजानुभूताः ॥

प्रादक्षिण्येन क्ष्मां
क्रमशो हि समस्ततीर्थानि ।
गाहं गाहं समगां
स्मारं स्मारं पदाम्बुजं युवयोः ॥ २८ ॥

तदा खलु कदाचित् समधिगतवति सनातनसरस्वतीतन्वतनु-भानुतापतान्ते नितान्तं विन्ध्यानल्पाधरवरकटकोपान्तं पञ्चाननचाप-भञ्जकरामभद्राश्वतिनिर्वर्तनाय सञ्चिन्तयति मयि यदृच्छातः सम-

धिगतः कोऽपि धरणीगीर्वाणः अत्र खलु भगवन्, तापसस्वामिन् जानकीजानिचरणनीरजराजमानगाथामधुपानधौरेयमानसालिमञ्जुळतरानन्तवाचा वाचालद्विजगणपरिपठ्यमानालयलपितमौलिसारसुखरितहरितान्तरे मन्दानिललोलायमानकमलालयकेलिलोलमराळावलयदृष्टचरप्रसूनसुमोत्पत्त्यभिव्यञ्जकसरोजिनीराजमाने पौराणिकवाणीगणगुणनकुशलशारिकाशुकपोतककमनीयकूजितश्रुतिशमितश्रान्त्यरात्यध्वनीनजनजातरञ्जितकान्तोपान्तकान्तारे कल्पानोकहविशङ्कटप्रकाण्डविटपायमानविटपाग्रकूटकूटनिकटप्रकल्पिततपोधनोटजाकल्पे अल्पेतरपल्लवपम्फुल्लमानप्रसवतुलसिकावनराजिराजमानोपवने दक्षिणतोऽत्रितपोधनराजोटजात् तप्तकाण्डजानकीकुण्डमण्डिते नृपनिकेतने इव नानावितानसमुद्भासिते विन्ध्यभूधरकटककानने निवसतु भवान् निर्वर्तयितुमाराधनं माधवस्येति समभ्यभाणीत् ॥

इदं श्रुत्वा गत्वा जननि तदहं काननवरं
रमानाथं नाथं निखिलजगतां तं रघुपतिम् ।
यजन् मोदात्किञ्चिद्दिवसगणमत्र व्यपनयन्
समागान्मातस्ते चरणयुगसन्तानकृपया ॥ २९ ॥

अभिधाय चेत्थमभितुष्टमानसोऽस्मद्गुरुवर्यः यदुरघुवर्योदारलीलामनुदिनमाश्रावयमाणो जननीं जनकं च जाजीराजीवपारिजातजातीचम्पककुमुदकुन्दमन्दारवकुलतुलसीमालतीसुमनःसमाजैः परिपूजयंश्च सोपचारं जानकीजानिं क्षितिभृद्ध्यक्षेक्ष्वाकुसन्तानसागरसारङ्गलक्ष्मलक्ष्मणाग्रजन्मानं तत्समर्पितभैक्षमात्रनिर्वर्तितवर्ष्मरक्षणः उवास तत्र कतिचिच्छरदः पित्रोः परितोषाय ॥

तदानीं त्वनुदिनमविच्छिन्ननिजजननीपदपङ्कजपरिपूजनः पौरुषेयेतरभाषितशीर्षामृतसमास्वादनलसमानमानसः देशिकोऽस्माकं निर्वर्त्य शुश्रूषामशेषां निजतातजनन्योः नाभाग इव परित्यक्तभागः दूरीकृतविषयोपभोगः ऊरीकृतशरीरमात्रपरिग्रहः महीमिमां विचचार निर्विचारमेवम् ॥

पयःप्रणालीपुरतोऽनुगाग्र्यैः
सहाभिमुख्येन स ताम्रपर्णीम् ।
पुरं ययौ वेणुवनाधिराजो
वगाहमानः किल तत्र तत्र ॥ ३० ॥

तत्र खलु —

स्वदासलोकाय मुदःप्रदं सदा
फणीन्द्रपर्यङ्कवराधिशायिनम् ।
सरोजनाभं जगतामधीश्वरं
ननाम तं चापि सदाशिवं गुरुः ॥ ३१ ॥

तदनु देशिकोऽयं प्रस्थाय ततः शालिवाटिकास्थकादिनिलाश्च- नपालकाचलकूटकलितवासं संसेव्य श्रीनिवासं स्वजनवचनश्रवणस- न्धृतकङ्कणतामधुनापि परिसूचयितुमिव सज्जनानां किञ्चिदुत्तम्भित- कायं भगवन्तं भवानीवल्लभमभिवन्द्य सुरेशं तं पुटार्जुनेशमभिष्टूय चाभिष्टवैरिष्टैर्गजराजसंसेवितराजीवराजमानपादपङ्केरुहं हंसासनसमा- राधितनिजदेहं हंसवरशरणीकृतनिजचरणारुणाम्भोजं निजसौन्दर्यस- मानन्दितधराबृन्दारकबृन्दं दन्तविजितकुन्दकुड्मलान्तं तं भगवन्तं मत्तमातङ्गवरदमभिवन्द्य समस्तावीदेवं समोदमुदारगिरा ॥

अथ खल्वयमार्यवर्यो वर्यैः सह निजानुयायिभिः समागत्य सरसीरुहवासिनीवराहस्थलं निजामित्रद्विजराजविजिगीषयेव संरुद्ध- तदीयाध्वभिः, नक्षत्रैरिव सुधांशुकान्तैः, यात्रोद्यतमेदिनीनायकैरिव सोद्यानैः, कल्पकवृक्षैरिव विविधाक्षयकोशभासितैः, विशालैरपि बहु- शालैः, विधिविधुशर्वैरिव विश्वकर्मकैः, भामिनीजनैरिव सुरताभि- लाषिभिः, दोषज्ञैरपि गुणज्ञैः, शरणीकृतशर्वाणीपतिचरणैः, करुणा- र्णवार्णोजनिशरणारमणचरणारुणपुष्करषट्चरणान्तःकरणैः, धरणीगी- र्वाणगणै रमणीयैः शरणवरीणैरधिरोचमाने नगरवरे विराजमानं वाजिमेधवाजपेयराजसूययागराजराजमाननैजाङ्गं शाणकोणकषणविम- लमणिगणसमुद्भासमानमौलिं भगवन्तं तं कमलालीलालोलमनादि- कोलं अभिवन्द्य सानन्दमभिष्टूयामन्दमिष्टजनतुष्टिप्रदमथ भारतसम-

राङ्गणमिव कुम्भसम्भवसमुद्भासितं, सज्जनसमाजमिव मुक्ताफला-शयोल्लासमानं, नन्दनवनमिव नन्दनीयदेवदारुबृन्दं, चन्दनमन्दार-कुन्दसहकाररसालसालतिलकतालतमालप्रमुखसालावलिसमुद्भासितम-धिगत्य तं मलयाचलकूटमवगाह्य तीर्थवरं बाणतीर्थं तीर्थपादपादा-म्भोरुहमध्यायमानगाथासुधाः समाश्रावयमाणः सानुयायिसज्जन-जातं जातामोदः समाजगाम तत्र व्यतीतरात्रित्रितयः त्रिकूटधरणी-धरेन्द्रं पापविनाशसरण्या ॥

तदनन्तरं पुनःपुनरवगाह्य चित्रानदीनिर्झरपूरं विरचितनैयमिकः अगाभरणमपि नागाभरणं, सदृष्टिमपि विषमदृष्टिं रक्तकण्ठमपि नील-कण्ठं गजाननराजीवमित्रमपि अगजाननराजीवमित्रं, निवारितकाममपि अनिवारितकामं भगवन्तं तमेनं पार्वतीरमणं सम्प्रणम्य प्रस्थाय ततः त्रिकूटशिखरिणः समधिगत्य पुरवरमभिनवधन्वपुरं समासेव्य गोदा-मन्वर्थयन्तीमभिधां निजामध्युवास च दिवसत्रितयं तत्र ॥

तदा तु कदाचित् क्षणदायाम्—

स्वापे स च सह शिष्यैः
कृतया तनुजापदे मुनिः सरिता ।
समगाद्देशिकनिकटं
गुरुराडथ तं जगावेवम् ॥ ३२ ॥

कस्माद्भवानिहागात्
सहानया भासमानया सरितेव ।
इति पृष्टो गुरुवर्यैः
स मुनिः सा चैवमाचचक्षाते तम् ॥ ३३ ॥

न हि गम्यमितो भवता
भवतापनिवारणाय सताम् ।
तत्रैव साधितं त-
द्रसतां तु पुरैव यात्रया भवतः ॥ ३४ ॥

कलशीभूरहमार्या
 ताम्रा सेयं सुपर्वसिन्धुवरा ।
तुष्टैव स तु तटेऽस्याः
 सङ्गमभागे पुरे रमामूर्तेः ॥ ३५ ॥

सीतारामगुरुर्मे
 सादरगदितां तयोस्तदा वाचम् ।
शिरसा स तां गृहीत्वा
 तथेति कुर्यां जगावेषः ॥ ३६ ॥

तदा त्रियामा शान्ताभू-
 न्मित्रद्विडिति पश्यताम् ।
सूचयन्ती नष्टतारं
 परिक्षीणसितांशुकम् ॥ ३७ ॥

तदनु देशिकोऽयं स्वप्नजातमर्थजातं सम्भावयमानः पुनःपुनः स्मारं स्मारमनुज्ञातस्ताम्रातटिनीकुम्भजातयोः अनिलोल्लसितत्रिदशालय-पद्मिनीपद्मायमानाभिः निखिलपुरवरविजयध्वजकाण्डायमानेषु केतु-दण्डेषु चकासन्तीभिरिव च कीर्त्यावलीभिर्दुकूलपताकाभिरुद्भासमानं झषभूषणसंसेवनसमागतवृन्दारकवृन्दायमानशातकुम्भसालभञ्जिकापरि-मण्डितचन्द्रशालामण्डलैः श्वेतद्वीपैरिव सुधाबिन्दुसन्दोहधवलैरब्धि-मेखलालेखाग्रेसरभवनवरैरभ्युल्लसन्तं कामिनीकुचकुम्भविजिगीषयेव प्राकारमधिरुह्य भासमानैश्चामीकरकुम्भैः समुल्लास्यमानमनवरतदह्यमान काळागरुधूमपटलधाराधरमालावलोकनादिव सदा नृत्यन्नीलकण्ठं निज-भवनमिवादभ्रविभ्रमाणां, सङ्केतनिकेतनामिव सौन्दर्यसुन्दर्याः, तदिन्दि-राबेरानगरं समासाद्य सह दासवर्गैः सुरनगरीमिव सश्यामां विचित्रा-मपि सचित्रां सज्जनावलिमिव बहुधान्यकार्यसम्पादिकां, दुर्जनतति-मिव सतामरसां, क्षितिपतितनयामिव नन्दिताळिगणां, सुयोधनायो-धनधरामिव कमलव्यूहप्रोल्लसन्तीं, मेरुगिरिमेखलामिव सुजातरूपां, अप्सरःसंहतिमिव समञ्जुघोषां, झषकुण्डलमण्डनस्याखण्डलनीलोपल-

मणिमालायमानां निखिलतटिनीविरचितमानामपहसन्तीमिव पङ्केरुह-वासिनीसहचरचरणारविन्दगलितां जह्नुमुनिबालिकां फेनजालव्याजादलसामिव दुर्जनसङ्गभिया अस्मदार्यनिवासनह्यर्थीकृतऋषिकुल्याभिधानां निदानं निखिलभुवनसम्पदां ताम्रपर्णीं तामवगाह्य मुहुर्मुहुः सहोत्साहमनुष्ठितनिजनैष्ठिकः अभ्रङ्कषसालावलिसमुल्लासमानं, पाञ्चालदेशमिव पार्षदप्रवरराजमानं, केळिकाननमिव नाळिकेरबकुलकुरवककपित्थचम्पकसहकारबदरपारिजातपाटलतालतमालप्रमुखसालजालसमुल्लसितमिन्दिरारमणस्य मन्दिरं तदधिगत्य सानन्दमानन्दारविन्दनिराकृततारकान्तं कान्तं कमलावेरायाः, रायमाश्रितजनसन्दोहानां, दोहनमानन्दसम्पदां, पदपल्लवविजितारविन्दमरविन्दबन्धुनयनं नयनं सज्जनावलीनामवलोकनानन्दितनिजलोकं, सुरनायकसङ्गीतमण्डपमिव रम्भापरिभासमानोरुप्रदेशं, कनकाचलमिव चामीकरमेखलं, सन्ध्यासमयमिव पीताम्बरं, सरस्तल्लजमिव पद्मोल्लासितं, कामधेनुव्रातमिव श्रीवत्सराजितं, किरीटमालिनमिव निजगुरुजातविचित्रमणिहारिणं, नभःकालिकनभस्तलमिव सदा हिमकरकुण्डलमण्डितं, पयसां निधिमिव प्रवाळप्रोल्लसितकमलं श्रीवेरारमणमाश्रितजनशरणं करुणातरङ्गिणीरमणं सम्प्रणम्य पुनः पुनः झषभूषणं भगवन्तं समाराध्य तुलसीकुसुमादिभिरुपहारैः, विलोक्य चातकव्रातो जलधरव्रातमिव समानन्दितविमलस्वान्तः समस्तावीत् ॥

तदानीं खलु शरणीकृततरङ्गिणीपतितनयारमणारुणार्णोजानिचरणैः सज्जनवरणीयगुणैस्तरणीजनितकृशानुत्रितयतर्पणप्रवीणैः जानकीरमणादिभिरिव दशरथसमाराधनधुरन्धरैः, सुवैणिकवन्नारायणचरणारविन्दमकरन्दायमानगाथासमास्वादनानिपुणैः, वैवस्वतमनुवत् श्रद्धोपेतैः, विप्रवरैरपि सप्रवरैः वैष्णवाग्रेसरैः सम्प्रार्थितः सुतरां वस्त्वा चिरमत्रास्माननुग्रहीता भवतात् भवतापतप्तानिति देशिकोऽस्माकं तपोधनानामिव तुलसीकुसुमसंराजमानं धनाधिपधामेव मकरकुण्डलसन्निधिभासमानं; नळकूबरचित्तमिव रम्भाविलाससमुल्लसितं कञ्चन निलयं समासाद्य सादरमाराधितः सज्जनैः समाश्रावयमाणो नारायण-

चरणारविन्दमकरन्दायमानगाथाः सुधाविधीरिणीरनुदिनमाराधयंश्च निजान्वयनाथं रघुनाथं निवसति सुखमद्यापि ॥

अवेत्य मित्रागमनं द्विजेरितात्
तदागमज्जागरणं द्विजेश्वरः ।
गुरुर्ममायं करुणातरङ्गिणी-
तरङ्गसङ्घर्षितमानसो महान् ॥ ३८ ॥

प्रक्षाळ्य पादावथ देशिकः कुशं
आचम्य चैकं परमास्तरं शुचि ।
कृत्वा तुलस्यम्बुरुहाक्षमालको
ध्यानस्य रामं विषयं ह्यचीकरत् ॥ ३९ ॥

आध्याननिर्धूतमलोऽमलो जपन्
लक्ष्मीपतेरेष ऋचोऽघमर्षणीः ।
सस्नौ स कल्याणगुणार्णसां निधि-
स्ताम्रानदीवारिणि पापहारिणि ॥ ४० ॥

धृत्वाजिनं हारिणमेष देशिकः
पुण्ड्राणि स श्वेतमृदा तदाकरोत् ।
तानि प्रवृद्धप्रतिभाप्रवल्लरी-
प्रफुल्लमानप्रसवा विरेजिरे ॥ ४१ ॥

ततः समाधाय मनः स सन्ध्या-
मुपास्य सम्यक् त्रिपदीं जजाप ।
सहस्रसङ्ख्यं च षडक्षरीं तां
निधाय रामं हृदि सद्गुणेन्दुम् ॥ ४२ ॥

सम्पादयामास चिरान्ममार्यो
राजीवजाजीतुलसीः सजातीः ।
समालतीचम्पकपारिजात-
मन्दारकुन्दोत्पलपुष्पपूगाः ॥ ४३ ॥

अथागमन्मद्गुरुरेष सद्गुणो
निजोटजं शिष्यगणैः समन्वितः ।
यथात्रिजाबालिवसिष्ठकाश्यपाः
पुरातनास्तापससूरिसेविताः ॥ ४४ ॥

संविष्टरीकृत्य कुशं स देशिकः
कर्मीचकार प्रणतौ रघूद्वहम् ।
रामं सरामं समियाज जातमु-
द्राजोपचारैरुचितैरनन्तरम् ॥ ४५ ॥

गुरुरागरवैः पवित्रपात्रैः
रघुवल्लभमारराध रामम् ।
सहराममतीन्द्रियं मुनीना-
मपि तन्निजनेत्रमार्गपात्रम् ॥ ४६ ॥

दिननायककान्तिकाण्डपीता-
त्तदशर्म निशावशा कृशाङ्गी ।
शुशुभे लपनाम्बुजेऽस्य वक्तुं
तिलकं कमनीयमागतेव ॥ ४७ ॥

अधिशिरस्तदमार्यसमर्पितं
मकुटमद्भुतरत्नपरिष्कृतम् ।
सुरवरेशशिलामयभूभृतः
कनककूटमिवास्य विराजते ॥ ४८ ॥

स दाशरथये तस्मै खर्जूरबदरीफलम् ।
सादरं देशिकोऽस्माकं सदाराय न्यवेदयत् ॥ ४९ ॥

अथ खलु सोऽयमार्यवर्यः समाराध्य चामराराध्यं भगवन्तं रामभद्रमध्यासीनो हरिणाजिनभास्तरणं समगायत निगमान्तसारं रुचिरं सुचिरम् ॥

झषभूषनियोगतोऽस्मदार्यः
 शुकनिर्मितभाष्यरत्नमेषः ।
अनवोक्तिशिरोविचारसूत्र-
 ग्रथितं धृतवानथ स्वकण्ठे ॥ ५० ॥

तदनु निर्वर्त्य माध्यन्दिनमनुष्ठेयनिचयम् —

पूजयामास सीतेशं स पुनर्विधिवन्मुदा ।
यदृच्छोपनतद्रव्यसम्पादितहविर्वरैः ॥ ५१ ॥

ततो निवेदितैरार्य इन्द्रियानुन्मदप्रदैः ।
बुभुजेऽयं भक्तजनान् भोजयन् सत्त्ववर्धकः ॥ ५२ ॥

त्रय्यन्तसारं स पुराणरत्नं
 प्राचेतसं काव्यवरं च विप्रान् ।
संश्रावयन् सज्जनसूरिसेव्यः
 संराजते जातमहाप्रहर्षान् ॥ ५३ ॥

धिषणाधिषणान् गुरूत्तमः
 करुणाकलशार्णसां निधिः ।
निजशिष्यगणानयूयुजत्
 सकलासु कलासु सम्मतान् ॥ ५४ ॥

सायन्तनोचितं कर्म निर्माय तदनन्तरम् ।
सिषेवे स्वजनाम्भोजपूषणं झषभूषणम् ॥ ५५ ॥

मर्मवित्सोऽनपायोक्तेरागत्य निजमन्दिरम् ।
निर्ममे शर्मदं कर्म श्रीकान्ताराधनं ततः ॥ ५६ ॥

डोलालीलाविलसितमतिं प्रांशुमाल्यन्वयाब्धेः
 शीतांशुं तं सह कमलया नीतयामं स रामम् ।
घोषं वाचां रचयतितरां दिव्यसूक्तिर्यदीया
 नूत्नानां वै समकृत तदा देशिकोऽस्माकमेषः ॥ ५७ ॥

अश्नाति निगमान्तरसं
व्यावृण्वानो गुणार्णसां राशिः ।
उदधिसुताकमितारं
तारं तारेशवंशवंशस्य ॥ ५८ ॥

रचितद्विजवरपूज-
स्तदनु धरानिर्जरनिषेव्यः ।
भगवच्चरणौ ध्यायन्
शेतेऽभिनयन् स वै निद्राम् ॥ ५९ ॥

अनुदिनमेवं कुर्वन्
गुरुवर्यो राजतेऽस्माकम् ।
लोकेभ्यः सकलेभ्यः
सकलाः स कला दिशन् शमावासः ॥ ६० ॥

तदानीं खलु कतिपयसंवत्सरेषु समतिक्रान्तेषु कलिप्रभावे प्रभवति तत्र तत्र वनवासो नलिनानां, कविमत्त्वं नवग्रहाणां, अनिरुद्धता रतिरमणौरसस्य, नन्दनसम्पत् त्रिदशेन्द्रस्य, गम्भीरता त्वम्भसां निधीनां, शुचिता सप्तार्चिषि, वृषसङ्ग्रहः कृषीवलेषु, बहुव्रीहिः पाणिनीये, सुरताभिलाषो युवतीनां, सन्मार्गगामिता वासराधिपस्य, मुक्तामयता हाराणां, विमलाम्बरता शरद्दिनानां, सत्सुरागवत्त्वं वासवोद्याने, सत्सङ्गमो यामिनीशे, विबुधावासः सुरवरराजधान्यां, सिद्धार्थता सर्षपेषु, निर्जरसेवनं कामिनीषु, सत्यानुरागो देवकीतनये न जनेष्विति परमेवं प्रभूतम् ॥

किञ्च विरहिजननिकरनिकृन्तनसङ्गतशोणितार्णोजनिसमीकृतनेत्राणां विरहिमहीपधूमकेतुशङ्कावहकबरीपरिराजितानां बहिः प्रवृद्धपल्लवानुरागलतिकायमानरक्ताम्बररोचमानानामवलोक्य गणं गणिकानां सकुतूहलमालपतां लोकानां पल्लविकानां रतिकार्मुकसायकप्रकरपरवशतासमीरितान्यभवंश्चैवं वचनानि ॥

चपला च पलायतेऽबलाकायभासेयम् ॥

अहो वसतीवासतीव्रते वर्तसे सरसा ॥

रुचिरं चिरं लग्नं न बिलोकितमपि यास्या मया मनसाद्य ॥

चपलाभा चपलाभासुरासुराद्यद्य भाति मे मत्तेवेयम् ॥

मत्ते मत्ते विरोधः को मयि यासि ॥

किमियं सुमनाः सुमना विभाति मीनकेतनलक्ष्यतामधिगतेव चिरम् ॥

सुरतया सुरतया सनययानया क्रीडयामो यामो वयमेवमस्या वसतिम् ॥

सुतनु सुतनुराज्ञावशगोऽनङ्गोऽस्या यस्या यदीयोऽयं सदये दयां भवभूतिमती सुमतिर्मयि सततम् ॥

नाळीकेळिधरे नाळीकेळिधरेऽधरे समास्वादाय विलसन्मकरन्दैरेनं माम् ॥

सरया सरया याता वनिता कमलयामलया सहैषा सहेर्ष्येवास्मासु ॥

चामीकरकलशां चामीकरकलशां बिलोकयथ साकूतमेतां पल्लविकाः ॥

मेखलायुतया मेखलायुतया बलयाबलया वसाम सहसामलहारया ॥

ललनालति लतिकाकाया यामिनीशं लपनप्रभयेयम् ॥

सा रमणी सारमणीयः संविमथ्नाति याति या मानसमपीयम् ॥

स्मरामि स्मरामितौजसः पादाम्बुजं तेऽतोऽरेः प्रहारं प्रहारं नयन् न यासि शं शरैरेनं माम् ॥

कलवल्लकी कलवल्लकीमियं रटयन्ती यन्तीव चित्रमहो समाह्वयति ये पुरतः पुरतः ॥

पलायते पलायते मकरकेतनस्य कामिमीनाकर्षणे सैषा सेर्ष्या वनिता या ॥

सुरासुरते सुरीसुरते सततं सततं सुरतं सुरते कृपयैतं पतितं पदारविन्दे भवती कुरुतात् इति ।

तदा खलु कदाचित् कुसुमसायकसायकशिलासारसारसाक्षपद-सारससारसायमानमानसेषु विरचितचोळपाण्ड्यरसानिवासेषु सतामग्रेसरेषु प्रसरत्कलिवैभवं न प्रभवेदत्रापि तत्र तत्रैव सर्वत इति तरसा सरसाशनप्रणीततापं देवदेवे वासुदेवे निर्जरकुलाध्यक्ष इव सहस्राक्षे सविनयमावेदयत्सु सुतरां कलिसङ्कुलतामपि सज्जनानां निखिलजनानुग्रहबद्धदीक्षो रक्षितनिखिलागमोदितकल्याणगुणः शिक्षितकलिकामादिगणः लक्षितसकलकलापारावारपारः कृपापाररत्नाकरः अस्मद्देशिकः शमदमादिधाम समाधाय तानेवमाचचक्षे —

स्मरतातं स्मरता तमुत्तीर्यते भवाम्भोधिः ॥

भव भीतो भवभीतोपास्यं रसजास्यं भर्तारं भक्तारं मायाः ॥

कीर्तयतालं कीर्तयता लंकेशानुजेन जितमजितपदं तमतो जगदीशमपि ॥

अर्चयतैतमर्चयतैतं येन मेतं भूयते भवति प्रातिहारिकोऽयं यतस्त मतः सततम् ॥

प्रह्लादं प्रह्लादं दितिनन्दननन्दनमिन्दिरानन्दनो वन्दनेन कृतवान् सदयालुः ॥

बृन्दारकबृन्दवन्दितं बृन्दावनमन्दिरानन्दिनं नन्दनन्दनं वन्दत भवन्तः ॥

भक्तारं भक्तारं भजतारं कमितारं जगतामजातकम्पाः सुजनाः ॥

राधया महितं गोपालमाराधयाम हितं गोपा लभ्येहा महामराः ! महतेह हवेन भविताऽतो जगतां सुतरां सुमतिः ॥

इत्थमभिहितवति महितं हितं परमहंससारसमिहिरे गुरुवर्ये समभिनन्द्य तमनुष्ठेयः सप्तदिनसप्ततन्तुर्जगतां भवता भवतापानिवारणाय करुणात इत्यत्यर्थमर्थयत्सु तेषु धरणीसुरसार्थेषु तरसा सरसार्थं निगमसार्थशिरोरसं संविवक्षुः सप्तदिनैरदीनमानसः समारभतैवं यथाविधि यथा विधिनन्दनो नारदः ॥

देशिकः कारयामास सप्ताहाध्वरमण्डपम् ।
श्रीबेरानगरे रम्ये श्रीबेरापुरतस्ततः ॥ ६१ ॥

तत्र हि—

सुरत्नमणिकुट्टिमे मणिगणैस्तदा मण्डिते
लसद्ध्वजपताकिका अनिलचालिता रेजिरे ।
सुदूरनिवसद्विजानिह महानगाहाध्वरो
भविष्यति समाह्वयन्त्य इव शङ्खचक्राङ्किताः ॥ ६२ ॥

घटितमणिकवाटो यज्ञवाटस्तदानीं
चतसृषु हरितासु प्राप्तपक्षीशकेतुः ।
इम इति सुजनानां सूचयद्द्वारवर्यैः
विलसति पुरुषार्थानां चतुर्णां हि मार्गाः ॥ ६३ ॥

विशङ्कटपताकिकाप्रकरमण्डितं मण्डपं
विवेश स गुरू रमापतिनिकेतचेता मुदा ।
पयोधितनयातनोर्नगरवासिभिर्भासुरै-
र्धराविबुधशेखरैरखिलसत्तमैः संयुतः ॥ ६४ ॥

अथ खलु गगनमिव सद्गुणं, तपोधनसदनमिव वितानसमुद्भासितं, वैरोचनिवाजिमेधशालाभ्यन्तरमिव सप्तवेदिकं, सप्तदिननिर्वर्तनीयसप्ततन्तुमण्डपमध्यमध्यासीने नारायण इव करुणार्णवे कलानिधाविव कुवलयानन्दसम्पादके, गौतम इव न्यायशास्त्रप्रवर्तके, पाणिनाविव प्रकृतिपुरुषप्रत्ययप्रकाशके, वार्तिककर्तरीव वररुचौ, जैमिनामिव विबुधविग्रहनिवारके, पर्जन्य इव साधुजनतापनिवर्तके, सुरतोत्सुककार्तवीर्य इव संश्रितनर्मदे, अत्राविवानसूयाश्रये, समीरण इव सदागतौ, काव्य इव कवौ, गीष्पताविव विबुधगुरौ, वरुण इव प्रचेतसि, धनाधिप इव विविधार्थसङ्ग्रहीतरि, भवानीवल्लभ इव कलानिधिशेखरे, धर्मात्मज इव सदा सविजये, विजय इव सुभद्रान्विते, स्वायम्भुवमनाविव सत्प्रियव्रते, महाराज इव सदाचारसम्पन्ने अस्मद्गुरुवर्ये समाक्रमत्वनल्पीयः सुकृतं दीनलोकोऽप्यमिति समुपक्रान्तवति क्रतुं सप्तदिननिर्वर्त्यमानं अतितरां निर्वृतचेतसः सरसीरुहमिव हंसाः, पारावारमिव सरि-

त्पूराः, दातारमिव याचितारः, भागीरथीमिव यात्राभिलाषिणः, प्रपामिव तृषिताः, दिनकरमिव कोकाः, चन्द्रमसमिव चकोराः, दाशरथिमिव कलशीभवादयः समाययू रमारमणचरणारुणार्णोजनिशरणाः धरणीगीर्वाणगणाः संवदन्तः परस्परमेवम् —

नरवरा वरवराहचरितं ललितं भवितात्र श्रुतिसरणीशरणम् ॥

नरके नरकेसरीन्द्रचरणारविन्दमकरन्दं पिबामो न सरामो वराः ॥

विहरामारामा रामारामे सहरामे सततं रसिकाः ॥

धीवरा धीवरानवलोकयत जानकीशराक्षितान् भक्तेः ॥

सुगतेऽसौ सुगतेऽसौ न रमारमणपदं सम्पादयेत् ॥

कलिले कलिलेलिहानगरैर्मनःकमले विनतासुतेशं भजामो रमेशम् ॥

यामो या मोहपटलतूलवात्याश्रोतुं तां हरिगाथां नगाहशालाम् ॥

तदनन्तरं सुरवरेष्विव सुधर्माश्रयेषु, प्रहर्तुमुद्यतेष्विव प्रवृद्धसत्त्वेषु, कामिजनेष्विव रामानुरक्तहृदयेषु, धराधरवरेष्विव प्रवृद्धवंशेषु, हेमन्ताहर्गणेष्विव हिमशीतलमानसेषु, द्वन्द्वायोधनधुरन्धरचाणूरप्रमुखयोधेष्विव श्रीपतेश्चरणानुबद्धरागेषु, सरोरुहेष्विव हंसपादसङ्गमरुचिरेषु, धनदात्मजेष्विव स्वतःसिद्धसर्वार्थेषु, धरकन्यावल्लभवत् सभापतिषु जितकामेषु च, सप्तद्वीपेष्विव सकुशेषु केषुचित् , सुरवैणिकेष्विव विरचितमहेन्द्रोपान्तवासेषु केषुचित् , द्वारकानगरवद्यादवक्षितिभृन्निवासेषु केषुचित् , कावेरीकनकापूरेष्विव कुटकाचलसंश्रयेषु केषुचित्, नक्षत्रगणेष्विव पुष्करालयेषु, गोवृन्देष्विव वृषप्रवृद्धरुचिषु समुपविष्टेषु तेषु परमहंसेषु शृण्वत्सु सहर्षं सहर्त्विग्गणं समारभत यथाविधि निगमान्तसारम् ॥

तदनन्तरं यथाविधि निर्वर्तिते च सप्तदिननिर्वर्त्यमानसप्ततन्तुमहोत्सवे अमित्रता त्रियामासु, सतामरसता कमलिनीषु, कलाहीनत अमायां यामिनीशस्य, शृङ्खलाबन्धः प्रबन्धेषु, संसारः शिलाविशेषेषु, मित्रच्छादनं दुर्दिनेषु, अपारिजातता जनेषु न मालासु, क्षमात्यागो हर्यक्षकेतौ, मित्रहानिर्निशासु, सदप्रकाशो दिवसेषु, पलाशसङ्गृहीतिरुपनीतिकर्मणि, कलानिधिविद्वेषः सैंहिकेये, दुर्वर्णयोगश्चरणाभरणे, हिरण्य-

हारिता वराहतनोः, अनम्रता तृणराजेषु, यमोल्लासो निगमेषु, मन्दता शनैश्चरस्य सत्सु रागाभावो रसातललोके, वंशविच्छेदो वेणुवनेषु, स्नेहहानिः प्रवृद्धदीपेषु, अपवादः शास्त्रेषु, सुकृतनाशस्त्रेताप्रारम्भे न जनेष्विति परमेवं व्यवस्थितम् ॥

तदा खलु कदाचिद्विदां वरेभ्यः समुपदिशन्तं वेदान्तसारमधिरोहणभूमिमिव विद्यालतायाः, सङ्केतनिकेतनमिव श्रीनिकेतनपादकमलभक्तिमत्तकाशिन्याः, कन्दमिव परमानन्दमन्दारपादपस्य कोशगृहमिव सदाचारसम्पदां, निजसदनमिव शमदमौदार्यसौन्दर्यादिगुणानां, अश्मसारमिव कुसुमेषुपृषत्कानां, गरुत्मन्तमिवामर्षकुम्भीनसस्य, द्वादशात्मानमिवान्तरतमसो निवर्तनाय समाविर्भूतं वसुधातले, डिण्डीरखण्डैरिव निखिलकलानिर्जराणां जिह्वाग्रसिंहासनहंसवाहनमहिळाकेळिकुन्दकुड्मलैरिव च संराजमानैः अपारविद्यापयःपारावारान्तरसञ्चरत्तरङ्गवर्गपारम्परीरीतिमनुसन्दधानैर्दशनैः परिशोभमानं,लावण्योदधिविद्रुमायमानाधररागकमनीयमुखं, ज्ञानवैराग्ययोः हृदयविहारमण्डपारोहणायमाननळिनाक्षतुलसीमणिमालासमुल्लसिततनुं, ब्रह्मवर्चोलहरीमिव यज्ञसूत्रिकां दधानं, महावराहमिव श्रीवत्सगोत्राभिरामं, धनाधिपमिव पुण्यजनाग्रगण्यं, त्रिदशेश्वरमिव वृद्धश्रवसं, धूर्जटिमिव शुचिजनितनयं, सुग्रीवमिव हरिजनाध्यक्षं, वृत्तलक्षणमिव शार्दूलविक्रीडितोल्लसितं, दशरथमिव सुमन्त्रसाधितसर्वार्थं तं निगमान्तसारविहृतिकान्तारानवरतकलितलीलं, कमलाललनचरणकमललीलाविमलपीयूषसमास्वादनलोलं, विमतमतमतङ्गजविजयसन्धृतमृगराजलीलं सीतारामाभिधानमेनं निगमान्तसारगुरुं, कल्पानोकहमिव याचकाः, धेनुमिव वत्साः, पुरन्दरमिव वृन्दारकाः, त्रिपदीमिव मन्त्रार्थाः, राजानमिवोपजीविनः, महापुरुषमिव महालक्ष्म्यः, नळिनीमिव मराळाः, कमलाकान्तमिव चिरन्तनोक्त्यन्ताः, प्रजेश्वरमिव प्रजाः, सङ्घशः समाययुः सज्जनाः ॥

तदानीं खलु हंसा इव सारासारविवेचनचतुराः, गीर्वाणा इव धिषणोत्कृष्टाः विपश्चितोऽपश्चिममनीषाः, मित्रोदय इव सारस-

व्राताः, प्रोषितपतिदर्शन इव पतिव्रताः, शरदागम इवाकाशाः, हिमांशुदर्शनादिव कुमुदाकराः, वर्षासमय इव मयूराः, निधिसमधिगम इव निर्धनाः, सासारवारिदसन्दर्शनं इव चिरोपोषितचातकाः, वृत्रवध इव विबुधाः, चिन्तामणिप्राप्ताविव चिन्तितसिषाधयिषवः अस्मदाचार्यसन्दर्शनतः सुतरां सम्प्रवृद्धविस्मयातिरेककोरकास्तमभिवन्द्य पुनः पुनः सञ्जगदुरेवं सज्जनाः —

श्रीमच्छुकाभिधानै-
रार्यैर्यद्भाष्यरत्नमाभाषि ।
उपदेष्टव्यं भवता
तद्भवतापापनोदनं कृपया ॥ ६५ ॥

अस्मद्गुरुवर एष स
उपादिशत्करुणयाथ तद्भाष्यार्थम् ।
अवहितमनसस्तं ते
सञ्जगृहुः सादरं सहोत्साहम् ॥ ६६ ॥

तदानीं खलु मिहिरकरविहार इव हिमसङ्घाः, भार्गीरमणसमाविर्भाव इव महामायाः, ग्रीष्म इव क्षुद्रापगाः, प्रत्यूषारम्भ इव क्षणदाः, जाज्वल्यमानज्वलनालिङ्गन इव पतङ्गाः, चक्रवातान्तर्गता इव तूललवाः, केसरिगणविलोकन इव करिणीशावगणाः, कर्णशष्कुलीसम्प्ररोहन्महारुजां जनानां भेरीध्वनय इव श्रुतितापकारिणः, अहर्गणा इव सत्पदार्थहीनाः, योधाग्रेसरा इव परलोकनिरोधकाः, गाढान्धकार इव प्रत्यक्षदृश्यमानद्रव्यापोहकाः, शिशुपालपौण्ड्रकसाल्वादय इव परब्रह्मावाच्यवाचकाः, वेनादय इव पुरातनगिरामानर्थक्यनिर्धारकाः, वेदविरुद्धराद्धान्ताः वैनतेयविद्रावितवाताशना इव शकलीबभूवुर्नितराम् ॥

तदानीं खलु सज्जनास्ते परमहंसपरमगुरुसमुपदिष्टं तदनिशमिष्टार्थपूर्त्यै परिपठन्तस्तमस आन्तरस्य निवर्तनतः परिमितेतरपारितोषमवाप्नुवन्तः ॥

सीतारामगुरूणां चित्रचरित्रप्रकाशकः सोऽयम् ।
कल्पद्रुस्तत्करुणापयसा संवर्धितश्चिरं जीयात् ॥ ७५ ॥

गोलीलोपेतैस्सत्पद्यैर्गद्यैः सचिन्तकार्थैश्च ।
कविचित्तरञ्जकोऽयं राजत्वासोमभास्करं राजन् ॥ ७६ ॥

इति गर्गकुलशेखररामकृष्णाचार्यसुत-
सीतारामसूरिविरचिते कवि-
मनोरञ्जके चतुर्थोल्लासः ।

पञ्चचत्वारिंशदधिकसहस्राब्दे वैशाखमासि एकोनविंशद्दिवसे भूसुत-दिने शुक्लप्रथमायां सायाह्नसमये एष कविमनोरञ्जकाख्यकाव्यग्रन्थः लिखित्वा समाप्तिमगात् ॥

JANASRAYĪ CHANDOVICITI



PUBLISHED BY
THE CURATOR,
THE UNIVERSITY MANUSCRIPTS LIBRARY,
TRIVANDRUM.

TIVANDRUM :
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1949.

INTRODUCTION

Among the various schools of prosody in Sanskrit[1] the Jānāśrayī school was well known even though it has become almost obsolete at present. In prosodial treatises and literary works references to Janāśraya and *Jānāśrayī Chandoviciti*, which is the basic work of the school, are very often met with. Jayakīrti, in his *Chandonuśāsana* (11th century A. D.) mentions Janāśraya[2]. The following are certain other references :

I. (*a*) तदुक्तं जानाश्रय्याम् —

"तच्छेदो रगवत् ।" (I. 16)

इति ।

(Vṛttaratnākaravyākhyā — *Vṛttaprakāśikā* by Kṛṣṇasāra *alias* Vedendrabhārati, MS. No. T 804 of this Library, p. 6).

(*b*) तदुक्तं जानाश्रय्याम् —

"अर्धेन मिश्राः षड् भेदाः पादेनाष्टौ द्वयोः क्रमात ।
इन्द्रमालापि भेदेन सर्वास्स्युस्ताश्चतुर्दश ॥"

इति ।

(ibid, p. 23)

II. तदुक्तं जानाश्रय्याम् —

"पञ्चस्वनुष्टुबादिषु सा गाथा भवति !
(cf. Vṛtti on V. 74)
पादैश्चतुर्भिष्षड्भिर्वा । (V. 75)

1. Pettāśāstri mentions six schools :

याः षट् पिङ्गलनागाद्यैः छन्दोविचितयः कृताः ।

(*Chandovicitivṛtti*)

2. *Vide* H. D. Velankar, 'Chandonuśāsana of Jayakīrti and ancient Kannada metres', JBBRAS vol. XXI, p. [illegible]

सा गाथा चतुर्भिर्वा षड्भिर्वा पादैः सजातीयैर्विजातीयैर्वा भवति ।" (Vṛtti on V. 75)

इति ।

(*Śākuntalacarcā*, MS. No. T M 305 of this Library, p. 14).

III. (*a*) तथाहि जानाश्रय्याम् —

"भाहेति समानम् । (II. 3)

हभेति प्रमाणम् । (II. 4)

वितानमन्यत् ।" (II. 5)

इति ।

(Vṛttaratnākaravyākhyā – *Kavicintāmaṇi* by Karuṇākaradāsa, MS. No. T. 543 of this Library, p. 73).

(*b*) जनाश्रयेणाप्येवमुक्तम् —

"अर्धेन मिश्राः षड् भेदाः पादेनाष्टौ द्वयोः क्रमात् ।
इन्द्रमालाविभागेन सर्वास्तास्तु चतुर्दश ॥"
(Vṛtti on IV. 37)

इति ।

(ibid, p. 80)

(*c*) उक्तं च जनाश्रयेण —

"सार्षी । (V. 74)

सा तु गाथा आर्षीति ज्ञेया" (Vṛtti on the above)

इति ।

(ibid, p. 134)

In a learned paper in the *Tirumalai Sri Venkatesvara*, Mr. M. Ramakrishna Kavi has brought this work to the notice of scholars[3] and Pandit V. Venkatarama Sharma has published its first two chapters in the same Journal[4]. The entire work is now published for the first time.

3. Vol. I. No. 2. pp. 181 ff.
4. *ibid*, Nos. 9 and 10 (1933)

The title of the work.

The present publication comprises the original work in sūtra style and an elucidative *vṛtti*, and *Jānāśrayī Chandoviciti* is the title of the former.[5]

The colophons at the end of the *vṛtti* in every chapter mention the title of the work as *Jānāśrayī Chandoviciti*[6]. Moreover from among the passages quoted in other works as taken from *Jānāśrayī Chandoviciti* some are identified in the sūtra portion and others in the vṛtti as seen from the citations given above. These facts are apt to lead one to think that the title *Jānāśrayī Chandoviciti* denotes the original and *vṛtti*. In fact Mr. Ramakrishna Kavi refers to the author of the *vṛtti* as *Jānāśrayīkāra*[7]. But from the passage namely, जानाश्रयीं छन्दोविचितिं ... . व्याख्यास्यामः at the beginning of the *vṛtti* it is quite clear that *Jānāśrayī Chandoviciti* is the title of the original work in the form of sūtras.

The title *Jānāśrayī Chandoviciti* and the encomium paid to king *Janāśraya* in the stanza at the very beginning of the *vṛtti* bespeak the fact that the work is associated with Janāśraya in one way or other. The term ***Chandoviciti*** is to be understood in the sense of "a treatise on metre", and not as the name of any particular work, as some critics have understood the term[8]. So the title is to be understood as 'a work on metre connected with Janāśraya'.

5. *vide infra*, p. 1.

6. *ibid*, pp. 11, 23, 29, 39, 96, 106.

7. *op. cit.* p. 134.

8. In the *vṛtti* the term is used to denote a work on metre in general. Cf. पैङ्गलादिछन्दोविचितिषु (p. 1) and स्वर एवाक्षरं छन्दोविचितिषु (p. 3). Note also the title *Chandovicitivṛtti*. See foot note 1.

Different authorship of the sūtra and the vṛtti.

Mr. Kavi assumes that the sūtra and the vṛtti are written by one and the same person and that *Jānāśrayī Chandoviciti* is the common name for both. But internal evidences are not lacking to show that the authors of the sūtra and the vṛtti are different persons.

1. At the beginning of the vṛtti its author says :

जानाश्रयीं छन्दोविचितिं गणस्वामिविरचितव्याख्यां व्याख्यास्यामः ।

From this passage it is to be understood that *Jānāśrayī Chandoviciti*, which is the basic work in sūtra style, was first commented on by one Gaṇasvāmin and the present vṛtti is only a second commentary on the work by a different commentator.

2. Two different interpretations are offered by the vṛttikāra to the sūtra माद्देति समानम् (II. 3). The first interpretation is that the metre in which *guru* and *laghu* occur alternately is *samāna*. The second is that if the metre is composed of either *guru* or *laghu* only it is designated as *samāna*. Had the sūtrakāra and the vṛttikāra been one and the same person, then there would not have been such a different interpretation.

3. While defining the *gītikā* metre, the *sūtrakāra* says that in certain cases the *yakāra* (कमलनीय्) and *īkara*) (धीवराय्) may occur as the third and fifth groups of letters in the metre (cf. क्वाचित्तृतयिश्च पञ्चमोऽपि वा V. 43). Regarding this the vṛttikāra says: प्रयोगे यत्नः कर्तव्यः. This means that he knows no illustration for the particular type of *gītikā*. If it was the sūtrakāra who wrote the vṛtti he would never have expressed inability to cite an illustration.

4. Having interpreted the sūtra भा श्रीः (IV. 3) as

ग इत्येको गुरुः पादे पादे भवतिं चेत् श्रीर्नाम वृत्तं भवति ।

the vṛttikāra puts the question: कथमेनदुपलभामहे सूत्रानुक्तत्वात् पादे पाद इति ? and answers it as follows:

समस्तार्धयोरसम्भवात् । कथमसम्भवः ? उक्तस्य चतुरक्षरत्वादेकमक्षरं समस्तमर्धं च न भवति ।

This manner of interpretation tends to show that the vṛttikāra is different from the sūtrakāra.

These internal evidences are, it is hoped, enough to show that the sūtrakāra and the vṛttikāra are not one and the same person.

The Author of the sūtras.

From the title *Jānāśrayī Chandoviciti* it would appear *prima facie* that the author of the work is Janāśraya by name[8a]. But it is very doubtful whether it is really so. In the opening stanza:

स भूपतिरुदारधीर्जयति सम्पदेकाश्रयो
जनाश्रय इति श्रिया वहति नाम सार्थं विभुः ।
जिता विजितशत्रुणा जगति येन रुद्धा चिरं
मखैरुरुभिरद्भुतैर्मघवतो जयश्रीरपि ॥

the vṛttikāra praises Janāśraya referring to his magnanimity, wealth and ritual performances. But he does not characterise him as the author of any work on prosody. He does not even attribute scholarship or literary eminence to the king. So it is safer to believe that one of the scholars whom the king had patronised wrote this work and with a view to honour his patron named the work after him[9]. Very little is known about this author who wrote under the patronage of king Janāśraya. Mr. Kavi has, in his paper, suggested that "the author was probably Gaṇasvāmin who appended a *bhāṣya* or scholium to it"[10], but he has attributed the work

8 a. Note the manner of reference in Vṛttaratnākaravyākhyā—Kavicintāmaṇi जानाश्रयेणाप्येवमुक्तं etc.

9. Mr. Kavi is also of the same view.

10. *op. cit.*, p. 134.

to one Rudrasvāmin in another place[11]. Neither of these is supported by any evidence.

Date.

The *Jānāśrayī Chandoviciti* refers to Piṅgala in the sūtra अस्यैव ने पिङ्गलस्य (IV. 102). So the work is later than 2nd century A. D to which Piṅgala is assigned. The name Janāśraya gives a clue to the date of the work. Mr. Kavi has spotted 'Janāśraya' as a title held by Mādhavavarman II of the Viṣṇukuṇḍin dynasty, based on the Polamuru plates[11a] and assigns him the date 580 –615 A. D. But according to Dr. D. C. Sircar [11b] the plates relate to Mādhavavarman I (c. 535 – 585 A. D.) while according to Mr. B. V. Krishna Rao[11c] it really relates to Mādhavavarman III (c. 546 – 611 A. D).

Among the sources to which the illustrative stanzas cited in the vṛtti are traced[12], the latest appears to be

11. *vide Nāṭyaśāstra*, Vol. II. (GOS LXVIII) p. 281n.

11a. *Vide* Polamuru plates edited by Subba Rao in the Journal of the Āndhra Historical Research Society, Vol. VI. pp. 17 ff:

अतुलबलपराक्रमयशोदानविनयसम्पन्नो दशशतसकलधरणीतल-नरपतिः अवसितविविधदिव्यस्त्रिवरनगरभवनगतपरमयुवति-जनविहरणरतिः अनन्यनृपतिसाधारणदानमानदयादमधृति-मतिक्षान्तिकान्तिशौर्यौदार्यगाम्भीर्यप्रभृत्यनेकगुणसंपज्जनित-रयसमुत्थितभूमण्डलव्यापिविपुलयशाः क्रतुसहस्रयाजी हि-रण्यगर्भप्रसूतः एकादशाश्वमेधावभृतस्नानविगतजगदेनस्कः सर्वभूतपरिरक्षणचुञ्चुः विद्वद्द्विजगुरुवृद्धतपस्विजनाश्रयो महाराजः माधववर्मा ॥

11b. *vide* Indian Historical Quarterly, vol. IX (1933), pp. 273—78, 956—66.

11c. Early Dynasties of Andhradesa by B. V. Krishna Rao Madras, 1942, pp. 414—421.

12. Many illustrations remain yet untraced.

Bhāravi's *Kirātārjunīya* which may be assigned to 570 A. D. So the vṛtti is later than *Kirātārjunīya*, but may be very near to it in point of date. It is quite possible that the vṛttikāra and king Janāśraya were contemporaries, as the former uses present tense when he refers to the latter[13]. In the light of these facts the sūtra and the vṛtti may be assigned to circa 600 A. D.

The work.

Jānāśrayī Chandoviciti is divided into six chapters dealing with specific topics. The first shows how metres are generally classified into 26 groups on the basis of the number of syllables and defines the varieties such as *virāṭ*, *nivṛt*, *svarāṭ* and *bhurik*. After explaining the conception of *guru* and *laghu* and laying down the symbols with which they are indicated in the work, the chapter proceeds to enumerate 18 groups of sounds which are arbitrarily accepted for the sake of convenience in elucidating various metres. Then *gaṇas* of four and five syllables are laid down and the *yati* is dealt with pointing out the technique adopted in the sūtras for indicating its occurrence in various metres.

The second chapter is mainly concerned with the *viṣama-vṛttas* with the chief varieties of *Udgatā*, *Upasthitapracupitā*, *Padacaturūrdhva* and *Anuṣṭup*. But at the beginning of the chapter *Samāna*, *Pramāṇa* and *Vitāna*, the three general divisions of metre on the basis of the employment of *laghu* and *guru* in a pāda, are expounded.

The varieties of *Ardhasamavṛtta* such as उपचित्रं, द्रुतमध्या, वेगवती, भद्रविराट्, केतुमती, आख्यानिका, विपरीताख्यानिका, हरिणप्लुता, अपरवक्त्रा, पुष्पिताग्रा, यमवती, देवगीती, शिखा, and खञ्जा are dealt with in the third chapter.

13. See the words जयति and वहति in the opening stanza.

Samavṛttas or metres of pādas having exactly the same number of syllables in the same order, are expounded in the fourth chapter. The various sūtras from *Uktam* (the metre containing one syllable in a pāda) to *Utkṛti* (the metre containing twenty-six syllables in a pāda) with all their varieties are given. This is followed by an account of *daṇḍakas*.

Ther fifth chapter begins with the differentiation of Jāti and Chandas and this is quite appropriate, since the varieties of Jāti or Mātrā vṛttas are treated in this chapter. It contains three prakaraṇas pertaining to *Vaitālīya*, *Mātrāsamaka* and *Āryā* and ends with the treatment of the miscellaneous metres in Jāti. The varieties of *Vaitālīya* metre are :

औपच्छन्दसिकं, आपातलिका, प्राच्यवृत्तिः, अपरान्तिका, उदीच्यवृत्तिः, दक्षिणान्तिका, प्रसक्तकम्[14] ।

The following metres belong to the *Mātrāsamaka* class:

वानवासिका, विश्लोकः, चित्रा, उपचित्रा, पादाकुलकं[15], गीत्यार्या, शिखा[16], चूलिका, तारा[17] ।

The *Āryā prakaraṇa* contains the various ramifications of *Āryā* such as:

पथ्या, विपुला, चपला, मुखचपला, जघनचपला, वामनिका, गीतिः ।

The metre *Gīti* has three varieties, *viz.* अवा, गीतिका, आर्यागीतिः ।

14. This is only a mixture of *Prācyavṛtti* and *Udīcyavṛtti*.

15. A metre in which lakṣaṇas of the four previous metres are seen at once.

16. A second variety of *Gītyāryā*.

17. A second variety of *Cūlikā*.
Mr. Kavi has not noticed the *Mātrāsamaka prakaraṇa* in the chapter and so by mistake he includes these in *Āryā*. (see p. 132)

The miscellaneous section deals with the following metres:

गलितं, निर्धोयिका, नक्कुटकं, अधिकाक्षरा, शीर्षकं, ललितं, सुभद्रा, विद्रुमः, वंशपत्रं, कुञ्जरः, पुष्पदन्तः, माला, त्रिकलयं, भङ्गद्विपदी, द्विपदी, विदारी, भङ्गुरासकं, अवलम्बनं, रासकं[18], गाथा ।

